विशेष--इस गद्यांशमें प्रथम तो श्रीयमुनाजीको प्रद्युम्नकी शोभावाली बतलाया है, प्रद्युम्नके विशेषण द्रष्टव्य हैं, दूसरे इसे मेघमालाके समान कहा है क्योंकि मेघमाला और श्रीयमुनाका वर्ण साम्य है। श्रीयमुनाको कल्पलताके समान भी बतलाया है, कल्पलता चारों पुरुषार्थ देती है, श्रीयमुनाजी भी धर्म, अर्थ, काम, मोक्ष प्रदान करती हैं। काल-जालमें मत्स्य पड़ जाता है मारा जाता है--श्रीयमुनामें पापरूपी मत्स्य फँसकर मारा जाता है अर्थात् ये पापोंका नाश करती है। आगेके विशेषण भगवान् सूर्यनारायणके हैं, वे मोहमय जलका पान करते हैं, कामका विनाश करते हैं, लोभरूपी ग्राहका मर्दन करनेवाले आदिके रूपोंमें चित्रितकिये हैं साथ ही भगवद्-भक्तिरूप हयनियोंसे उन्हें सेवित लिखा है। वे स्वय धर्मरूपी गज हैं सबका कल्याण करते हैं और धर्मराजके चारों पैरोंका बन्धन करनेमें समर्थ श्रीयमुना हैं सिद्ध किया है।

सभी आचार्योंने श्रीयमुनाजीका स्तवन किया है। मथुराकी भक्तिसे परिपूर्ण मित्रमिश्र जैसा कवि मथुराके गौरवकी वर्धिनी श्रीयमुनाजीके माहात्म्यके

(१) अम्बुज भुवा – ब्रह्मा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मोहमयमम्भो-निरवशेषमापिबतो विवेकानेकशालूक[1] -निकट-निकाम-वर्द्धमान - कामकमलकुलमामूलमुन्मूलयतोऽतिनिक्षोभलोभग्राहमाम-र्दयतोऽप्यतिमात्र विग्राह मानमद-महोदार-भूदारवाटमुद्दारयतोऽप्य-तिमत्सरतुच्छेतर-मत्स्य निकरमुत्सारयतो भृशमनुरक्त-व्यक्त-हरिभक्ति-संसक्त करेणुभिर्ललित-शर्म्मनर्म्म कर्म्मोद्दाम धर्म्म द्विरदपते[2] विहार-माचरतोऽति चण्ड - चंक्रमण चतुर चतुःपद बन्धनीव, नन्दिनो सवितुः ॥३२॥

गानसे कैसे विराम लेते अतः बड़े ही सुन्दर ढङ्गसे मथुराका वर्णन अपनी कृतिमें प्रस्तुत किया है। आचार्य शङ्करने इन्हें मनोमल दूर करनेवाली कहा है—

"धुनोतु मे मनोमलं कलिन्दनन्दिनी सदा।"

आचार्य वल्लभने इन्हें सकल सिद्धि प्रदात्री कहा है—

नमामि यमुनामहं सकल सिद्धि हेतुं मुदा
मुरारि पद पंकज स्फुरदमन्द रेणूत्कटाम्।
तटस्थ नव कानन प्रकट मोद पुष्पाम्वुना
सुरासुर सुपूजितस्मरपितुः श्रियं विभ्रतीम्॥

श्रीयमुनाको ही सूर्य–पुत्री कहा गया है—भागवतमें जब भगवान् श्री-कृष्ण-अर्जुनके साथ हस्तिनापुरमें विहरण करते यमुना तटपर गये तब तपस्या-रत श्रीजीने कहा —

"कालिन्दीति समाख्याता वसामियमुनाजले।"
"निर्मिते भवने पित्रा।"

मेरे पिता सूर्यके द्वारा निर्मित भवनमें मैं रहती हूं, सूर्यकी पुत्री हूं। वैवस्वत यम और यमीकी जन्मकथा नवम-स्कन्धमें वर्णित है। ऋग्वेदका यम-यमी सूक्त तो प्रसिद्ध ही है। 'इमंगे गंगे यमुने सरस्वति' मन्त्रमें श्रीयमुनाजीका नाम है। श्रीयमुनाजी भक्तोंकी कामनापूर्ण करनेवाली हैं सकल-सिद्धियोंको प्रदान करती हैं और श्रीकृष्णके वेषको धारण करती हैं। आगे कविने इनकी श्यामतापर अच्छी कल्पनायें व पौराणिक तथ्य प्रस्तुत किये हैं ॥३३॥

---

(१) उत्पलकन्दः।

(२) दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः (अ० को० २।८।३४)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चण्डांशोर्दण्ड पाणिः समजनि स पुनर्दण्डयत्येव चण्डं
रंहःसंहाभिधावद् भट मखिलमभूत्तथ्यमित्थं स कालः ।
तज्जातायाश्च तस्य स्वसुरपि सकलं घोरमंहोहरन्त्याः
कालिन्द्याः काममिन्दीवर रुचिर रुचिर्युज्यते कालिमैव ॥३४॥

भृशं भवत नन्दिनी दिनमणेस्तमोग्रासिनः
स्वकारण गुण ग्रहा त्रिभुवनो तमोग्रासिनी ।
उपाभिबलसाधिनी पुनरसौ तमः पाकजा-
च्छयात्तु विशदं[1] महो रुचिमहो सुनीलां विना ॥३५॥

अनुवाद—प्रचण्ड किरणोंवाले सूर्यसे दण्डपाणि धर्मराजका जन्म हुआ, वह पाप पुञ्जके साथ दौड़कर पापी लोगोंको दण्ड देते हैं यह तथ्य है कि इस कारण ही वह काल (काले रङ्गके) हैं। उन्हीं सूर्यसे उत्पन्न हुई तथा उन धर्मराजकी अखिल पाप हारिणी बहिन श्रीयमुनाजोकी सुन्दर नीलकमलकी सो कान्तिवाली कालिमा (श्यामता) युक्त ही है ॥३४॥

विशेष—काल (यम) की बहिन होनेके कारण यमुनाका रङ्ग काला है जो ठीक है ॥३४॥

अनुवाद—जगत्के अन्धकारको हरनेवाले दिनमणि भगवान् सूर्यकी पुत्री श्रीयमुना अपने कारणके गुणोंको ग्रहण करनेवाली होवें। अर्थात् जिस प्रकार उनके पिता भगवान् सूर्य नारायण अंधकारको ग्रस लेते हैं उसी प्रकार यह यमुना भी अंधकार रूप नीलिमाको धारण करनेवाली हो (तो इसमें आश्चर्य ही क्या है ?) यह यमुना अपने जलमें श्यामताकी प्रतीतिके लिए उपाधिके बलको सिद्ध करनेवाली है। अन्यथा शुक्ल गुणवाले जलमें नीलिमाके बिना श्यामताकी सिद्धि कैसे हो ? ॥ ५॥

विशेष—सूर्यका गुण है तमोनाशक, उस गुणको ग्रहण करनेके कारण यमुना तीनों लोकोंका अन्धकार नष्ट करनेमें समर्थ है। यद्यपि यमुनाका जल स्वच्छ है नीलापन नहीं है क्योंकि न्याय-मुक्तावलीमें यमुना जलको स्वच्छ बतलाया है। ३५॥

(१) कालिन्दीजले विशद रुचिरिति निर्णीतम्, न्याय सिद्धान्त मुक्तावल्याम्। यथा-'ननु शुक्ल रूपत्वमेवेति कुतः कालिन्दीजलादौ नीलमोपलब्धेरिति चेन्न। नील जनकतावच्छेदिकायाः पृथिवीत्व जातेरभावाज्जले नीलरूपाऽसम्भवात्। कालिन्दी जले नीलत्व प्रतीतिस्त्वाश्रयौपाधिकी। अत एव वियति विक्षेपे धवलिमोपलब्धेः" इति "वर्णो शुक्लः ३९ कारिका व्याख्यायाम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुरंजित कृष्णचञ्चरीकं मथुरामञ्जुल-मञ्जुपुण्डरीकम्
निजलक्ष्म्य दधाति मोक्षलक्ष्मीर्यमुनानालविलासलीलयैव ।।३६।।
अलमप्रतिपक्ष मोक्ष लक्ष्म्या मथराक्ष्मासु विहारमात्रहन्त्याः ।
वशयत्यचिरेण तां गृहीता यमुना वेणिलता परिच्युतासौ ।।३७।।
परिशीलित माथुरोपकंठा यमुनानील निचोल सावगुण्ठा ।
समुमुक्षु-पतिर्विहर्तु कामात्यभिरामा विरराज मुक्ति रामा ।।३८।।
सुरकुंजर-दान-वारि लोभाद् भ्रमरालो रभसेन बंभ्रमीति ।
कृतझङ्कृति नन्वनीचवीचीचयवाचाल कलिन्दनन्दिनीयम् ।।३९।।

अनुवाद—श्रीकृष्णरूपी भ्रमरको आनन्दित करनेवाले मथुरारूपी मनोहर सुन्दर कमलको यमुनारूपी नालके विलासकी लीलाद्वारा अपने चिह्न (ध्वज) के रूपमें मोक्ष लक्ष्मी धारण करती है ।।३६।।

विशेष—व्रजको समुद्र और मथुराको कमलकी मान्यता व्रजमें इस प्रकार है—

व्रज समुद्र मथुरा कमल वृन्दावन मकरन्द ।
व्रज ललना सब पुष्प हैं मधुकर गोकुलकन्द ।।

अनुवाद—मथुराभूमिमें विहार करते हुए मोक्ष लक्ष्मीका कोई प्रतिपक्षी नहीं है और उससे कोई प्रयोजन भी नहीं है क्योंकि यदि वह मोक्ष लक्ष्मी यमुनाकी वेणी रूपलतासे छूट भी जाती है तो भी मथुराका आश्रय लेकर मोक्षार्थी उसे शीघ्र ही ग्रहणकर लेता है ।।३७।।

अनुवाद—मथुरा भूखण्डके समीप विचरण करनेवाली (बहनेवाली) घूँघट निकाले हुए नीली चोली धारण करनेवाली अति सुन्दरी मुक्तिरमणी यमुना, मुमुक्षु जनोंके पति श्रीकृष्ण सहित विहार करनेकी कामनासे युक्त सुशोभित हो रही है ।।३८।।

अनुवाद—देवलोकमें गजेन्द्रके कपोलमे बहती हुई मद-जलकी धाराके पानके लोभसे हठात् पुनः-पुनः भ्रमण करती हुई भ्रमर पंक्तिके समान, मानों अपनी उच्चतरङ्गोंके समूहसे युक्त कलकल निनाद करती हुई यह कलिन्द पर्वतसे प्रकट हुई श्रीयमुना झङ्कार करती हुई (बह रही है) ।।३९।।

विशेष—श्रीवल्लभाचार्यजीने लिखा है—कि ये सूर्यलोकसे आकर कलिन्द पर्वतसे बहती हैं अतः कलिन्दनन्दिनी कहलाती हैं—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मथुरापुरमत्तकुम्भिनोऽमल - रम्भातरुभङ्ग - रङ्गिणः ।
अतिवेलमुदेति दान - धारा यमुनाम्भःकपटेन दुर्निवारा ॥४०॥
हरिनीलमणि - प्रणीतमध्या यमुना नील - गुणेन गाढबद्धा ।
पृथुवक्षस एव मोक्ष - लक्ष्म्या मथुराभूरनुभूयते विभूषा ॥४१॥
रचयन्नघ-रोगनिग्रहं, द्रढयन्नेव च धर्म्म - विग्रहम् ।
सकलोपरि साधयन्गतिं, यमुनाकृष्ण रसोऽनुभूयते ॥४२॥

कलिन्द गिरि मस्तके पतदमन्द पूरोज्ज्वला,
विलास गमनोल्लसत् प्रकट गण्डशैलोन्नता ।
सघोष गति दन्तुरा समधिरूढ दोलोत्तमा,
मुकुन्द रति वर्धिनी जयति पद्मबन्धोः सुता ॥ ॥३९॥

अनुवाद—मथुरानगरी रूप मतवाले तथा कदली वृक्षको तोड़नेवाले और उसमे आनन्द लेनेवाले हाथीके मद जलकी धारा यमुना जलके बहाने अनिवार्य रूपसे प्रवाहित हो रही है ॥४०॥

विशेष--मथुरा नगरके गज सिद्ध किया है और यमुनाको मदजल धारा कहा गया है । अपन्हुति अलङ्कार है ॥४०॥

अनुवाद--जिसका मध्यभाग हरिरूपी नीलमणिमे शोभित है, तथा कृष्णवर्ण रूपी नीलगुणसे हठतर आबद्ध है ऐसी मथुरामें वर्तमान 'यमुना' मोक्ष लक्ष्मीके पृथुल वक्षस्थलका अलङ्कार है ॥४१।

विशेष--मथुराके मध्य श्रीयमुना बहरही है, यमुनाजीका वर्ण नील है । नीलवर्णका आभूषण भी होता है मथुरानगर नीलवर्णमे सुशोभित है ।

"नीलं तन्महसोज्ज्वलं किमपि सद् रूपं सदोपास्महे ।"

[पं० श्रीव्रजी कृत यमुना०]

अनुवाद--पापरूप रोगोंको नष्ट करते हुए, धर्मके स्वरूपको दृढ़ करते हुए सबके ऊपर गतिको सिद्ध करते हुए यमुनाका नीलजल अथवा यमुना समीपवर्ती श्रीकृष्णका आनन्द अनुभूत हो रहा है ॥४२॥

विशेष--श्रीयमुनाका जल--पाप नाशक है, धर्म बढ़ानेवाला है। बैकुण्ठ गति ही सबसे ऊपर है, उसे प्रदान करनेवाला है । यमुना-कृष्ण युगलानन्द का अनुभव भक्तोंद्वारा किया जाता है ॥४२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साधुरीतिमधिगत्य माधुरी, मातुरी भवति सा तु चातुरी ।
कातरी भवदघैण - लोचना, लोचनाम्बु यमुनां वितेनिरे ॥४३॥
[1]केलिमन्दिरमिहारुरुक्षवे, मोक्षपक्ष्मलदृशे मुमुक्षवे ।
इन्द्रनीलमणिनाधिरोहणी[2], वेधसाक्रियत भानु-नन्दिनी ॥४४॥

अनुवाद--मथुरा-मातासे सम्बन्ध रखनेवाली, 'यमुना' सरल रीति स्वीकार करके भी (पापके नष्ट करनेमें) चतुर बन जाती है (अतएव) घबड़ाई हुई 'पाप-पत्नीरूपी' मृगलोचनाओंने अपने कज्जलयुक्त नेत्र जलको अर्पणकर यमुनाजीको बढ़ाया है ॥४३॥

विशेष--वे नेत्र जलसे यमुनाजोकी मानों पूजाकर उनके हृदयमें दया उत्पन्न करना चाहती है, जिससे अपने पति (पाप) की रक्षा होतो रहे ।

दूसरा भाव यह है कि वे अपने पतिके सद्यः विनाश-जन्य दुःखसे रो रही हैं उनके आंसुओंकी धार पनालेके रूपमें यमुनामें जब गिरती है तो यमुनाक पानो बढ़ जाता है । क्योंकि पापकी बहुत-सी पत्नी निरन्तर दिन-रात रुदन करती रहती हैं । कवियोंने गोपियोंके रुदनसे भी यमुना-जल बढ़नेकी भावना व्यक्तकी है--

'किन्त्वेका यमुना कुरंगनयना नेत्राम्बुभिर्वर्धते ।"

सूरदासने लिखा है कि--

"निसदिन बरसत नैन हमारे ।"

\+ + + +

'सूरदास प्रभु अंबु बढ्यो है गोकुल लेहु उबारे ।" ॥४३॥

अनुवाद—इस संसारमें मोक्ष लक्ष्मीके क्रीडा मन्दिरमें आरूढ़ होनेके इच्छुक, मुमुक्षु जनके लिये ब्रह्माने इन्द्र नीलमणिसे रचित नसेनो (आरोहण काष्ठ पोठिका) श्रोयमुना प्रकटकर रखी है ॥४४॥

विशेष--श्रीकृष्णका केलि-मन्दिर बहुत ऊँचा है या पुण्यद्वारा प्राप्तव्य है उसके लिये निःश्रेणीकी आवश्यकता है वह नीलमणिरूपा ही नसेनी है इसका आश्रय लेकर मोक्षफल प्राप्ति सहज है ॥४४॥

---

(१) केलि--केलनं केलि. केलरिति वा-
''द्रव केलि परीहासाः क्रीडा खेला च नर्म च ।
केलिमन्दिरम्--आमाद भवनम् । १।७।३२
(२) सीढी आरोहणं स्यात् सोपानं निश्रेणिस्त्वधिरोहणी अ०को० २।२।१८

कृतकाय - कदम्बडम्बरा[1], विहरन्त्येव वृषा निरंकुशाः ।
कलि चौर भयेन वेधसा, यमुनाऽयोमयदाम निर्ममे ।।४५।।

सहेलं येनालं कृतमधुपुरी दुर्ग शरणं
गृहीतः कालिन्दीविलसदसिरिन्दीवररुचिः ।
करस्याग्रे मोक्षः फलमपि भविष्यत्यविकलं
किमस्या वै रंहो विकट भट रंहः प्रकटितैः ।।४६।।

अनुवाद—अपने शरीरके सुविपुल आडम्बरको व्यक्त करते हुए वृषभ (यहाँ) स्वच्छन्द विहार करते रहते हैं । कलियुगरूपी चोरके भयसे ब्रह्माने लोह-निर्मित अच्छेद्य एवं अभेद सांकलके रूपमें मानों यमुनाका निर्माण किया है ।।४५।।

विशेष—धर्मका वृषरूपत्व शास्त्रोंमें वर्णित है—"धर्मोऽयं वृषरूपधृक्" श्रीमद्भागवतके प्रथम स्कन्धमें धर्मका वृषभरूप और पृथ्वीका धेनुरूप दिखलाते हुए राजा परिक्षितका उनसे संवाद प्रस्तुतकर दिया है । वृषभके ४ पाद, त्याग, तपादि मेंसे केवल सत्य ही शेष रह गया था, शेष तीन पाद नष्ट हो चुके थे । राजाने उनके चारों पाद सुस्थिर किये और कलियुगको ललकारा था । यहाँ मित्र-मिश्रने कल्पनाकी है कि कहीं धर्मको कलियुगरूपी चोर न लेजावें । अतः उसे लौह-शृङ्खलासे बाँध देना उचित है धर्मको बाँधनेके लिये श्रीयमुनाकी नीलधारा-रूपी शृङ्खलासे बढ़कर कोई शृङ्खला हो नहीं सकती अतः ऐसा वर्णन किया है । अथवा—यमुना ही धर्म रक्षिका है, यह मानना चाहिये ।।४५।।

अनुवाद—बड़े उत्साहसे जिसने मथुरा-नगर रूप दुर्गका आश्रयले लिया है और नीलकमल जैसी कान्तिवाली चमचमाती यमुनारूपी तलवार धारणकर ली है, उसके लिये मोक्षफल पूर्णरूपेण हाथके अग्रभागमें ही स्थिति है । फिर इस यमुनाके वेगवाले भयानक वेग प्रकट करनेसे क्या प्रयोजन ? (जबकि मोक्ष प्राप्ति तो पहले ही हो चुकी है) ।।४६।।

विशेष—दुर्गका आश्रय सुखद माना जाता है और यदि योद्धाके हाथमें तलवार हो तब हताश होना ही नहीं है । अतः यमुनाके भयानक वेगका भी प्रयो-जन नहीं रह जाता क्योंकि तलवारसे मोक्षरूप फल तो पहले ही दुर्गमें प्रवेश करते ही प्राप्त हो गया है ।

(१) धनुषका शब्द—"पटहाडम्बरौ समौ" । २।८।१०८

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

दुरमीव समीरणाशना-लसकालाजगरी गरीयसी ।
कलिभेकभयंकरी बभौ, मधुपुर्यां शमनस्वसैव सा ॥४७॥
यस्य क्षणं मधुपुरी क्षणगोचरीस्या
न्मुक्तिस्तु तत्सहचरी विजरीहरीति ।
धात्रेत्यतानि धरणौ यमुनाच्छलेन
द्राघीयसो लिपिरसीममषीरसेन ॥४८॥
यमुनातनुरुह राजि-र्मथुरा राजीवनेत्रायाः ।
स्फुटयत्यनु विलासानि - तिलोचन गोचरीभूय ॥४९॥
संभ्राम्यन्भ्रान्तियोगान्मधुर मधुपुरी प्राप्य पापैर्दुरापां
निस्तापः कृष्णवर्त्मा[2] समजनि तदनु प्राप निर्वाणमेव ।

अनुवाद--दुष्टरोग-रूपी वायुके भक्षणसे उत्पन्न आलस्ययुक्त बहुत बड़ी काली अजगरी जैसी यह यमुना कलियुगरूप मेढकको भयभीत करनेवाली है, यमुना, यमराजकी बहिन है और वह मथुरामें सुशोभित है ॥४७॥

विशेष—अजगर सर्प वायुका भक्षण करता है एक स्थानपर पड़ा हुआ ही श्वासाकृष्टसे जीवको मुखमें धारण करता है । श्रीयमुनाको भी अजगरी बतलानेका यही आशय है कि यह पापरूपी या योगरूपी वायुका भक्षण करती है। सर्पका अहार मेढक होता है यह यमुना कलियुग रूप मेढकको नष्ट करनेमें समर्थ मानी गई है क्योंकि नष्ट करनेका कार्य यमका है तो यमुना भी तो उसकी भगिनो है। यहाँ कलियुग नाशका तात्पर्य दुष्कर्मोंका नाश समझना चाहिये ॥४७॥

अनुवाद—क्षणभरके लिये भी मथुरा जिसकी दृष्टिके सामने आ जाय तो मुक्ति उसके साथ विहार करती है। ब्रह्माजीने पृथ्वीपर यमुनाके बहाने असीम स्याहीके रससे बहुत बड़ी लिपि बनादी है ॥४८॥

विशेष--यमुनाकी धार नील रङ्गकी है अतः स्याहीसे साम्य सिद्ध करते हुए उसे लिपि सिद्ध किया है ॥४८॥

अनुवाद--कमलके समान नेत्रवाली तो मथुरानगरी है, श्रीयमुना उसके नेत्रोंकी पलक है वह जब नेत्रोंके सामने आती है अर्थात् जब श्रीयमुनाके दर्शन होते हैं अनेक प्रकारके विलास उसके सामने प्रत्यक्ष दिखलाई देते हैं ॥४९॥

[यमुनाका श्याम रङ्ग कैसे हुआ]

---

(१) अमो रोगः ।
(२) अग्निः । कृष्णो धूमो वर्त्मास्येति कृष्णवर्त्मा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्वाणात्कृष्णभावानलभत पदवी स्पष्टयत्यस्य कृष्णा
निर्वाणं कृष्णवर्त्मन्युदयति वलते किं पुनः कृष्णतैव ॥५०॥
वेदो वेद न यस्य वर्त्म यमिनां चेतोऽपि नेतः परं
किञ्चिद् ध्यायाति कःप्रयाति तदपि प्रायः प्रयासेन यम् ।
स प्रादुर्भवितेह देहसहितो ध्यात्वेति धाता ददौ
कालिन्दी - कपटेन माथुरभुवे दामेदमैन्दीवरम् ॥५१॥
तालाङ्को[1] मयि मङ्क्ष्यति स्वयमहो देवो हरिर्मङ्क्ष्यति
प्रेमार्द्रा ससखी च मङ्क्ष्यति मुदा राधाप्यसाधारणी ।

अनुवाद - पापियोंसे दुष्प्राप्य सुन्दर मधुपुरीको भ्रान्तिसे अग्निने प्राप्त कर लिया। (वह इसे दग्ध करना चाहता था) किन्तु वह स्वयं तेजहीन हो गया (बुझ गया) बुझकर काले रङ्गके कोयलेके रूपमें अग्नि हो गया। और यमुना उसके संसर्गसे कृष्णा हो गई। अग्निने यमुनामें अपनेको मिला दिया तबसे ही मानों यमुना कृष्णवर्णा बन गई ॥५०॥

विशेष--यमुनाका कृष्ण-जल है अथवा कृष्णा नाम है, अतः कविने उत्प्रेक्षाकी है ॥५०॥

अनुवाद—वेद भी जिनके मार्गको नहीं जान सकता, संयमीका चित्त भी इससे अधिक कुछ नहीं जान सकता, कुछ ध्यान करके भी बड़े प्रयाससे जिसको प्रायः नहीं समझा जा सकता वह ही यहाँ अपने देहके साथ प्रकट होगा, यही ध्यान करके ब्रह्माजीने कालिन्दीके बहाने मथुरा-भूमिके लिये यह नीलकमलकी माला समर्पणकी है ॥५१॥

विशेष --रसखानने ठीक ही लिखा है--

ब्रह्म मैं ढूँढ्यौ पुराणन वेदन।
भेद सुन्यौ नित चौगुने चायन॥

अर्थात् यह तो ब्रह्मकी भूमि है। ब्रह्माजीने कहा है—

अहो भाग्यमहोभाग्यं नन्दगोपव्रजौकसाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्।

व्रजवासी परब्रह्मके परममित्र हैं। यमुना नहीं, मानों ब्रह्मा द्वारा अर्पित नीलकमल है। (उत्प्रेक्षा) ॥५१॥

---

(१) तालाङ्को बलरामः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ध्यायन्तीति चिरं निवेद्य च पुरस्तातस्य चण्डद्युतेः
कालिन्दी किल मेदुरा मृग-मदैरद्यापि विद्योतते ।।५२।।
हित्वा हन्त हठेन कैटभ-रिपुः[1] कृत्वा महत्कैतवं
भेजे धाम तदेव नाम स निजं दत्वा रुजं भूयसीम् ।
कालिन्दी किल कालिमानमियता लेभे शुचं बिभ्रती
सार्द्धं खण्डितमण्डलैर्मधुपुरी वाम - भ्रुवां मण्डलैः ।।५३।।
वैदग्धीरस - रङ्गरूप - गतिगीश्चातुर्य्य - वर्य्याकुल—
श्रीमत्कोटिमनोभवे निज-भुवं प्राप्ते हठान्माधवे ।
शून्या वीक्ष्य दिशो दशैव सुदृशो वार्य्युज्ज्वलं प्रोज्जहुः
कालिन्दी-जलमिन्द्रनील शकल-श्यामं निकामं ततः ।।५४।।

अनुवाद—श्रीबलराम मुझमें स्नान करेंगे और श्रीकृष्ण भी स्नान करेंगे तथा प्रेमसे आर्द्र होकर सखियोंके साथ श्रीराधारानी भी मुझमें स्नान करेंगी, वे देरतक ध्यान भी करेंगी। इसलिये अपने पिता सूर्यके सम्मुख कलिन्द-कन्या मृगमदसे पूर्ण होकर आज भी प्रसन्न चित्त है ।।५२।।

विशेष—यमुनाको देखकर भगवान् कृष्ण अत्यन्त प्रसन्न होते थे—भागवतकारने लिखा है—

वृन्दावन गोवर्धनं यमुना पुलिनानि च ।
वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ।। (भा० १०)

अनुवाद—कैटभ दैत्यके हन्ता भगवान् कृष्ण बहुत बड़ा कपट करके हठपूर्वक मथुरा-नगरको छोड़कर सबको महादुःख देकर अपने पवित्र धामको चले गये। इस शोकसे सन्तप्त यमुनाका मुखमण्डल फीका पड़गया और कालिमाको प्राप्त हो गया (इसलिये श्रीयमुना श्यामा है)। गोपियोंके मुखमण्डल श्याम पड़े, साथही यमुनाका भी ।।५३।।

अनुवाद—रसिकोंके रस-रङ्गरूप गति-वाणी आदि चातुर्यवाली शोभासे युक्त करोड़ों कामदेवों जैसी कान्तिवाले श्रीकृष्ण भगवान्के हठ करके अपने धाममें चले जानेपर, सुन्दर नेत्रवाली स्त्रियाँ रुदन करने लगीं। उन्हें दश-दिशायें शून्य लगने लगीं, उनके अश्रुपातका उज्वल जल जब यमुनामें मिला तो यमुनाका जल नीला हो गया ।।५४।।

---

(१) विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः। (अ० को० १।१।२२)।
कैटभ नामक असुरको मारनेके कारण भगवान्को कैटभरिपु कहा है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्र च— माथुर विप्रवर्णनम्

रेजुर्द्विजाः क्षतरुजा भृशयायजूका[1]
भूकामपूरण भुवोऽखिल सिद्धिभूकाः।
ब्रह्मानुचिन्तन - निरन्तर - जागरूका
मूकायितद्विषदहं कृत - वावदूकाः[2] ॥५५॥

आप्रातः प्रभृति प्रतिक्षण पुराणेशान पौराणिक–
व्यासङ्गाः कृत-मज्जनादि मुरजिद्यागा विरागा गृहे।
त्रैलोक्य श्रुति - विश्रुत-श्रुति गणालङ्कार-झङ्कारतो
मूर्छन्मत्सरमूर्जितश्रि - मुखरीकुर्वन्ति सर्वं जगत् ॥५६॥

ऋगुच्चरण चातुरीचय - चमत्कृतैः कुत्रचित्
क्वचिद्यजुरुदीरिभिः क्वचन सामझङ्कारिभिः।

मथुराके ब्राह्मणोंका वर्णन

अनुवाद—और जहाँपर सब दुःख नष्ट किये हुए, यज्ञोंमें मन लगाने-वाले, पृथ्वीपर समस्त इच्छापूर्ण करनेवाले, सिद्धियोंको प्राप्त करनेवाले, ब्रह्म-चिन्तनमें रत, शत्रुओंकी अहङ्कारपूर्ण वाणीको शान्त करनेवाले सब ब्राह्मण प्रसन्न रहा करते थे ॥५५॥

विशेष—मथुराके ब्राह्मण याज्ञिक थे, उनकी कोई इच्छा नहीं थी और ये सभी सिद्ध मूर्ति थे, शत्रुओंको परास्त करनेमें निपुण एवं प्रसन्न चित्त थे ॥५५॥

अनुवाद—प्रातःकालसे लेकर प्रतिक्षण पुराण ज्ञानमें लीन रहते। पुराण प्रतिपादित कृत्योंमें संलग्न रहते थे। प्रातःस्नानादि क्रियासे निवृत्त होकर विष्णु भगवान्‌की प्रसन्नताके लिये यज्ञ करते थे। गृह-कार्यमें आसक्ति - शून्य थे। वैदिक ज्ञानमें तीनों लोकोंमें प्रसिद्ध थे। वेद मन्त्रोंके सस्वर पाठकी झङ्कारसे शोभा बढ़ानेवाले थे। मात्सर्य शून्य थे। उन्होंने अपने वैदुष्यसे संसारको चमत्कृत किया था ॥५६॥

विशेष—मथुराके ब्राह्मणोंके वैदुष्यकी प्रशंसा है, उनका सस्वर वेदपाठ और धार्मिक कृत्योंमें संलग्न रहकर संसारका ध्यान आकृष्ट करनेका भव्य-चित्रण है।

अनुवाद—कहींपर ऋग्वेदका पाठहो रहा है तो कहींपर यजुर्वेदके

---

(१) यायजूका—यज्+यङ्+अक्=बार-बार यज्ञानुष्ठान करनेवाला।
(२) वावदूकाः—मुखर (पुनः पुनरतिशयेन वा वदति। वद+यङ्लुक् द्वित्वम् वावद+ऊकम्)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथर्व गुण गर्वितैः क्वचिदपूर्व मुर्वीसुरै-
रहो मधुपुरीमहो भुवि महोदयं गाहते ।।५७।।

अविरलतर होम-धूम-धोरणी[1] भिरूर्ध्वं प्रवाहिनीरिव वाहनीः सहस्रशाऽजस्रमश्रमेणवं सृजतोनिर्म्मितैकनिम्न प्रवाहिनोकस्य मण्डलं चण्डमहसोऽपि मलीमसयन्तो निरन्तरमियतैव मृगाङ्कशङ्काकुलित-चेतसोऽपि द्विजराजस्य मैत्रीमत्यर्थमुत्पादयन्तः, श्रवण-मनन-निदिध्या-सन-ध्यान-धारणा-समाधि साधारण योग-साधन-शम-दम-नियम-समा-पितकाम-क्रोध-लोभ-मोह-मद मत्सरा जिह्मेतरा[2] चार - भृतो ब्रह्माण इव ब्राह्मणा, ब्रह्म-साक्षात्कुर्वन्ति । तेषां पुनस्त एव, प्रतिनवजल-वाह पुञ्ज सञ्जुष्ट विनिविडतमास्तमाल भासोदिशो दशापि श्यामा-भिरामयन्तो, भूर्भुवःस्वः प्रमुख भुवन मूर्धानमनुस्पृशन्तो धूमाः सोमादि धाम वासिभिरन्यथैव वर्ण्यन्ते ।।५८।।

मन्त्रोंकी ध्वनि तो कहीं सामवेदका पाठ तो कहीं अथर्ववेदका पाठ होता था। वेदकी गरिमासे ब्राह्मणोंने मथुरा नगरके गौरवकी वृद्धिकी थी। मथुरा नगरका नाम जगत्‌में प्रसिद्धकर दिया था ।।५७।।

विशेष—कविके समय मथुरा नगरमें चारों वेदोंका विधिवत् अध्ययन अध्यापन होता था यह स्पष्ट है और पुराण-ज्ञानमें भी यहाँके ब्राह्मण अपना साम्य नहीं रखते थे यह भी स्पष्ट है ।।५७।।

अनुवाद—निरन्तर हवन धूमको धारण करनेवाली, ऊपरकी ओर बहनेवाली नदियोंको प्रवाहित करानेवाले और नीचे यमुनाको प्रवाहित करनेवाले श्रीसूर्यके तेजको यहाँके ब्राह्मणोंने मलिनकर दिया था। (अर्थात् वे सूर्यसे भी अधिक तेजस्वी थे)। (ब्राह्मणोंके यज्ञसे उठी धूम-धाराओंसे अनेक नदियां उत्पन्न हुईं थीं। किन्तु सूर्यसे यमुना बही तो धूमका सम्बन्ध सूर्यमें फिर यमुनामें उपनिबद्ध हुआ)। इससे ही मृगके लाञ्छनकी शङ्का करनेवाले चन्द्रमाके साथ सादृश्य उत्पादन करनेवाले इन मथुराके ब्राह्मणोंने—श्रवण, मनन निदिध्यासन, ध्यान, धारणा, समाधिके साधारण योगके साधन—शम, दम नियमोंसे काम-क्रोध और मद नष्टकर दिये थे। वे सरल आचार धारण करते थे और ब्रह्मके साक्षात्-

---

(१) धोरणी—धोर+अनि, धोरणि+ङीप् (परम्परा)।
(२) सरल (जिह्म=कुटिल, इतर=विपरीत)।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तथाहि—यज्ञवर्णनम्

दुर्वाराभून्महेन्द्रोपल-पटु-घटितोद्घाटिताम्भोधर-श्री-
निःश्रेणि - श्रेणिरेषानवरतमुदयद्धोम - धूमच्छलेन ।
अर्वागुर्वीसु[1]राणां मधुरमधु - पुरी वास भाजाममीषां
[2]जम्भार्य्यम्भोजयोनि[3]द्युमणि[4] मुखमहीमण्डलारोहणाय ॥५९॥
साङ्की कृत्याशुपङ्करुह - पतिमकरोत्कोकमस्तोकशोकं
कालिन्दीकृत्य गङ्गां स्वरपि सुरपतिं मन्दचेतीचकार ।
मूढी चक्रेऽलिचक्रं सुरतरु-सुमनो मूर्द्ध समृद्ध-वीचिः
श्यामोद्यद्धोम धूमः शिखिनमसुखयत्केवलं पूरिताशः ॥६०॥

कार करनेमें निपुण थे । ऐसे ब्राह्मणोंके द्वारा यज्ञ अग्निके "धूम"--नवीन जलको धारण करनेवाले मेघ समूहसे युक्त, तमालकी आभावाले, दस-दिशाओंमें श्याम आभाको विस्तीर्ण करनेवाले थे । और (वे यज्ञ धूम) भू भुवः स्वः आदि लोकोंके ऊर्ध्वभागका स्पर्श करते थे । चन्द्रादि लोकवासी उनका अन्यथा ही वर्णन करते हैं ॥५८॥

अनुवाद--निरन्तर उठते हुए होमके धूमके बहाने महेन्द्र-उपलसे मानों सुन्दर बनाई हुई, बादलोंके समान इस मधुपुरीमें निवास करनेवाले ब्राह्मणोंको इन्द्रलोक-ब्रह्मलोक सूर्यलोकपर चढ़नेके लिये बिना पंक्तिके ऊपर-नीचे उतार चढ़ाववाली ये सीढी बनी है ॥५९॥

विशेष- धूम नहीं है अपितु बिना डण्डेवाली नसेनी है । जिसपर चढ़कर किसी भी लोकमें जाना सरल है ॥५९॥

अनुवाद--उसी धूम लेखाने सूर्यको ढँक दिया फलतः रात्रिकी भ्रान्तिसे चकवा-चकवी अशान्त हो गये (रात्रिमें दोनों पृथक् रहते हैं) । स्वर्ग गङ्गा भी धूमसे काली हुई तो यमुनाकी भ्रान्तिसे स्वर्गने इन्द्रदेवको भी आलस्य-युक्त बना दिया वह धूम जब कल्पवृक्षके पुष्पोंके ऊपर पहुँचा तो भ्रमर समुदायको भी

---

(१) उर्वीसुरः —उर्वी पृथ्वी, सुर=देव=ब्राह्मण । ऊर्णौति ऊर्णूयते वेत्युर्वी ।
(२) जम्भारि=इन्द्रः—'जम्भभेदी हरिहय (अ० को० १।१।४३) ।
जम्भ नामक असुरका हन्ता ।
(३) अम्भोज योनि=ब्रह्मा "धाताब्जयोनिद्रुहिणो विरिञ्चिः कमलासनः ।" (अ० को० १।१।१७) ।
(४) द्युमणिः=सूर्यः । द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः । अ०को०१।३।३०)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अध्वरेण निरघा द्विजवर्य्यास्तन्निषेवण रसादपरेऽपि ।
इत्यनाकलित धाम तमोगाच्छून्य एव मख-धूम मिषेण ।।६१।।
रत्न - ज्योत्स्ना - चय-चकितयोः यत्र पुर्य्यां न सूर्य्यो
भेदायालं दिवस - निशयोर्न श्रिया पूर्णचन्द्रः ।
योषिल्लीला - ललितसरसी - मण्डले पद्मिनीनां
निद्रोन्निद्रे नियतमभितः शंसतो व्यक्तमेते ।।६२।।

मुग्धकर दिया (वे सोचने लगे कि ये भ्रमर कहाँसे आगये । दिशाओं में यज्ञ-धूम जब छागया तो मयूर प्रसन्न हो गये । क्योंकि उनको ऐसा लगाकि बादलोंकी घटा उमड़ती आरही है जो कि मयूरको प्रिय लगती है ।।६०।।

विशेष—अतिशयोक्ति अलङ्कार है। मयूरको घन देखकर प्रसन्नता होती है। "सारङ्गा घनगर्जितं वनगजा ध्यायन्ति रेवाजलम्" ।।६०।।

अनुवाद—'ब्राह्मण' यज्ञकेद्वारा निष्पाप होगये तथा यज्ञके धूमके सेवनसे अन्य मानव भी पाप-रहित होगये । इस प्रकार यज्ञके बहाने मानों बिना तेजका स्पर्श किये अज्ञानरूपी अन्धकार भी दूर होगया ।।६१।।

विशेष—यज्ञका धूम तेज इतना महत्वशाली है जिससे अन्धकार भी दूर हो गया। देखा जाय तो 'धूम' अंधकार ही है और अज्ञान भी अन्धकार तो है श्याम है, पर यज्ञके प्रभावसे अज्ञानके अंधकारका विनाश है। अन्यथा विरोधाभास है, यज्ञसे पाप दूर होता है । अन्धकार भी दूर हुआ है क्योंकि वह अज्ञानरूप बतलाया है ।।६१।।

अनुवाद—रत्नोंके प्रकाश समूहके कारण सूर्य और चन्द्रमा दोनोंही मथुरानगरीमें रात्री और दिनका भेद बतलानेमें समर्थ नहीं थे । रत्नोंके प्रकाशसे रात्री भी दिन प्रतीत होती थी, परन्तु स्त्रियोंको लीलासे सुन्दर-सरसीमें जो कमलिनी विकसित होतीं वे दिनमें मुकुलित होतीं उससे रात्रिका बोध होता था ।।६२।।

विशेष—मथुरा नगरकी समृद्धिका वर्णन है, अतिशयोक्ति अलङ्कार है, भ्रान्तिमान भी है । श्रीकृष्णके समयकी मथुराका वर्णन श्रीमद्भागवत पुराणमें है जिसके अनुसार इस नगरीमें सुवर्णके कपाट थे और हीरे, पन्ने, पुखराज, माणिककी कीलें जटित थीं—

ददर्श तां स्फाटिकतुङ्ग गोपुर।
द्वारांबृहद्धेम कपाट तोरणाम् ।। भा० १०।४१।२० ।।६२।।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

बद्धोपान्ताः कनकनिकरैः पद्मरागानविद्धै-
रिद्धैर्नाना मणिभिरधिकोन्नद्ध सोपान-वीथीः ।
वापी रम्भोरुह[1]-वलयिता यत्र हंसाः सवंशाः
संवीक्षन्ते हुतवह[2] धिया सन्निधौ न प्रयान्ति ॥६३॥
ग्रीवामम्भोरुह-दल-दृशां बीक्ष्य चारु-त्रिरेखा-
मेकावल्या समधिक-रुचिं शङ्खकारस्य हीणाः ।
स्वीकुर्वन्ति क्रकच-निकरैश्छेद-खेदं च शङ्खाः
को नामोच्चैः परिभवविधिर्जीवने साभिलाषः ॥६४॥
यस्यामिन्दीवरदल-दृशामङ्गभासाभिभूत-
ज्योतिर्ज्वालामपि हुतभुजः काञ्चनं साधुमेने ।

अनुवाद--स्वर्ण समूह एवं पद्म रागके द्वारा जिनके स्थल शोभित हैं, चमकती मणियोकी जिनमें सीढी बनी हुई हैं, कमलोंसे सुशोभित वापियोंको हंस देखते हैं, परन्तु अग्नि समझकर उनके पास नहीं जाते ॥६३॥

विशेष—भ्रान्तिमान अलङ्कार है । वापियोंका निर्माण रत्नजटित सुवर्ण खण्ड से है ॥६३॥

अनुवाद--कमलकेसे नेत्रवाली स्त्रियोंकी सुन्दर तीन रेखाओंसे भूषित तथा शङ्खोंकी एकावलीके समान अधिक शोभा देनेवाली ग्रीवाको देखकर शङ्खोंने लज्जाका अनुभव किया और शस्त्रके द्वारा अपने अङ्गमें छेद करानेके कष्टको भी स्वीकार कर लिया, अपने तिरस्कारको देखकर कौन जीवित रहना चाहता है ॥

विशेष--ग्रीवाकी सुन्दरताका वर्णन है । शङ्खोंने अंगमें छेद कराना चाहा है जिससे वे सुन्दर अङ्गके आभूषण बनें, दूसरे अपनी उपमावाले अङ्गमें वे अपने महत्वको उससे तुच्छ समझ रहे हैं ! 'कम्बुग्रीव' शङ्खसी ग्रीवा अच्छी मानी जाती है पर यहाँ तो शङ्खही ग्रीवासे पराजित है अतः व्यतिरेक अलङ्कार है ॥६४।

अनुवाद--जिस मथुरा नगरीमें नीलकमलके समान नेत्रवाली स्त्रियोंके

---

(१) अम्भोरुह--"विस प्रसून राजीव पुष्कराम्भोरुहाणि च" (अ०को० १।१०।४१) अम्भसि रोहत्यम्भोरुहम्=कमलम् ।

(२) हुतवह=अग्निः । "हिरण्यरेता हुतभुग् दहनो हव्यवाहनः" (अ०को०१।१।५५) हुतं वहतीति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अङ्गैराविधृतमपि सदा भूषणीकृत्य साधुः
प्राणान्मुञ्चत्यपि परिभवैः श्लाघते गौरवं न ।।६५।।

अहो-अचिन्तनीयाभिराम रामणीयक सम्पच्छालिनी हि मथुरावनी ।।६६

तथाहि—मथुरानगर-कुरङ्गी[1] नयना-भङ्गी न वाग्-विषया ।
[2]कमला-पतिमपि कुब्जा यत्र निरब्जालया स्मृतिं चक्रे ।।६७।

इति श्रीमन्मित्रमिश्र कृतावानन्दकन्द चम्पू काव्ये प्रथमोयमुल्लासः ।।१

अङ्गोंकी कान्तिसे सुवर्णकी महत्ता भी कम हो गई। फलतः स्वर्णने अग्निमें ज्वालाका आलिङ्गन करना ही उचित समझा। अर्थात् उनके अङ्गकी कान्तिसे तिरस्कृत होकर जलकर मर जाना ही उसने अच्छा समझा। अङ्गोंके द्वारा धारण किया हुआ होनेपर भी स्वयं आभूषण बनकर तिरस्कारके कारण 'सज्जन' व्यक्ति प्राणोंका त्यागकर देता है और अपने गौरवकी प्रशंसा नहीं करता है ।।६ ।।

विशेष--सज्जनके सम्बन्धमें यह सूक्ति है। सज्जन व्यक्ति अपमान कभी सहन नहीं करता, भले हो मृत्युका आलिङ्गन करना पड़े ।।६५।।

अनुवाद--आहा, अचिन्तनीय शोभासे अत्यन्त रमणीय सम्पत्तिसे मथुरा-की भूमि शोभित है ।।६६।।

अनुवाद—मथुरा नगरकी स्त्रियोंकी भाङ्गमाका वाणीसे वर्णन नहीं किया जा सकता, केवल कमलवासिनी कमलालक्ष्मी ही कमलापतिका स्मरण करती है परन्तु अब्जालया=(कमलवासिनी) न होते हुए भी कुब्जा=कूबरी कृष्णकी स्मृतिकर रही है ।।६७।।

विशेष--कुब्जा भगवान् कृष्णका ध्यान मथुरामें करती है। श्रीमद्भाग-वतमें वर्णन आता है कि इसका नाम त्रिवक्रा था, यह राजाकंसकी दासी थी और श्रीकृष्णने इसका कूब सीधाकर दिया था--

दास्यस्म्यहं सुन्दर कंस सम्मता। त्रिवक्रनामा ह्यनुलेप कर्मणि ।।
मद्भावितं भोजपतेरतिप्रियं। युवां बिना कोऽन्यतमस्तदर्हति ।।भा.१०।४२।३

इति सप्ताचार्य डा० श्रीवासुदेवकृष्ण चतुर्वेद शास्त्रि विरचिते श्री श्रीवरानन्दिनी
भाषा टीका सहिते श्री आनन्द कन्द चम्पू काव्ये
मथुरानगरमहिमावर्णनं नाम प्रथम उल्लासः।

---

(१) कुरङ्गी--कौरङ्गति, कौरङ्गोऽस्त्येतिवा कुरङ्ग+ङीप्+मृगी।
(२) कमलापतिम्=कृष्णम्। (कमला=लक्ष्मी तस्याः पतिम्)।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ द्वितीय उल्लासः

मथुराधिप कंसवर्णनम्

गर्वी दर्वीकर[1]पतिरिवाखर्व[2] दुर्वार वीर्य्यो–
यस्यासुर्वीपति कुलपतिर्मातुलो माधवस्य ।
भ्रूभङ्गेन त्वरितमजयत्कं स नेति प्रसिद्धे–
[3]रिद्धो नाम्ना जगतिकृतिभिर्गीयते यस्तु कंसः ॥ १ ॥

स खलु निखिलमेदिनी[4]पालमालाग्रणीरुग्रनीति-प्रतिनियत शासिताऽशेषदेशो नरपतिकुल-कुहना[5]नुबन्धी बल-बहल-मदान्धीकृत चेता,

---

अनुवाद—(उस मथुरा नगरीमें) सर्पराजकी तरह महा अभिमानी अत्यन्त असह्य पराक्रमवाला, भगवान् श्रीकृष्णका मामा (कंस) था। जिसने भ्रूभङ्ग मात्रमे तत्काल सबको जीत लिया था इस नाममात्रसे ही प्रसिद्ध जिसको लोग कंस नामसे कहते हैं ॥ १ ॥

अनुवाद—वह सब राजाओंकी गणनामें अग्रणी था। उग्रनीतिके आश्रय से सब देशोंपर शासन करनेवाला था। अधिक बलके मदसे अन्धे हृदयवाला था। कन्या विवाहके प्रेम-बन्धनमे राजा जरासन्धको भी अपने अधीनकर लिया था। (आशय यह है कि राजा जरासन्ध उसमे शक्तिमें अधिक था। किन्तु उसकी कन्या अस्ति-प्राप्ति नामकी कंसकी पत्नी थी। अतः सम्बन्धके कारण वह वशमें कर लिया था) जैसे अगस्तजीने चुल्लू भरकर समुद्रके जलका पानकर लिया था. वैसेही राजा कसने अपने भाईयोंकी सम्पत्तिका पानकर लिया था। यह अत्यन्त उग्र स्वभाववाला था। बिना क्षोभके राजाओंके अनेकों पक्षोंको तक्षण करनेमें तथा असि सदृश कठोर कर्ममें प्रख्यात था। इन्द्रकी भाँति शत्रुओंपर वज्र चलानेमें

---

(1) दर्वीकरः—सर्प । "दर्वीकरो दीर्घपृष्ठो दन्दशूकोबिलेशयः।" अ०को० १।८।८
दर्व्यकारः फण एव करो यस्य दर्वीकरः तस्य पतिः शेषः ।
(2) अखर्व=विशाल ।
(3) इद्धः—इन्ध+क्त=प्रकाशित ।
(4) मेदिनी=पृथिवी ।
(5) कुहना—(कुह+यु+टाप्) =दंभ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुहितृपरिणयादि प्रणयानुबन्ध बन्धीकृत जरासन्धो, बन्धोरपि सकल सम्पदं, सिन्धोरिव [1]कूम्भभूरहह महाप्रचण्डशीलो गण्डूषीकृत-वानवार[2] एव, अक्षोभ-क्षिति धवलक्ष, पक्ष तक्षण - कौक्षेयक - कर्म्म-प्रख्यात जम्भाराति - कराम्भोरुह दम्भारम्भिदम्भोलि[3]-निष्ठुर-सुर-मुनि-मनुजैकहिंसा नैष्ठिक चाणूर-मुष्टिक प्रभृति महामल्ल गोष्ठी-गरिष्ठो, भूयिष्ठोद्धतबक - पूतना - प्रलम्ब-धेनुक-तृणावर्त्त-दुर्वृत्ताघ-दुर्मद-द्विविदबलो - मुख प्रमुख महाबलोयो, बल-वेष्टितोऽविरतमहा-मदान्ध-गन्धसिन्धुर-प्रकराग्रणी महामदबलकुवलयापीड दुष्करापीड पुरा-धिष्ठितो मनसि न मेने कमप्येव ॥ २ ॥

कंस मृगया वर्णनम्

चलति सति कदाचिदाखेटक - खेलाय सखेल कण्ठीरवलील-गमन शीले यस्मिन्नतिगरिम तिरोहित गभीराम्भोधि-भीम-ध्वनिभर-गभीर-

---

निपुण था। देवता-मुनि तथा मनुष्योंकी हिंसामें तत्पर था। चाणूर, मुष्टिक आदि महा-मल्लोंसे युक्त होनेके कारण दुर्जेय था। अत्यन्त उद्धत बकासुर, पूतना, प्रलम्बासुर, धेनुकासुर तृणावर्त्त, दुर्वृत्त अघासुर, दुमद द्विविद, बलीमुखादि महा बलवानोंके बलसे युक्त था और निरन्तर महा मदान्ध गन्ध गज समूहमें अग्रणी महामदयुक्त बलवाले कुवलयापीड आदिसे सुरक्षित स्थानपर निवास करनेवाला वह कंस किसीको भी मनमें कुछ नहीं समझता था ॥२॥

विशेष—कंसकी बल-शीलताका बर्णन है, और उसके परिकरका वर्णन है जिसमें—चाणूर, मुष्टिक, शल तोषल आदि मल्ल हैं और कुवलयापीड नामक हाथी है, द्विविद एक वानर है यह श्रीरामावतारमें भी था। बलीमुख भी वानर था। कंसका सामना करनेवाला केवल जरासन्ध था वह कंसका श्वसुर था अतः कस देव, दनुज, मनुज किसीको भी अपने सामने बलशाली नहीं समझता था ॥ २ ॥

अनुवाद—राजा कस जब मृगया (शिकार) खेलने चलता था तब क्रीडापूर्वक सिंह जैसी चाल चलता था। अत्यन्त गरिमासे गम्भीर समुद्रकी भयंकर

---

(1) कुम्भभू—अगस्त्यः।
(2) अवार एव—नवार्यते जलेन वृ+घञ्
(3) दम्भोलि=वज्र।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भेरी-भयङ्कर-भाङ्कार-दुन्दुभि निवह-[1]दुन्दुङ्कार-प्रचण्डतरढक्काढकार पटुचण्डिम डिण्डिमाडम्बर-प्रकरकटु-झर्झर-झल्लक-झिङ्कार प्रकटतरा-हङ्कारभट-हुंकार गर्भगुरु-चाप-टङ्कार-घटोद्घाटित खण्ड ब्रह्माण्डभित्ति [2]परिणाहम्, प्रचलित मलय हिमालयमेरु-कैलास मन्दरविन्ध्य-सह्य-दर्दुर प्रभृति पूर्वा-पर—दक्षिणोत्तर—धरणिधर—दिग् दिगन्तर—दन्तावल प्रकर—प्रलय घन-घटायमानस्फुटकरटीन्द्र—कोटिकमठ—कठोर—कुम्भ—कूटकोटि-प्रकटित-मद-जलवाहिनी पूरितावनो वलयम्, अविरलहय-निवह सावहेल—हेषा—व्यतिकरसाटोपचाप—टङ्कार — भार मुखरित दिगाभोग—नभोभर—भूगोल—गोलोक मुखास्तोक—लोक—चक्रम्, गिरि—गुरुगजराज राजिव्रज-व्रजदति विततरथौघदुर्वहानोगणस्फुट-परिपुष्ट-

ध्वनिको तिरोहित करनेवाली गम्भीर भेरीकी भयङ्कर भांकार तथा दुन्दुभि समूहकी दुन्दुङ्कार तथा प्रचण्डतर ढक्काकी ढंकारको भी उसकी गर्जनाको पीछे छोड़ देती थी। पटु और उग्र डिण्डिम जैसे उग्रवाद्य समूह तथा झर्झर झल्लकीको झङ्कारसे प्रकट होनेवाला योद्धाओंकी अहङ्कार हुङ्कार होनेसे गम्भीर धनुषोंकी टङ्कारसे अखण्ड ब्रह्माण्डको भित्तियोंका विस्तार भी जिसकी ध्वनिसे फट जाता था। हिमालय, सुमेरु, कैलास, मन्दर, विन्ध्य, सह्य, दर्दुर आदि पूर्व, पश्चिम, दक्षिण, उत्तरके पर्वत मद जलकी धारारूपी नदीसे व्याप्त हो गये जो दिशाओंके हाथियोंकी प्रलय घन-घटाके समान प्रत्यक्ष हो मत्तगज समूह तथा कमठके समान कठोर अनेकों कुम्भोंसे प्रकटित हुई थीं। अश्व निर्भीकतासे हिनहिनाते उनके आरोपके साथ धनुषकी टङ्कार भारसे दिङ् मण्डलके मुखरित होनेसे सम्पूर्ण आकाश, भूगोल गोलोक आदि सब लोकचक्र व्याप्त हो गये थे। पर्वतसे बड़े-बड़े गजराजोंके चलते हुए तथा अत्यन्त विशाल रथ समुदाय एवं दुर्वह शकट समूह तथा प्रत्यक्ष पुष्ट-दुष्ट स्थूल उष्ट्र समूह इनसे युक्त उद्भट योद्धा उससे विकट उत्कट अत्यन्त भार उससे झुकानेवाला तथा नम्र करानेवाला जो पृथिवीका दुर्वह भार उससे शेषनागजीका गौरव नष्ट हो गया, कूर्मकुल श्रेष्ठ कच्छपजी भयसे चकित हुए आँख डबडबाने लगे, मानों अपनी रक्षा करनेको अपनी ग्रीवाको शरीरमें छिपा लेते हैं ॥ ३ ॥

विशेष—कसके उद्धत पराक्रम वर्णनकी शृङ्खलामें यह उसके अनुरूप

(1) दुन्दुङ्कार=दुन्दुभी।
(2) परि+नह+घञ्,=परिधि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुष्ट-पीवरोष्ट्र-कुल भूयिष्ठोद्भट भट-विकटतरोत्कट-भूरिभार-भुग्न-मिव दानमदुर्बोदुर्वह-दुर्वार-भर-व्यग्रीकृत दर्वीकरपति-गरिम विखर्वीकृत गर्वतया कूर्म्म-कुल सार्वभौमो, भयचकित निमीलित नयनो, गोपायितु मिव निजवपुरन्तर्दधे स्व-मूर्द्धानम् ।। ३ ।।

द्वीपानद्रीन्समुद्रान्द्रुममनुजनदी दिग्गजान् बिभ्रदेकं
भूचक्रं चक्रिराजस्तदपि तमसकौ[1] कूर्म्मभू सार्वभौमः ।
कंसे विश्वावतंसे प्रचलति चलति द्राकि[2] कथञ्चित्रमेतद्
यस्माद् विश्वम्भरोभूत्फणिपति[3] शयने सोऽपि निद्रादरिद्रः ।। ४ ।।

वर्णन है। वाद्योंकी ध्वनि, घोड़े आदिकी ध्वनिका सजीव वर्णन है. सेनाके भारसे पृथिवी ही नहीं झुकी अपितु शेषजी भी झुक गये और कच्छप जो शेषको भी धारण करते हैं अपनी ग्रीवाको शरीरमें भीतर ले गये। कच्छपका यह स्वभाव है वह जब भयाक्रान्त होता है तो अपनी लम्बी गर्दनको शरीरके भीतर ले जाता है अतिशयोक्तिका वर्णन है।। ३ ।।

अनुवाद—द्वीप, पर्वत, समुद्र, वृक्ष, मनुष्य, नदी, दिग्गज आदिको पृथ्वीचक्रने धारण किया है तथा पृथ्वीको शेषनागने धारण किया है, शेषजीको पृथ्वीपर प्रसिद्ध कूर्मराजने धारण किया है किन्तु विश्वभूषण राजा कंसके चलने-पर यह कैसी विचित्रता है कि ये सब तो कम्पित होते हैं साथ ही 'विश्वम्भर-भगवान्' शेषनाग पर शयन नहीं कर सकते, क्योंकि जब शेषजी हिलते हैं तो उन्हें निद्रा नहीं आती ।। ४ ।।

विशेष--कविने भगवान्को निद्रा दरिद्र बना दिया है। प्रभु सबका पालन-पोषण करते हैं पर उन्हींके आशीषसे उद्धत वर प्राप्त कंस जब सबको पीडित करता है तो शेषजीका पीडित होना स्वाभाविक है और जब शेषजी स्वयं कम्पित हैं तो उनपर शयन करनेवाले भगवान्की निद्राका भङ्ग होना स्वाभाविक ही है। उत्प्रेक्षालङ्कार है। सुन्दर कल्पना है ।। ४ ।।

---

(1) तम्+असच्
(2) द्रा+कु=शीघ्र (अव्यय)
(3) शेषः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कंसप्रताप वर्णनम्

यस्य कृते खलु दिशि दिशि द्वीपे द्वीपे पुरि पुरि गेहे गेहे पथि पथि द्वारे द्वारे नरि नरि चिन्ता सन्ताप कारिणो ववृधे ॥ ५ ॥

किमपरमहो प्रातः पूर्वाह्न-मध्याह्न-पराण्ह-संध्या-यामिनीष्वपि वर्णानामकर्णाकर्णिकमेकक्षणोऽपि न ययौ ॥ ६ ॥

न हि खलु केवल मुनिमनुज गणानां मनोऽनुतापदीपनाय स्नेह इवासीदपि तु सुराणामपि सुराणां भूसार्वभौमस्य ॥ ७ ॥

श्रीकृष्णावतारोपक्रमः

तथा हि—

स्वयञ्जम्भाराति प्रभृति सुरसम्भारगमना—
गमारम्भैरम्भो-निधिरयमसम्भूतविरतिः ।

कंस प्रताप वर्णन

अनुवाद—इस कारण दिशा-दिशाओंमें, द्वीप-द्वीपमें, नगर-नगरमें घर-घरमें द्वार-द्वारपर मनुष्य-मनुष्यमें दुःख देनेवाली चिन्ता बढ़ने लगी ॥ ५ ॥

अनुवाद—अधिक क्या ? प्रातः पूर्वाह्न, मध्याह्न, अपराह्न कालमें तथा सायंकालके समय और रात्रीमें भी यही चर्चा कानमें पड़ती थी । एकक्षण भी तो ऐसा नहीं जिसमें इस नृपतिकी चर्चा न हो ॥ ६ ॥

अनुवाद—केवल मुनियों अथवा मनुष्योंका ही मन, दुःखरूपी दीपक जलानेको तेलकी तरह नहीं था, देवदेवोंका मन भी उस पृथ्वीके ईश्वर कंससे भयभीत था ॥ ७ ॥

विशेष—सब समय लोगोंमें एकही चर्चा रहती अब कंसने क्या किया किसे मारा या पटका और अब किस लोकमें गया या किसके साथ उसका द्वन्द्व चल रहा है । अतः देवाधिदेव भी उसके भयके कारण चिन्तित रहते थे भागवत-में भी वर्णन आता है कि पृथ्वीपर जब घोर अत्याचार बढ़गये तब वह गौका रूप धारणकर ब्रह्माजीकी शरणमें गई थी और अपना वृत्तान्त सुनाया था तथा कंसके अत्याचारोंकी चर्चाकी थी—

भूमिर्दृप्तनृपव्याज दैत्यानीकशतायुतैः ।
आक्रान्ता भूरेभारेण ब्रह्माणं शरणं ययुः ॥ भा० १०।१ ।

श्रीकृष्णावतारोपक्रम

अनुवाद—स्वयं इन्द्रादि देवोंके आने-जानेसे समुद्र स्थिर नहीं रहता था

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न तेषामास्येषु स्तुतिविरतिरासीत्क्षणमहो
समीपे शेषाङ्कोपरिशयितपङ्केरुहदृशः[1] ॥ ८ ॥

किमपरं यस्य कृतेऽति बहलवर्द्धमान - मुग्ध - दुग्धवीचीनिचयानीचीकृतसमीचीना प्राचीन प्रचुरतरान्तरोदञ्चदतिमन्द्रसान्द्र-मधुर-ध्वनि-धोरणी मधुरिपुधामनीह दुग्ध-नीरधौ कुसुमसुकुमार चामर-ग्राहिणीनाम् मृदुकर-कोमल कमल-विचालितचारु-चामरोच्चयमसृण समीरण-सेवितोऽपि वदनविजितेन्दु सिन्धु-नन्दिनी कराम्बुज संवाह्यमानचरणाम्बुजोऽपि मलयज विस्तर कस्तूरिकानिकर-निवेशचारुवेष-सुललित मालती-निर्विशेष निःशेष सुरभीकृतशेषभोग-पर्यङ्कनिःशङ्क-शयितोऽपि स्तुतिमुखराननचतुरानन - पाकशासन[2]-शमन[3] हुताशन[4] प्रभृति गीर्वाण-गीर्वाहिनी बहलकालाहलकौशलादचिरेणैव जातजागरो दरकुञ्चित वक्रीकृत लोचनाञ्चलवक्रीकृत मन्दोन्नत भ्रूलतम्, मणि-मयकुण्डल-मण्डल परिपीडितांस-फलकम्, अलक-कुलाकुलालिकम्, आमोटित[5] मृदुल-कलेवरम्, अतिशिथिलीकृत वचन मनोहर-लघु लघु-

---

देवोंके मुखपर स्तुति-पाठ अनवरत चलता था। शेषनागकी शय्यापर विश्वात्मा भगवान् कमलनयन शयनकर रहे थे ॥ ८ ॥

अनुवाद—जिनके लिये, अत्यन्त बढ़ती हुई दुग्धकी तरङ्ग समूहसे बढ़ी हुई सुन्दर, नवीन, बीच-बीचमें उठती हुई अत्यन्त चिकनी मधुर ध्वनि देवगणकर रहे थे, मधुरिपु भगवान् जब क्षीरसागरमें शयनकर रहे थे तब—कुसुमके सदृश सुकुमार चामर ग्राहिणियोंके कोमल करकमल द्वारा चलाये हुए, सुन्दर चंवरकी सुन्दर मन्द पवनसे सेवित थे, और अपने मुखद्वारा चन्द्रमाको भी जीतनेवाली श्रीलक्ष्मीजीके हस्तकमलसे उनके पैर दवाये जा रहे थे। चन्दन चर्चित कस्तूरी चूर्णके संसर्गसे सुन्दर वेषवाली, सुललित मालती सदृश गन्धसे सम्पूर्ण सुगन्धित शेष शैय्यापर प्रभु निःशङ्क शयनकर रहे थे उस समय ब्रह्मा, इन्द्र, यम, अग्नि

---

(1) कृष्णावतारोपक्रमकथा भा० १० स्कं १–२ अध्याययोर्वर्त्तते।
(2) इन्द्रः
(3) यमः
(4) अग्नि
(5) आ+मुट+ल्युट्। कुचलना

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जृम्भारम्भ सम्भासितार्ध वदनाम्भोज - मधुरम्, आलोकयन्नभितः सविस्मय इव नारायणः समुत्तस्थौ ॥ ९ ॥

वचनमवकलय्य च देवतानामजानन्निव ससंभ्रम-भ्रमित-भ्रू वि-भ्रममाधूनयामास मूर्द्धानम्, प्रतीकारोपायमपि सहायान्तरमपि चिन्त-यामास माधवः श्रीमान्; समुचितमेव सहायान्तर चिन्तनं मह-तोऽपि ॥१०॥

तथा हि—

अधिगच्छतु को लक्ष्यं गुणप्रौढोऽपि सायकः ।
सहायः स्यान्नचेदेको धनुर्द्धरधुरन्धरः ॥११॥

आदि देव जो स्तुति करनेमें निपुण थे स्तुतिके शब्द करने लगे तो उसके कोला-हलसे भगवान्‌की निद्रा भङ्ग हुई और वे तिरछी चितवनसे, टेढी भ्रूलता करके, मणिमय कुण्डलोंसे व्याप्त स्कन्धवाले, केश समूहसे भरे मस्तकवाले, कोमल शरीरसे अङ्गड़ाई लेते हुए, अत्यन्त हलके वचन होनेके कारण तथा सुन्दर हलकी जंभाई लेनेके कारण आधे खुले मुख-कमलवाले, मधुर आश्चर्यके साथ चारों ओर देखते हुएकी तरह नारायण भगवान् उठ बैठे ॥ ९ ॥

अनुवाद—श्रीवैकुण्ठनाथ भगवान्‌ने देवोंकी स्तुतिके वचनोंपर विचार किया और विलासपूर्वक घूमे और भृकुटियोंको घुमाया तथा गर्दन हिलाई। प्रतीकारके उपायको अन्य सहायकको भी भगवान्‌ने विचार किया। सचमुच बड़ोंको भी दूसरे सहायकको सोचना ही पड़ता है ॥१०॥

विशेष—भगवान् क्षीर समुद्रशायी हैं। भागवतकारने भी सब देव क्षीर-सागरमें भेजे हैं। भागवतमें भी देवस्तुति है--वहाँ देवोंने पुरुषसूक्तसे स्तुतिकी है। पुरुषसूक्त ऋग्वेदमें है जिसका प्रथम मन्त्र यह है--

सहस्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात् ।
स भूमिं विश्वतस्पृत्वात्यतिष्ठद्दशांगुलम् ॥

विष्णु भगवान्‌ने ब्रह्माजीको अपना रहस्य बतला दिया। ब्रह्माने समस्त देवोंको आज्ञा दी कि आप लोग व्रजमें मथुरामें यादवों एवं गोपोंके घरोंमें जन्म ग्रहण करो ॥१०॥

अनुवाद—प्रत्यंचासे युक्त भी कोई बाण लक्ष्यका वेध नहीं कर सकता जब तक धुरन्धर धनुर्धारी सहायक न हो ॥११॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वसुदेववर्णनम्

अगणित दिन-यामिनीक नारायणसेवा - परायणः प्रल्हाद इव, अनुगतपरिपालनैकनिष्ठो युधिष्ठिर इव, प्रतिनियतमजात-प्रतिज्ञाभङ्गो गाङ्गेय[1] इव, निरवधि समधिकसावधानतया पितुरनुशासनैकसेवने निपुणो राम इवाविरतपरमार्थभावभागी, विभाण्डक-कुल-मण्डनो भगवानृष्यश्रृङ्ग इवानवरतमवार्यधैर्यशीलो, जलधिरिव गाम्भीर्य्यवितरण-शौर्य-प्राचुर्य्यैकपदम्, अचल इवजगदुपरिमहास्थैर्यैक साम्राज्यभूः कर्ण इव जगदाश्चर्य्यौदार्यैकनिधिः, दधीचिरिव प्रतिनियतमपर्याप्तमर्यादिक कन्दो, हरिश्चन्द्र इवातिथिजनप्रतिपालनैकतत्परः, स्वतनुज मधुसूदन प्रतिमो, यदुवंशकेसरी जगदवतंसो[2], नियतमदूर-महानुभाव-महनीय-शूरसेनान्महा जलधेरिव कल्पमहीरुहो[3], हृदि संवासित वासुदेव-[चरण] द्वयी धर्म्मवत्तया वसुदेवो नाम तत्र प्रादुरासीत् ।।१२।।

विशेष--यद्यपि बाण ही लक्ष्यका वेध करता है तथापि धनुर्धारीके अभावमें वह किसीको मारनेमें या भेदनमें समर्थ नहीं हो सकता। भगवान् भी किसीका उपकार या अपकार करते हैं, निमित्त बनाते हैं—गीतामें जब कौरवोंके विनाशकी बात आई तो उन्होंने स्पष्ट कह दिया कि ये सब मेरे द्वारा मरे हुए ही समझो तुम केवल निमित्त हो जाओ–"निमित्तमात्रं भव सव्यसाचिन्।" (गीता)

सर्व समर्थ होते हुए भी ईश्वर किसी न किसी व्यक्ति विशेषका अवलम्ब लेकर अपनी कथा वस्तुको आगे बढाते हैं ।।११।।

वसुदेव वर्णन

अनुवाद—दिन-रात नारायणकी सेवामें संलग्न प्रह्लादकी भाँति, सर्वदा सावधानीपूर्वक पितृ आज्ञा-पालक रामकी भाँति निरन्तर परमार्थ भावमें लगे रहनेवाले विभाण्डक कुलभूषण अटूट धैर्यधारी भगवान् ऋष्यश्रृङ्गकी भाँति, गंभीरतामें सर्वोत्कृष्ट शूर समुद्रकी भाँति, जगत्में अत्यन्त स्थिरताका साम्राज्य स्थापित करनेवाले पर्वतकी भाँति, संसारमें आश्चर्यपूर्वक उदारताके निधि कर्ण की भाँति, निश्चयपूर्वक उच्च-मर्यादाके संस्थापक दधीचिकी भाँति, अतिथिजन

---

(1) भीष्मः।
(2) अवतंसः=भूषणः।
(3) कल्पवृक्षः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स खलु सकलानुरञ्जनैक - शीलसीमा परमवशीकृत निखिल-मनीषी परिणतरमणीयशीत किरण[1] इव निज-कुल-कुमुदानि मोदयन् शुशुभे ॥१३॥

वसुदेव विवाहवर्णनम्

गुणगरिम-महिम-निकामधामतया निरवद्यशुद्धकुलीनतया परम-विचार-चातुरीधुरीणो धरणिपतिरुग्रसेनः सबहुमानपुरःसरं दुहितरं नाम देवकीमदात्तस्मै ॥१४॥

सेवक हरिश्चन्द्रकी भाँति अपने पुत्र मधुसूदनके समान प्रतिभावाले यदुवंश केसरी संसारके भूषण महाजलधिसे उत्पन्न कल्पवृक्षकी तरह अत्यन्त प्रशंसनीय महानुभाव शूरसेनसे उत्पन्न हृदय, धर्मबुद्धिकी भावनावाले भगवान् कृष्णके चरणद्वय स्थापित करनेवाले वसुदेव वहाँ उत्पन्न हुए ॥१२॥

अनुवाद—वे सबको अत्यन्त प्रसन्न करनेवाले, सभी विद्वानोंको अपने सरल स्वभावसे वशमें करनेमें समर्थ थे मानों शीत किरणवाला चन्द्रमा ही इस रूपमें आकर कुमुद समूहको प्रसन्नकर रहा हो, उसी तरह अपने कुलको प्रसन्न करते हुए शोभित होते थे ॥१३॥

वसुदेव विवाह वर्णन

अनुवाद--अत्यन्त गुणी होनेके कारण और तेजस्वी होनेके कारण साथ ही इनका कुल निष्कलंक था इसलिये परम विचारक एवं चतुर राजा उग्रसेनने बड़े आदरपूर्वक अपनी कन्याका विवाह वसुदेवके साथकर दिया था ॥१४॥

विशेष—श्रीमद्भागवत पुराणके अनुसार देवक राजाकी कन्याका नाम देवकी था। इसका पालन पुत्रीवत् करनेके कारण इसे उग्रसेनकी कन्या समझा जाता था। श्रीवसुदेवके पिता भी इसी भूमिके पास (आजकल जिसे बटेश्वर कहते हैं।) नृपति थे। इनके पिताका नाम शूर था और यह देश शूरसेन देशके नामसे विख्यात था। वसुदेवका द्वितीय नाम आनकदुन्दुभी था--क्योंकि इनके जन्मके समय आकाशमें आनन्द और दुन्दुभी नामके वाद्य बजे थे। विवाहके समय देवकी अवस्थामें वसुदेवसे बहुत छोटी थी क्योंकि उनका यह आठवाँ विवाह था ॥१४॥

---

(1) चन्द्रः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स खलु तया गुणनिकर-निधानया विहिताखिल भाविकविधानया निखिल-प्रकृति-गण समुचित-शुश्रूषण-सावधानयाऽप्रतिरूपरूपस्तूपया त्रिभुवनकमनीयसुकोमल शोलया तुलितनिःसीमकलाकौशलया, महा-वैदिक मन्त्रोपनीतहविराहुत्येव हुताशनः[1], सुवितत सुकृतकृतार्थो कृता-खिल-कार्तिक राकयेव नायको निशायाः, शरदुपचितप्रभातवेलयेव पद्मिनीरमणः[2], सुविततगुणघोषया निर्दोषया कवितयेव सारस्वत प्रपञ्चः, कञ्चनकान्तिकलापमवाप ।।१५।।

आकाशवाणी

कंसः पुनरनुरागभागपि तयोरुपायनीकृत-तपनीयो[3]पकरणरमणीय-परभाग-नाग[4]तुरग-रथयानवाहिनीगणबहुगुणभासमान समानाभरण-

---

अनुवाद—देवकी अनेक गुणोंसे युक्त थी, भव्य विधानों को जाननेवाली थी। समस्त प्रजाकी उचित सेवामें सावधान थी और अद्वितीय रूपसे सम्पन्न थी; यहाँ तक कि तीनों लोकोंमें वह श्रेष्ठ सुन्दरी थी, कोमल स्वभाव वाली थी साथ ही अनेक कलाओंमें निपुण थो। उस देवकीको प्राप्तकर श्रीवसुदेवकी शोभा ऐसी हुई जैसे वैदिक मन्त्रोंके द्वारा डाली गई आहुतिसे अग्निको शोभा होती है अथवा बड़े-बड़े पुण्योंके द्वारा कार्तिकी पूर्णिमासे कृतार्थ किये हुए चन्द्रमाकी शरद ऋतुकी प्रभातवेलासे शोभित सूर्यकी, कविताके द्वारा सरस्वतीके प्रवाह रूप काव्यकी शोभा होती है, वैसेही अनेक गुणवाली निर्दोष देवकीसे वसुदेवकी शोभा हुई ।।१५

आकाशवाणी

अनुवाद—देवकीसे कंस अधिक स्नेह करता था, जब इनको भेंट आदि दे दीगई जिसमें सुवर्णके अनेक अलङ्कार थे, हाथी, घोड़े, सेना समूह तथा अनेक गुणवाले चमकते हुए सुन्दर साज सामान दास-दासी भी थीं। इन्हें लेकर देवकी वसुदेव चलनेको उद्यत ही हुये थे, उसी समय आकाशवाणी हुई कि 'कंस ! इस भगिनका पुत्र ही तुम्हारा विनाश करेगा।' इसे सुनते ही अत्यन्त दुःखित होकर बहिनको मार देना चाहिये ऐसा निश्चय करके कंसने मारनेका बार-बार उद्योग किया क्योंकि किसीकी सामर्थ्य उसे ऐसा करनेसे रोक नहीं सकती थी ।।१६।।

---

(1) अग्निः ।
(2) सूर्यः ।
(3) सुवर्णम्—तप+अनीयर् ।
(4) गजः ।

विलासी भवदसीम दासी दास-राशिरपि स्वविनाशि भगिनेयभावि-नीत्यकस्मादाकाशवाणीप्रणीतकर्णज्वरनीतितया विमनीभूय भृशमभि-दूयमानो भगिनी हननीयेति निर्णीय दुर्निवारो वारं वारं महोद्यमं व्यतानीत ॥१६॥

कंसाद् देवकी रक्षणम्

अथ कथमपि बुद्धिकौशल बहुविधसामाचरणतया भाविनोऽर्थ-स्यावश्यम्भावितयोत्पत्तिसम-समय-समस्तापत्यार्पणैकनियमतया च मद-

---

विशेष—भागवतमें आता है कि—आकाशवाणीने यह सुनाया कि इसका आठवां गर्भ तेरा काल होगा—

> अस्यास्त्वामष्टमोगर्भो हन्तायां वहसेऽबुध,
> इत्युक्तः सखलापापो भोजानां कुलपांसनः।
> भगिनीं हन्तुमारब्धः खड्गपाणिः कचेऽग्रहीत् ॥ भा० १०।१

भागवतमें कन्याको सत्कारकर दिये गये दानका भी उल्लेख है ४०० हाथी थे, २०० दासी थी, १२०० रथ, १५०० घोड़े—

> अश्वानामयुतं सार्धं रथानां च द्विषट् शतम्।
> चतुःशतं पारिबर्हं गजानां हेम - मालिनां।
> दासीनां सुकुमारीणां द्वे शते समलंकृते।
> दुहित्रे देवकः प्रादाद् याने दुहितृवत्सलः॥ भा० १०।१

कंससे देवकीको रक्षा

अनुवाद--तदुपरान्त वसुदेवजीने बड़ी चतुरतासे और अपने शान्त आचरणसे, 'होनहार होकर ही रहती है' यह समझाते हुए प्रतिज्ञा करके—कि इस देवकीके गर्भसे उत्पन्न सभी सन्तानोंको जन्म लेते ही अर्पणकर दूँगा—विश्वास दिलाया तथा (देवकीको) मदमत्त गजके दाँतसे पद्मिनीकी तरह, जलती हुई अग्निकी लपटके बीचमें पड़ी हुई हव्यकी आहुतिकी तरह, कुपित यमराजके मुख-रूपी गुहाकी तरह अत्यन्त धैर्यका नाश करनेवाले उस कंससे वसुदेवने देवकीको छुड़ाया ॥१७॥

विशेष--श्रीमद्भागवतमें वसुदेवने चार प्रकारकी नीतियोंका स्मरण किया और निर्णय किया कि साम, दान, दण्ड, भेदमें से या तो इस समय भेद-नीति उपयुक्त है या साम क्योंकि न तो मैं दण्ड देनेमें समर्थ हूं और न दान देनेमें

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कल-दन्तावल[1] दन्तादिव पद्मिनीम्, ज्वलदनलशिखान्तरालसम्भृतामिव हव्याहुतिम्, सुचिरस्वपोषितकण्ठीरव कण्ठा दिव बालमृगीम्, कुपित-कृतान्तानन-गह्वरादिव निर्भरजनित - धैर्य्य - ध्वंसादपि कंसाद्वसुदेवो देवकीमावर्त्तयामास ॥१७॥

श्रीकृष्णभ्रातृणांवर्णनम्

अथ समयक्रमेण यथा [2]स्वीकारमर्पयामासषडेव शावकान्देवक-दयितः ॥१८॥

अहो त्रिजगदगोचरैव देवकीमाया, यदनायासेन देवकीगर्भात् सप्त-मगर्भाविर्भूतभूधात्रीधरण धुरन्धरा - चिन्त्यानन्तमहिमानन्तोऽनन्तसी-मन्तिनीसीमन्तमणिरमणीयतातिरोहि[3]णीरोहिणीकरोहिणीरमण[4] सुख-रोहिणीगर्भमध्युवास ॥१९॥

ही सक्षम हूं. अतः सामका ही अवलम्बन लिया और कंसको शान्त किया थ ॥ वसुदेवने विचार किया कि जब तक मनुष्यमें बुद्धि और बल हो अवश्य मृत्युका निवारण करना चाहिये यदि निवृत्त न हो तो मनुष्यका कोई दोष नहीं है—

मृत्युर्बुद्धिमताऽपोह्यो यावद् बुद्धिबलादयम् ।
यद्यसौ न न्यवर्तेत नापराधोऽस्ति देहिनः ॥ भा० १०।१।४८

श्रीकृष्णके भाईयोंका वर्णन

अनुवाद--इसके पश्चात् कंसने जब देवकीको छोड़ दिया तो कालान्तर में छः बालक वसुदेवजीने कंसको समर्पित किये ॥१८॥

अनुवाद--अहो देवकीकी माया तीनों लोकोंसे अगोचर है जो अनायास ही देवकीके सातवें गर्भसे पृथिवीरूप धात्रीके धारण करनेमें धुरन्धर अचिन्त्य और अनन्त महिमावाले अनन्त भगवान्, अनन्त सीमन्तिनियों (स्त्रियों) की अनन्त केशपाशोंकी मणियोंकी सुन्दरताको तिरोहित करनेवाली 'रोहिणी रमण वसुदेवजीको' आनन्दित करनेवाली रोहिणीके गर्भमें आगये ॥१९॥

विशेष—देवकीका सातवां गर्भ नष्ट हो गया यह मथुरामें समाचार फैल गया । लोग तरह तरहकी शंकायेंकर रहे हैं, पर वह प्रभुकी माया थी इसे

(1) गजः ।
(2) शावक्ः—शाव+कन् [शिशुः]
(3) अतिक्रमण करनेवाली ।
(4) चन्द्रः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अकस्मादेवं विध विबुध विधान कौशले सति सपदि निर्भर निर्भ्रान्त प्रतीतयो 'देवकीगर्भोनिपतित' इति निरूचिरे पौराः। समुदितबुद्धिभ्रंशेन कंसेनापि तथा प्रतीतम् ॥२०॥

श्रीकृष्णस्य गर्भवास निरूपणम्

अथ सुरनिकर-निकाम-कामनापूरणाय धन-जन यौवन भौवनाधिपत्थापत्य प्रत्यहवर्द्धमान करितुरगादिकयान-पानप्रचुरीकृताभिमान-दानवानवरत मद-मेदुर-मेदस्वि मेदिनी खर-विसर[1]-स्वरूपमुर्वीदुर्वह भूमिभारमपनेतुकामो–निरपेक्षितशर्म्मनर्म्मापरधर्म कर्म निर्मितात्म–

नहीं जान सके थे। भगवान् विष्णुने योगमायाको आदेश दिया था कि तुम मथुरामें जाओ और देवकीके गर्भको खींचकर रोहिणीके गर्भमें स्थापित करदो––मैं देवकीके गर्भसे जन्म ग्रहण करूँगा, और तुम यशोदाके गर्भसे जन्म ग्रहण करना—

सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते।
तत् सन्निकृष्य रोहिण्या उदरे सन्निवेशय ॥१०।२।५

रोहिणी भी वसुदेवकी पत्नी थी जो नन्दगोकुलमें जाकर बसगई थी ॥१९॥

अनुवाद—अकस्मात् इस प्रकार चतुरताका दैवी विधान होनेपर, तत्काल निर्भ्रान्त प्रतीति करानेवाले रक्षकोंने 'देवकीका गर्भ गिर गया", इस प्रकारकी घोषणाकर दी। बुद्धि भ्रंश कसने भी इस बातको स्वीकारकर लिया।

हरिका गर्भमें आना

अनुवाद––इसके पश्चात् देवताओंकी सम्पूर्ण कामनाओंको पूर्ण करनेके लिये धन, जन, यौवन लोकाधिपत्य–सन्तान तथा प्रतिदिन बढ़नेवाले हाथी-घोड़े आदि यान-पानसे बढ़े अभिमानवाले दानवोंके निरन्तर मदसे पृथिवीके दुर्वह भारको दूर करनेकी इच्छावाले, कल्याण तथा आनन्दसे शून्य अत्यन्त कष्ट दशामें विद्यमान, और समस्त धर्म-कर्मों द्वारा भगवान्‌की चरणसेवामें संलग्न देवको और वसुदेवकी अभीष्ट पुत्र प्राप्तिकी कामनाको पूर्ण करनेकी अभिलाषावाले, अपनी भक्तवश्यताको प्रकाशित करते हुए भी भगवान्‌के चरणकमलोंकी निकलनेवाली मकरन्दमें मनरूपी भ्रमरको लगानेवाले, बढ़े हुए आनन्दको और भी बढ़ानेकी

---

(1) [वि+सृ+अप्] विस्तार।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदपद्मपरिचर्ययोर्देवकीवसुदेवयोरभिमतसुतवासनावसानमानिनीपुरा - त्मनोऽपि भक्तैकमात्रवश्यम्भावं प्रकाशयन्नपिनिजचरणारविंदमस्पन्द-मानमकरन्दमन्दिरीकृतमानसमैलिन्दयोर्यशोदानन्दयोरतिशयमानन्द वृन्द मतितुन्दिलो[1] भावयितुमपि सुन्दराभीर - कुलेन्दीवर लोचनाहृदय-गन्ध गजेन्द्र-बन्दीकरण कौतुकी देवकी जठर-पिठरी[2] निवासमेवोररी-चक्रे चिरं चक्री ।।२१।।

तस्मिन्पुनरन्तराविर्भाविभवतिरोभाविनिशरदभिनव-रवि-गर्भदुर्वह-दुर्वारद्युति-भर वारितान्धकार परम्परा पौरुहिती हरिदिव हरिदेवतो-द्दिदीपे ।।२२।।

इच्छासे, सुन्दर आभीर कुलकी इन्दीवर लोचना स्त्रीके हृदयरूपी गन्ध गजके बन्दीकरणके कौतुकवाले अर्थात् गर्भमें प्रविष्ट होनेकी इच्छावाले देवकी जठर-पिठरमें भगवान्ने अपना निवास स्वीकार किया ।।२१।।

अनुवाद – फिर जठर मध्यमें प्रकट होनेवाले भावोंसे उनके न छिपनेपर शरद-ऋतुके प्रातःकालके नवीन सूर्यके धवल मेघसे आच्छादित होनेपर भी कान्तिमान् होनेके कारण आच्छादित सूर्यकी तरह गर्भगत भगवान्की दुर्वह और दुर्वार द्युति भारसे अन्धकार परम्पराको हटाकर पूर्व दिशामें प्रकट होनेवाले सूर्यदेवकी तरह चमकने लगे ।।२२।।

विशेष—भागवतमें भी देवकीके गर्भावस्थाके तेजका विशिष्ट वर्णन है। कंस बार-बार देवकीको देखने कारागारमें आया करता था। प्रभु श्रीकृष्णके गर्भगत होनेपर जब वह आया और उसने देवकीका शरीर देखा तो शंकित हो गया। क्योंकि उसके गर्भमें विष्णु भगवान् थे--

आहैष मे प्राणहरो हरिर्गुहां
ध्रुवश्रितो यन्नपुरेयमीदृशी ।। भा० १०।२।२०

वह कहता है कि यह पहले ऐसी नहीं थी, अवश्य ही मेरे प्राण लेनेवाला इसके गर्भमें विष्णु बैठा है। उसका तेज दिव्य था—

सादेवकी सर्व जगन्निवास निवासभूतानितरांन रेजे।
भोजेन्द्र गेहेऽग्नि शिखेव रुद्धा सरस्वती ज्ञानखले यथासती ।। भा० १०।१

(1 तुन्द+इलच्
(2) पिठ+करन् [पात्र]।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रीकृष्णजन्मवर्णनम्

अपि च यशोदा यशो-दान-दाक्षिण्य-शोभिनी दुर्घटनैक-पटीयस्यां तस्यां जठर पिठरीमासेदुष्यामभिबोधित सकलसमृद्धि-सिद्धि बहुविध-शुद्धि परमब्रह्माजिह्म-प्रकाश गर्भोपनिषदिव गोकुलधामाभिरामयन्ती जगदुपरि कयापि शोभयोज्जज्वाल नभसि ॥२३॥

घन घना घनान्धकारे, नभसि निशार्द्धं वृषार्द्धभाजिचन्द्रे, समजनि यदुसिन्धु रोहिणीशोऽष्टमतिथिबन्धुर रोहिणीविहारे[1] ॥२४॥

पुष्पवृष्टि वर्णनम्

जगदिदमखिलमनंहोकृत्य दैत्यसङ्घ-संहार-रंहोजुषि स्फुरदम्भो-

श्रीकृष्णजन्म वर्णन

अनुवाद—उस समय यश और दान आदिसे अधिक शोभा देनेवाली—यशोदा, दुर्घटनाओंमें पटु अपने उदरमें योगमायाके आ जानेपर शोभित हुई। समस्त सिद्धियोंकी यह अधिष्ठात्री थी और इसे अनेक प्रकारकी शुद्धियां बतलाई गई थी प्रब्रह्मके सहज प्रकाशको अपने अन्तर्में लिये थी। अतः उपनिषद्की भाँति [उपनिषद्में ब्रह्मका विचार होता है] गोकुलधामको प्रकाशित करती हुई विचित्र शोभासे आकाशमें सबसे अधिक शोभाको प्राप्त हुई ॥२३॥

विशेष—योगमाया, यशोदाके गर्भमें जबआई तबका वर्णन है, यशोदाकी पुत्री योगमाया देवकीके पास पहुँचेगी और श्रीकृष्णको वसुदेव यशोदाकी शय्यापर लावेंगे। भागवतमें यह वर्णन है ॥२३॥

अनुवाद—आकाशमें बादल घिर आये थे, अर्धरात्रीका समय था, यदुकुलरूपी समुद्रमें चन्द्रमाके समान भगवान् श्रीकृष्ण अष्टमी तिथिमें रोहिणी नामक नक्षत्रमें देवकीके गर्भसे प्रकट हुए ॥२४॥

विशेष—भागवतमें ८६ श्लोकोंमें श्रीकृष्णके जन्मका वर्णन है—

निशीथेतम उद्भूते जायमाने जनार्दने।
देवक्यां देवरूपिण्यां विष्णुः सर्व गुहाशयः।
आविरासीत् यथा प्राच्यां दिशीन्दुरिव पुष्कलः॥ भा० १०।३।८

पुष्प वृष्टि वर्णन

अनुवाद—इस संसारको निष्कलंक करनेको दैत्य समुदायका संहार

---

(1) चन्द्रः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धर-दम्भावसारणारम्भिशोभासम्भारिवपुषि परमतेजसि दिशि दिशि के के त्रिदशा न तेनिरे कुसुमवर्षणानि हर्षातिशयेन ॥२५॥

पुरुहूत[1]हुतवह-यमयामिनी चर[2]-चक्रवर्त्ति वरुण-समीरण - धनद-धूर्जटीनाम्[3] धामधोरणीषु दुन्दुभीनां जम्भारिमुक्तजलधर-गम्भीर-जलनिधि संभूत घन रवगर्व चर्विणो जर्जरित वैरि-नारीमर्मणः समुज्जजृम्भिरे नादाः ॥२६॥

जम्भारिर्दुन्दुभीनां ध्वनिभिरमुखरीकृत्यनासीज्जगद् द्राक्
नाजाग्रद्रोमरुद्रो विधिरपि सहसा ना चमत्कार मूढः ।
नावर्षत् पुष्पवर्षं दिशि दिशि समुनिर्देवर्तार्षिर्महर्षिः
लक्ष्मीशे वैरिलक्ष्मीमभिसरति पुरे माथुरे कौतुकेन ॥२७॥

तस्मिन्नाविर्भवति मथुरायां, मथुरामेव के न महात्मानो बहु प्रशंशसुः ॥२८॥

करनेवाले तेजको धारण किये हुए, उठते हुए बादल जैसे पाखण्डको दूर करनेवाली शोभाको धारण किये हुए परम तेजस्वी श्रीकृष्णके प्रकट होनेपर हर्षकी अधिकता से सभी देवोंने पुष्पवृष्टिकी ॥२५॥

अनुवाद—इन्द्र, अग्नि, यम, राक्षसोंके राजा वरुण, वायु, कुवेर शङ्कर आदि सब देवताओंके स्थानपर नगाड़ोंके शब्द तथा इन्द्रके द्वारा छोड़े हुए बादलोंकी तरह गम्भीर समुद्रसे होनेवाले अत्यन्त शब्दसे भी उग्र शत्रुओंकी तरह नारियों के मर्म स्थलको पोडित करनेवाले नाद उत्पन्न होने लगे ॥२६॥

अनुवाद—जिस समय कौतुकमें ही लक्ष्मीपति भगवान् कृष्णने मथुरानगरीमें शत्रुओंकी लक्ष्मीपर अभिसार किया। अर्थात् जब मथुरामें जन्म लिया तव नगाड़ोंके शब्दसे तत्काल ही संसारको गुञ्जित करनेमें इन्द्र रुका नहीं और बिना रोमांचके रुद्र भी न रह सके, ब्रह्मा भी बिना चमत्कारके मूढ नहीं रह सके, दशों-दिशाओंमें बिना पुष्पवर्षा किये हुए मुनि, देवता, ऋषि, महर्षि भी न रह सके ॥२७॥

अनुवाद—मथुरामें श्रीकृष्णके जन्म लेनेपर कोई महात्मा मथुराकी इस प्रकार प्रशंसा करते हैं ॥२८॥

---

(1) इन्द्रः
(2) चन्द्रः
(3) शिवः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथाहि—

आः पुण्यं मथुरापुरस्य परम ब्रह्मापि कर्म्माचरद्
यत्राहो निजजन्म साधु मनुते पित्रोः समुद्धारतः।

केचन पुनरद्यापि तमेवार्थं युक्त्या समर्थयन्ते—

आत्मानं विततार चारु मथुरोतंसस्तु कंसः कथं
तन्नो चेत्पुरुषोत्तमाय बहुधा दोषान्विचिन्वन्नपि ॥२६॥

महोद्यमेन निरवद्यवाद्य-घोषमिव, मृदु-मधुरसान्द्रमन्द्र-घोषं वितेनिरे, परितोऽति - परिपुष्टवारि·वृष्टिं मुक्तावृष्टिमिव भृशमारभिरे, जगतिहरिजन्म महामहोत्सवेन कौतुकतरलाः सौदामिनीं नाम नर्त्तकीमानर्त्तयामासुराशु, रसमेदुराः पयोधर परम्पराः ॥३०॥

अथोद्भट - किरण-जटाल-हाटक-घटित मणिपदुतुला कोटिपादकटक-कटिमेखलोत्कटकान्त-कङ्कण-केयूर ग्रैवेयकावस्थ-कौस्तुभमहाहेमहार हसित-हरि हारि-कुण्डल किरीट-कोटीरकोटि मणिमण्डने, नासा शिखर विलम्बिविक स्वर सुवर्त्तुलपृथुलमुक्ताफलधवलमयूखमांसलकपोलतले, करकमलालङ्कृत·कमल-कम्बु कौमोदकी चक्रे चक्रिणि[1]

अनुवाद—आहा ! मथुरा नगरीका कैसा पुण्य है। परब्रह्मने भी कर्मका आचरण करते हुए, माता-पिताका उद्धार करनेके लिये जहाँ जन्म लेना अच्छा माना। कोई-कोई आज भी इसी अर्थको इस युक्तिसे समर्थित करते हैं। अगर यह न होता तो दोषोंको धारण करते हुए भी मथुरापुरीका राजा कंस अपने आपको कृष्णके लिये समर्पण क्यों कर देता ॥२६॥

अनुवाद—उस समय भगवान् कृष्णके जन्म समयपर कौतुकसे तरल होकर पयोधर परम्पराने सुन्दर वाद्य-घोषकी तरह मृदु-मधुर-मन्द-मन्द गर्जन प्रारम्भ किया, चारों ओर मुक्तावृष्टिकी तरह तीव्र जलवर्षा प्रारम्भ हुई। हरिजन्मके उत्सवमें चञ्चल-चित्त होकर सौदामिनी नाम नर्तकीका नृत्य तत्काल प्रारम्भकर दिया ॥३०॥

अनुवाद—इसके पश्चात् उद्भट किरणोंके निकलनेसे जटाओंकी तरह प्रतीत होनेवाली सुवर्ण घटित मणियोंसे सुन्दर तुलाकोटि पादकटक-कटि मेखला उत्कट और सुन्दर कंकण केयूर ग्रैवेयक ग्रीवालङ्कारकी तरह कौस्तुभमणिको

(1) कृष्णः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोचन-पथमण्डिनि पुण्डरीकलोचने, यदुकुल-कमल विरोचि-विरोचना-गौर-वाससि नाभीस्थित-स्तुति मुखरित ब्रह्मणि परमब्रह्मणि हृदयानन्दिनि नन्दनीभावविनितदङ्गाम्बु-वाहच्छवि-धारोपलम्भन - प्रोद्भिन्न-कलमाङ्कुर-निकरेणेव विपुलपूलकोत्करेण कलितकलेवर केदारौ वहदानन्द नयनजलमन्दाकिनीमेदुरौ[1] बहुकृताकैत वसुदेवदेवकी वसुदेवौ नहि केषां केषां फलानां भाजनीभवतः ॥३१॥

धारण किये हुए, बड़े सुवर्णके हारको तथा चमकनेवालो किरणोंसे युक्त कुण्डल, किरीट, कोटीरादि अनेक मणिभूषित (कृष्णको देखा) जिनके नासा शिखरपर गोल-मोटा और चमकयुक्त मुक्ताफल था। मुक्ताफलकी श्वेत आभासे कपोल शोभायमान थे। उनके हाथोंमें शङ्ख, चक्र, गदा और पद्म थे। नेत्र पथको शोभित करनेवाले उनके कमल जैसे नेत्र थे। यदुकुलरूपी कमलको विकसित करनेवाले सूर्यसे चमकीले वस्त्र धारण किये हुए थे। नाभिमें स्थित ब्रह्मा जिनकी स्तुतिकर रहा था। जिनको देखकर हृदय प्रसन्न होता था, जो चक्र धारणकिये हुए थे। पुत्रत्वको प्राप्तकर जो बालकृष्ण बनकर उत्पन्न हुए थे। उन कृष्णकी शरीरकी मेघरूप छविकी धारा पड़नेसे मानों कलमके अंकुर उत्पन्न हुए हों ऐसे रोम समुदायसे क्षेत्ररूपी शरीरसे सुशोभित (देवकी-वसुदेव) नेत्रोंसे आनन्दके अश्रु बहानेवाले (अश्रुधार नहीं मानों मंदाकिनी थी) छल-रहित थे, देवोंके समान थे, उस समय उन्हें कौन-सा फल प्राप्त नहीं हुआ ॥३१॥

विशेष—कृष्णके जन्मके समय बादल मन्द-मन्द गर्जनकर रहे थे—

"मन्दं मन्दं जलधरा जगर्जु रनुसागरम् ।" भा० १०।३

ऐसा भागवतमें भी वर्णित है। वे अनेक मणि तथा आभूषण धारण किये थे--चतुर्भुज थे और शङ्ख-चक्रादि धारण किये थे—

तमद्भुतं बालकमम्बुजेक्षणं
चतुर्भुज शङ्ख गदायुदायुधम् ।
श्रीवत्स लक्ष्मंगलशोभि - कौस्तुभं
पीताम्बरं सान्द्र पयोद सौभगम् ॥ भा० १०।३।९
महार्ह वैदूर्य किरीट कुण्डल
त्विषा परिस्वक्त सहस्र कुन्तलं ।

---

(१) स्थूल ।

वसुदेव कृता श्रीकृष्णस्तुतिः

अथ सम्भ्रमचकित-विलोचनो दण्ड वद्भुविनिपत्य वसुदेवो देवकी च स्तोतु मारेभे ॥३२॥

जय जय जगन्नाथ यदुवंशोत्तंस हंसवास हंसासन[1] नुतचरण परमहंस मानसकेलिकलहंस मणिमयावतंस प्रभामांसल कपोलांस संसारा पार पारावारोत्तरण[2] कर्णधार, धरणितलोत्तार धुरन्धरावतार प्रतिनवधाराधर जलधारायित मणिहारावलि घनताराङ्कितघनसाराञ्चित समुदारोरःस्थल सुरासुरकुलभाराकुल जगदाराधित पद नारायण नयपारायणमय धीरावलिभववारां निधिसुखपारासादन-पारातीतक्षीरा-

उद्दाम काञ्च्यंगद कंकणादिभि–
विरोचमानं वसुदेव ऐक्षत ॥ भा० १०।३।१०

कविने यहां केवल सूचना दी है कि ब्रह्मा स्तुति संलग्न थे। जबकि भागवतकारने गर्भमें ही देवों द्वारा स्तुति कराई है—

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्ययोनिं निहितं च सत्ये।
सत्यस्य सत्यमृत सत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्ना: ॥ भा.१०।२।२६

आदि श्लोकों द्वारा देवोंकी स्तुति प्रसिद्ध है ॥३१॥

वसुदेवकृत स्तुति—

अनुवाद—बड़े सम्भ्रमसे चकित नेत्रवाले वसुदेव और देवकीने स्तुति प्रारम्भ की ॥३२॥

अनुवाद—हे जगन्नाथ! आपकी जय हो जय हो। हे यदुवंशके भूषण ब्रह्माको उत्पन्न करनेवाले, ब्रह्मा द्वारा चरणोंको स्तुति किये जानेवाले, परमहंस महात्माओंके मनमें हंसके समान क्रीड़ा करनेवाले, मणिमय भूषणोंकी कान्तिमे मांसयुक्त कपोल व कन्धेवाले, संसाररूपी अपार समुद्रसे पार उतारनेमें कर्णधारके समान, धरणिपर उतरे हुए धुरन्धर अवतार, प्रत्येक नये बादलोंकी जलधारासे युक्तमणि हारोंके घने तारोंमे अङ्कित तथा कपूरसे शोभितकी तरह उदार हृदयवाले, सुरों व असुरोंके कुलके भारसे आकुल जगतसे पूजे हुए चरणवाले, हे नारायण! तथा नीतिमें परायण! धीरोंके लिये संसाररूपी समुद्रसे पार लगानेवाले, अगाध क्षीरसागरकी भाँति अगाध हृदयवाले, विहार करनेवाले, वैदिक तत्त्वो-

1) ब्रह्मा। (2) समुद्रः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

म्भोनिधिगम्भोराशय विहितविहारश्रुतिकुलसार क्षपितनिकार ब्रह्मा-कार प्रशमित पृथ्वी पृथुतरभारप्रकटित निरुपधिजगदुपकार स्फार-विलोचन विगति विमोचन दानवकैरव कुलसङ्कोचन मुनिगणमानस-कमल विरोचन या [स्त्रो] कृत तिलकमनोहर नीलपयोधर पुञ्ज सहोदरमञ्जमहोभर विबुधपुरन्दर इन्दीवरमाला सुन्दर मन्दरावलि वलयितकन्धर बन्धुरबन्धूकाधरसुमधुर वन्दनविनमद्वृन्दारकपति वृन्द प्रशिथिलकुन्तल बन्धभ्रमदिन्दिरमन्दिर चरणस्फुरदर विन्दद्युतिमक-रन्दस्कन्धास्कन्दित सुजन द्वन्द्व[1] ब्रह्मानन्द सुरद्रुम कन्दस्मित सुमकरन्द स्नपितामन्दमुखेन्दो जय जय जगदानन्द व्याससनन्दसनातन सनक ब्रह्म महेश पुरोगमसुरनरकिन्नर निषेवित पीठद्वय देव जय शमय ममाधि निधिमिव दर्शय भक्ति लवं तव दीन दयामथ कृपण कृपालय सदयो भव मयि विनय विहीने ॥३३॥

पदेशसे पाखण्डको दूर करनेवाले, ब्रह्मके आकारवाले, पृथिवीके बड़े भारको दूर करके छल-रहित प्रकटमें संसारका उपकार करनेवाले, बड़ी-बड़ी आँखोंवाले, दुर्दशासे छुटानेवाले, दानवरूप कैरव कुलका नाश करनेवाले. मुनियोंके मनरूपी कमलको सूर्यके समान खिलानेवाले, सुन्दर तिलक लगानेवाले, नीलजलद समूहके समान सुन्दर शोभा धारण करनेवाले, देवताओंमें इन्द्रके समान श्रेष्ठ–नीलकमलों की मालाके समान सुन्दर मन्दारके समान सुन्दर कन्धरावाले, सुन्दर बन्धूक पुष्पके समान लाल अधरवाले, बन्दन करनेके लिये झुके जो देवगण उनके शिथिल जो केशबन्ध उनमें भ्रमण करनेवाले भ्रमरोंके चरणोंसे युक्त कमलोंकी गन्धवाले कन्धोंसे सत्पुरुषोंका आलिङ्गन करनेवाले, ब्रह्मस्वरूप आनन्दसे युक्त, मन्दहासकी सुन्दर मकरन्दरूप गन्धसे मुखचन्द्रको अत्यन्त प्रसन्न करनेवाले, जगत्को आनन्द देनेवाले, आपकी जय हो जय हो।

व्यास, सनन्द, सनातन, सनक, ब्रह्मा और महेश आदि देवों तथा नर-किन्नर आदि द्वारा सेवित चरणवाले हे देव! आपकी जय हो जय हो। आप हमारे दुःखको दूर कोजिये, निधिरूप भक्तिको दीजिये, हे दीनोंपर दया करनेवाले, कृपणपर कृपा करनेवाले, विनय-विहीन मेरे ऊपर दया कीजिये ॥३३॥

रहस्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवकीकृता कृष्णस्तुतिः

देवकीप्राह-- मुरमर्द्दन विष्णो !
त्रिभुवनजिष्णो !
परमसहिष्णो !
वृष्णिपते !
त्वं करमाली त्वं वनमाली,
त्वं भयदाली विश्वगते ॥
तव चरणं देवा दधति न के वा,
चेतसि सेवा निपुणतराः ।
स्फुटमित्थमहं का विगतातङ्का,
नियतमनङ्का बभुरमराः ॥३४॥
असि मीनाकारो जलधिविहारो,
वेदोद्धारोल्लसितमते ।
दामोदर सामस्तुतपद काम-
प्रद हतवाम श्रीवसते ॥

देवकीके द्वारा स्तुति

अनुवाद—देवकीने कहा—हे मुरका मर्दन करनेवाले विष्णु ! आप तीनों लोकोंको जीतनेवाले हो, सहिष्णु तथा वृष्णियोंके स्वामी हो। हे त्रिश्वको गति देनेवाले, आप करमाला, व वनमाला धारण करनेवाले हो। सेवामें निपुण देव अपने चित्तमें आपके चरणोंको धारण करते हैं। भय छोड़कर वे शोभाको प्राप्त करते हैं ॥३४॥

विशेष—मुरमर्दन=एक मुर नामका असुर था, उसका वध श्रीकृष्णने किया, तबसे उनका नाम मुरारि पड़ा। वृष्णि=यह यादवोंकी जाति है—

'वृष्णीनां प्रवरोमन्त्री कृष्णस्य दयितः सखा।'' भा० १०।४६ ॥३४॥

अनुवाद—वेदोंके उद्धारमें बुद्धि लगाकर मीनका आकार धारणकरके हे समुद्रमें विहार करनेवाले ! हे दामोदर ! सामवेदके द्वारा चरणोंकी स्तुति करानेवाले ! हे इच्छाओंको पूर्ण करनेवाले, प्रतिकूलताको नष्ट करनेवाले, हे लक्ष्मी-निवास ! कच्छपका शरीर धारण करनेवाले, मायाको हटानेवाले संसारका शुभ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कमठीकृतकायो विघटितमायो,
विहितभावायो[1] वहसि भुवं ।
परिपालय कृपया त्रुटितत्रपया,
भवभयमपयापयसि शिवं ।।३५।।
भीमार्णवलीनामतिशयदीनां,
महिम - विहीनां वीक्ष्य धरां ।
कोलाकृतिधारी सलिलविहारी,
तामुदधारो रति - विधुराम् ।।
आरोहितदन्तामतनुमनन्तां,
दधदपि हन्तासुरमवधीः ।

करनेवाले, पृथ्वीको धारण करनेवाले, कृपाकर मेरी रक्षा कीजिये । त्रपा=लज्जा हटाकर कल्याण कीजिये, समस्त संसारके भयको दूर कीजिये ।।३५।।

विशेष—हयग्रीव नामक असुर ब्रह्माजीके हाथसे वेदोंको लेकर समुद्रमें कूदगया और छिपगया था । ब्रह्माजीकी प्रार्थनापर भगवान्‌ने मीनका आकार धारणकर लिया और दैत्यका वध किया था । जयदेवने गीतगोविन्दमें भी लिखा है— प्रलय पयोधि जले धृतवानसि वेदम्
विहितवहित्रचरित्रमखेदम् ।
केशवधृत मीन शरीर, जय जगदीश हरे ।। [गीतगोविन्द]

भगवान्‌को सामवेदकी ध्वनि अत्यन्त प्रिय है । वैसे गीतामें सामवेदको कृष्णने अपना ही रूप कहा है --"वेदानां सामवेदोऽस्मि" ।

हतवाम=भगवान्‌का स्मरण अमङ्गलका नाशक है—
"प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशान्तये ।" ।।३५।।

अनुवाद—हे प्रभो ! आपने जब महिमासे हीन, अत्यन्त दीन तथा भयङ्कर समुद्रमें डूबी पृथ्वीको देखा तो वाराहका रूप धारणकर जलमें विहार करते हुए उसका उद्धार किया । अनन्त पृथ्वीको अपने दाँतपर रखकर ही उस असुरका आपने वधकर दिया था । इस असुरने इन्द्रको बड़े दुःख दिये थे, बड़ा ही कुटिल था, पर आपने हाथीको सतानेवालेकी तरह उसका वधकर डाला ।।३६।।

विशेष—इस श्लोकमें उस असुरका नाम नहीं लिखा है, किन्तु भागवत-आदि पुराणोंमें प्रसिद्ध है कि वह 'हिरण्याक्ष' नामक असुर था । दितिके दो पुत्र

---

(1) अयः शुभावहो विधिः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अवधीरित शक्रं दारुणवक्रं,
गज इव नक्रं सकुतुकधीः ॥३६॥
नरकेसरिरूपी नखरस्तूपी,
दानव भूपो भवदसुरं ।
हतवानसि जम्भ द्विष दुरु दम्भ,
प्रचुरारम्भ भ्रंश परम् ॥
वज्राधिकमुखरैर्भीषण नखरैं,
रस्थिषु मुखरैर्दैत्यतनो ।
रुद्वह्निभिरुदितै रविकरविदितैः,
शोणितमृदितैर्मोक्षम[1] नो ॥३७॥
बलिनामनहेतोः खगपतिकेतो
तरलितचेतोऽमर सुख भूः ।

थे, उनमें बड़ा था । इस असुरने पृथ्वीका हरण किया था । श्रीवाराह भगवान्‌ने इसका वध किया था । हिरण्यकशिपु नामक असुरका वध श्रीनृसिंहजीने किया था ॥३६॥

अनुवाद—इन्द्रके बड़े-बड़े कार्योंको नष्टकर देनेवाले उस हिरण्यकशिपु दैत्यराजको—नृसिंहावतार लेकर आपने ही नखोंसे विदीर्णकर डाला था । आपके नख वज्रसे भी अधिक उग्र थे जब वे दैत्यकी अस्थियोंमें लगे तो रगड़से चटचट आवाज आई मानों अग्निसे स्फुलिंगकण निकल रहे हों, आपके नख सूर्य-किरण जैसे लाल थे उन्हींसे उसको आपने मारा था ॥३७॥

विशेष—श्रीनृसिंहने हिरण्यकशिपुका वध किया था । कारण यह है कि इस असुरने ब्रह्माजीसे वरदान माँगा था कि मेरी मृत्यु किसी भी जीवधारीसे न हो और न किसी अस्त्र-शस्त्रसे हो, दिनमें और रात्रीमें भी मेरी मृत्यु न होवे । फलतः भगवान्‌ने नखोंसे इसका वध किया था और सायंकालके समय अपने गोदमें रखकर इसका विनाश किया था । भागवतमें लिखा है—

"नभूमौ नाम्बरेमृत्युर्न नरैर्नमृगैरपि ।" भा० ७।३।३६ ॥३७।

अनुवाद—हे गरुडध्वज ! बलिको नम्र करनेके लिये चंचल चित्तवाले देवोंको सुख देनेवाले आपने 'वामन' का रूप धारण किया था । अखिल ग्रासी

---

(1) मनुर्मन्त्र ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वामनवपुरासीरखिलग्रासी
करपदभासी द्रुतमुद भूः ।।
तापत्रय - नोदच्छन्न - विनोद
प्रकटित - मोद त्रिभुवनकं ।
मनुते शुभवतं शमितभवं तं
को न भवन्तं ननु जनकम् ।।३८।।
सुखभूयिष्ठारं कलितकुठारं
दनुजहठारं विश्वधरं ।
परिपूरितकामं त्वामभिरामं
कथयति रामं को न परम ।।
क्षितिभारभ्रंशी भवशुभशंसी
क्षत्रध्वंसी पुनरुदभूः ।
करुणारसवाही सदनुग्राही
पातकदाही द्विजकुल भूः ।।३९।।

होते हुए भी सुन्दर हाथ-पैर धारणकर उत्पन्न हो गये थे। आप तीनों तापोंको नष्ट करनेवाले हैं, छिपे हुए विनोदवाले हैं, त्रिभुवनमें आनन्द प्रकट करनेवाले हैं, आप पिताके समान सबका कल्याण करनेवाले हैं, सुख देनेवाले हैं, कौन आपको ऐसा नहीं मानता ; अर्थात् सभी मानते हैं ।।३८।।

विशेष--राजा बलिका राज्य तीनों लोकोंमें हो गया था। देवगण पृथ्वी में विभिन्न रूप धारणकर विचरणकर रहे थे, तब उनके दुःख निवृत्त करनेके लिये 'अदिति कश्यप' के पुत्रके रूपमें श्रीवामनके रूपमें प्रभु प्रकट हुये थे आपने तीन चरणोंसे तीनों लोकोंको नाप लिया और राजा बलिको भी आधीनकर लिया था ।।३८।।

अनुवाद—अत्यन्त सुख देनेवाले, कुठार धारण किये हुए, दुष्टोंको हठ-पूर्वक नष्ट करनेवाले, विश्वको रक्षा करनेवाले, कामनाओंको पूर्ण करनेवाले आपको सब परशुराम कहते हैं। आपने पृथ्वीके भारको हटाया, संसारको सुख प्रदान किया, क्षत्रियोंका विनाश किया, आपने करुण रसकी सृष्टिकी और द्विज कुलमें उत्पन्न हुये थे ।।३९।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हरकामुर्कखण्डी[1] कौणपदण्डी,
रविकुलमण्डी दशरथतः ।
कृतदेहारम्भः पृथुलस्तम्भ,
कमभुजजम्भ-द्विषदुरुतः ॥
रावणहतिहेतो रुदधौ सेतो,
रन्तक केतोरिव विजयं ।
हेलाहतवाली व्यतनोराली,
कृतगुरुताली वन विलयम् ॥४०॥
गुरुकरुणावन्तं भुवन भवं तं,
वदति भवन्तं शुद्धमिति ।
प्रथिताभयदानं परमज्ञानं,
मोक्षनिदानं शुद्धमतिः ॥
अखिलं न सदालोकयितुमिवा,
लोडितमितिकालोपचितभटै ।
स्त्वानवतीर्णं स्मरति विशीर्णं,
मायाजीर्णं हृद् विकटैः ॥४१॥

अनुवाद—रामावतार लेकर आपने शङ्करजीके धनुषको तोड़ा था, राक्षसोंको दण्ड दिया था, आप दशरथके पुत्र बने थे, और सूर्य कुलमें भी आप पृथुल स्तम्भके समान भुजावाले इन्द्रके महान् कार्य करने हेतु देह धारण करनेवाले बने थे, रावणका वध करनेके लिये यमराजकी ध्वजाके समान समुद्रमें पुल बनाया था, आपने खेल ही खेलमें बालीका वध किया था तथा पंक्तिबद्ध तालके वनका विनाशकर दिया था ।४०॥

अनुवाद—आप करुणायुक्त हैं, भुवनका कल्याण करनेवाले हैं अतः आप शुद्ध हैं । अभयदान देना आपका स्वभाव है, परम ज्ञानवान् मोक्ष प्रदाता शुद्ध-बुद्ध हैं, योद्धाओंने भी दर्शन करनेकी इच्छासे सर्वदा आपका ध्यान किया, माया शवलित आपके अवतारका सदा ध्यान करते हैं ।४१॥

(1) राक्षस ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

म्लेच्छाहिततापं खण्डितपापं,
सशरं चापं दधतिरमे ।
त्वयि कल्किनि वेदागोचर भेदा,
विष्कृत खेदानपनय[1] मे ।।
इह को महिमानं वदतु च मानं,
किमपि समानं जगति न ते ।
मुनि रतनोद्ध्यानं सुदृढज्ञानं,
तव संस्थानं न हि लभते ।।४२।।

त्वं पारे वचसो बहिश्च मनसस्त्वं निष्कलो निर्गुण-
स्त्वं पूर्णस्त्वमहो नभोवदखिल व्यापी न लिप्तः क्वचित् ।
अभ्यर्णप्रकृति प्रसन्नमुकुरव्यालम्बि बिम्बं तु ते
जीवं केऽपि जगुर्नमोस्तु भवते त्वं योऽसि सोऽसि प्रभो ।।४३।।
नान्तो नादिर्न मध्यो न च कर चरणं नाननं नापि चक्षु-
र्न श्रोत्रं नापि नासा न च तव रसना त्वक्च नो वा न चेतः

अनुवाद—म्लेच्छोंको ताप देनेवाले पाप नष्ट करनेवाले, धनुष-बाण धारण करनेवाले, वेदोंसे अगोचर कल्कि रूपमें मैं रमण करती हूं, मेरे भेद बुद्धिसे हानेवाले खेदको आप दूर करें। आपको महिमा कहनेमें कौन समर्थ है, आपके समान संसारमें कोई नहीं है, मुनि लोग ज्ञानपूर्वक ध्यान लगाते हैं, फिर भी आपको प्राप्त नहीं करते ।।४२।।

अनुवाद—(देवकीने कहा)—आप वचनसे अगोचर हैं और मनसे भी परे हैं, निष्कल निर्गुण और पूर्ण हैं। आप आकाशकी तरह सर्व-व्यापक हैं, कहीं लिप्त भी नहीं है। प्रकृतिका विलय आपमें ही होता है। आपका बिम्ब स्वच्छ दर्पणकी तरह सर्वत्र व्याप्त है, कोई-कोई तो आपको जीव ही कहते हैं, आप जो हैं सो हैं आपको नमस्कार है ।।४३।।

अनुवाद—आपका आदि, मध्य, अन्त नहीं है, आपके हाथ-पैर मुख और आँख भी नहीं, नाक, कान, जिह्वा, त्वचा, चित्त भी नहीं। हे सर्वात्मन् ! फिर भी आप सर्वत्र व्याप्त हो। ससारको उत्पन्न करते हो, रक्षा करते हो, नष्ट करते

---

(1) दूरीकुरु ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वात्मन्सर्वगस्त्वं जगदपि कुरुषे पासि चात्सीक्षसे च ।
श्रोता घ्राताऽसि सर्वं रसमुपलभसे संस्पृशस्येव वेत्सि ॥४४॥
जन्म मे सकलशर्म भाजनं भाजने त्वयि दृशोरजायत ।
शृङ्खलापि पदयोरनाकुला मुक्तिमापमहमापदां बहिः ॥४५॥
एकदोदयति मोदवाहिनो वाहिनीव हृदि भोजभूपतेः ।
दर्शने तव तपोनिदर्शने कौतुकं भवति भीरपि प्रभो ॥४६॥

वसुदेव द्वारा कृष्णस्यालौकिक रूप गोपन प्रार्थनम्

प्रभुवर परमेश निवेदयामि ते पदयो "गोपय गोपयालौकिकं रूपं" इति वचनमवधाय देवक्याः स्मित मधुर मुखेन्दुदन्त दीधिति-निकर निवारितान्धाकारपरम्परपरम पुरुषो मधुपीयूष - माधुरी मय-माह मातरं पितरं च किमपि प्राचीनम् ॥४७॥

हो और देखते हो, सुनते हो, सूँघते हो, सर्व रसोंको चखते भी हो, स्पर्श भी करते हो, और जानते भी हो ॥४४॥

विशेष—"विनु पद चलहि सुनहि बिनु काना ।"
तथा—"केशव कहि न जाहि का कहिये ।
देखत तव रचना विचित्र अति समुझि मनहिं मन रहिये ।

की बात ही सत्य है । भगवान्‌को इदमित्थं कह दियाजाय कि वे ऐसे हैं तो उनका परिच्छिन्नत्व सिद्ध होगा अतः अनन्तको महिमाका वर्णन कोई कैसे कर सकता है ॥४४॥

अनुवाद—मेरी आँखोंको आपका दर्शन होनेपर मेरा जन्म कल्याणका पात्र होगया । मेरे पैरोंकी शृङ्खला भी टूटगई, मेरी सम्पूर्ण आपत्तियाँ दूरहो गईं और मैं मुक्त हूं ॥४५॥

अनुवाद—एक ओर भोजराज कंसके हृदयमें भयकी लहर उदित हो रही है, तपस्याको प्रकट करनेवाले आपके दर्शनसे एक ओर आनन्द दायिनी प्रसन्नताकी लहर उदित हो रही है ॥४६॥

वसुदेव द्वारा अलौकिक रूप छिपानेकी प्रार्थना

अनुवाद—हे प्रभुवर ! हे परमेश ! आपके चरणोंमें मेरा यही निवेदन है कि अपने इस अलौकिक रूपको छिपाइये-छिपाइये । देवकीके इस प्रकारके वचनोंको सुनकर प्रभुने मन्दहास किया । मन्दहासके द्वारा दाँतकी किरणोंसे अन्धकारकी परम्पराको नष्ट करते हुए बालरूप भगवान् कृष्ण मधु-अमृत जैसी मधुरतासे पूर्ण वचनों द्वारा माता-पिताके पूर्ववृत्तका वर्णन करने लगे ॥४७॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रीकृष्णवचनम्

पूर्वेषु बहुषु जन्मसु भवद्भ्यामद्भुतमिदमेव मे रूपं मनसि निरूप्य मय्यवसित पुत्रभावाभ्यां भूयर्येवाजि दुर्जयं सुतपो दीर्घमिति पुनरहमृणमार्जनाय पर्जन्य पर्याकुलीकरणमभि-हर्षित महर्षि देवर्षिमानसमदर्शयमात्मनो रूपम् । ४८॥

तदिदानीमपनीयतामात्मीयता तापत्रय शङ्का ॥४९॥

परन्तु ममैव माया भगवती जगती सर्व निर्वाह सामग्री समग्रैरभिपूजिता नन्द दयितायां गोकुले यशोदायां जनितामिहानयतु, मां नयतु तदङ्कमशङ्कमना विनाविलम्बमम्ब ? जनकोयम् । अहमपि भवतो राज्ञामेव पालयन्नात्मानं गोपयामीदमभिधाय तद्रूपमहाय माधवः साधारण इव शैशवं भेजे ॥५०॥

अन्धकार वर्णनम्

तदनु वसुदेवोऽपि तनुजीभूत वासुदेव वचनमवधाय तमादायागणित घनघोर गर्जदुर्जयान्धकार निविडतरा सार सौदामनी स्फुर-

---

श्रीकृष्ण वचन

अनुवाद—पहले अनेक जन्मोंमें आप दोनोंने मेरे इस अद्भुत रूपको मनमें धारण करके मुझमें पुत्रभाव रखते हुए बहुत कठोर तप किया था, उस ऋण को दूर करनेके लिये मैंने अपने उसी रूपको दिखलाया है ॥४८॥

अनुवाद—जो महर्षियों देवर्षियोंके मनको प्रसन्न करनेवाला है मेघको भी विलज्जित करनेवाला है, सो आप तापत्रयकी शङ्का न करें ॥४९॥

अनुवाद—परन्तु पृथ्वीका सब निर्वाह करनेवाली, सबके द्वारा पूजी जानेवाली, मेरी भगवतीमायाने गोकुलमें नन्दपत्नी यशोदाके यहां जन्म लिया है उसको यहाँ ले आइये और मुझे यशोदाकी गोदमें निश्शंक मन होकर बिना विलम्बके ये मेरे पिता पहुँचा देवें। मैं भी आप दोनोंकी आज्ञाका पालन करके अपने आपको छिपाता हूँ यह कहकर अपने रूपको छोड़कर माधव, साधारण बालककी तरह हो गये ॥५०॥

अन्धकार वर्णन

अनुवाद—इसके अनन्तर वसुदेव भी पुत्र बने हुए वासुदेवके वचनको मानकर उनको लेकर अति घने बादलोंकी घोर गर्जन तथा अत्यन्त अन्धकार,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दर्शनि चमत्कार दुर्वारोद्वेल्ल दुल्लोल कोलाहल वहल वाहिनीविलङ्घ नादि तथैव संविधातुमारेभे ।।५१।।

गोकुलगमनम्

अथ चलति सुतमशङ्कमङ्के निधाय वसुदेवे समजनि विघटित निगडबन्धयन्त्रणश्चरणो, द्रुत गलदर्गल कपाट कूटानि नगरद्वाराणि, मरुदपि विरताखण्ड चण्डिमारम्भो, द्रुतमम्बरमध्यगत गम्भोर तरा-

---

वर्षा, बिजलीकी घोर गर्जना वज्रपात सदृश घोर कोलाहल - पूर्ण बहती हुई यमुनाको पार करनेके लिये तैयार हो गये ।।५१।।

विशेष—श्रीकृष्णने यह रहस्योद्‌घाटन किया कि देवकी - वसुदेवने तपस्याकी थी, अतः मैंने प्रभुके रूपको दिखलाया । भागवतमें उन्होंने माता-पिताके तीन जन्मोंका उल्लेख किया है—

प्रथममें—देवकी प्रश्नि—वसुदेव 'सुतपा' (भा० १०।३।३२) ।

द्वितीयमें—देवकी अदिति—वसुदेव 'कश्यप' (भा० १०।३।४२) ।

तृतीयमें—अब देवकी—'वसुदेव' और मेरा नाम प्रथममें प्रश्निगर्भ—द्वितीयमें वामन अब कृष्ण है । कृष्णके जन्मके समय बेड़ी खुलगई थी और कपाट भी खुल गये, जो द्वारपाल रक्षाके लिये नियुक्त थे वे भी घोर निद्राके वशीभूत हो गये थे । वर्षा होने लगी थी—

ववर्ष पर्जन्य उपांशुगर्जितः ।
शेषोऽन्वगाद् वारि निवारयन् फणैः ।। (भा० १०।३।४९)

शेषजीने कृष्णपर अपने फणोंका छत्र लगाया है, ताकि वर्षासे उनकी रक्षा हो सके । यमुनातो यमकी बहिन सी थी ही —

मघोनि वर्षत्यसकृद् यमानुजा
गम्भीरतोयौघ जवोर्मि फेनिला ।
भयानकावर्त शताकुला नदी
मार्गं ददौ सिन्धुरिव श्रियः पतेः ।। भा० १०।३।५० ।।५१।।

गोकुल गमन उपक्रम

अनुवाद—इसके पश्चात् जब वसुदेव श्रीकृष्णको लेकर चलने लगे तो चरणोंके कठोर बन्धन टूट गये थे, अर्गला नष्ट हो गई थी, द्वारोंके किवाड़ खुल गये थे, वायुके प्रवाहका वेग भी शान्त हो गया था । गम्भीर मेघ तथा बिजली

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

डम्बर दम्भोलि[1]परम्परम्, परितः समुदयदवार्यपर्जन्यगणोऽपि रचिता-मन्द-जलबिन्दु वृष्टिसृष्टिर्दुर्जनानेव तर्जयन्निव गर्जन्नासीत् ॥५२॥

दर्वीकर पतिरपि दुर्वारदर्वीदर्शितातपत्रमनुसेवतेस्म वसुदेवम् ॥५३

यमुनोल्लङ्घनम्

अथ विगततरानीचवीचीर्वाचालीकृत दिङ्‌मण्डलीकतया दुरित चमूरिव तर्जयन्ती, जगति जनार्दनजन्ममहामहोत्सवमिव विख्यापयन्ती हरि सम्भवसम्भूतसम्मोदमेदुरा बहललहरी बाहुमा - स्फोट्य नाट्य-मिवाचरन्ती, 'व्रजभुवन सम्प्रयाण मङ्गलाधानदुन्दुभिध्वानानि च कुर्वती, सर्वतो निर्भरोद्भ्रान्तावर्त्त सन्तान शालिनी स्फुटगम्भीर नीरनीलिमाकुलतया कुटिलमनोवृत्तिरिव, भीषणापि, दीनजन धन मनोराज्य परम्परेव दुष्पारापि, शमन सहोदरा[2] जानुदघ्न जलैव सावहेलमुदलंघि वसुदेवेन ॥५४॥

आदि भी नष्ट हो गई थीं, आकाश स्वच्छ हो गया था। कुछ बादल चारों ओर दुर्जनोंको डराते हुएसे उठ रहे थे, मन्द गर्जनाके साथ उनसे वर्षा बिन्दु भी गिर रहीं थीं ॥५२॥

अनुवाद—शेषनाग भी छत्रकी तरह अपने फणोंका आकार बनाकर वसुदेवकी सेव्य करने लगे ॥५३॥

यमुनापार करना

अनुवाद—यमुना भी बड़ी-बड़ी लहरोंसे दिङ् मण्डलको गुञ्जित करना छोड़कर मानों पाप समूहको डराती हुई संसारमें भगवान्‌के जन्म-महोत्सवको प्रसिद्ध करती, भगवान्‌के जन्मको प्रसन्नतासे फूली हुई लहररूपी भुजाओंके आस्फोटनसे नाटक-सी करती व्रजमें भगवान्‌के आनेके मङ्गलका मानों वाद्य बजाती हुई सब ओर निर्भ्रान्त होकर भ्रमण करते हुए सैकड़ों आवर्तसे शोभित-सी स्वच्छ और गम्भीर जलकी नीलिमासे युक्त होती हुई कुटिल मनोवृत्तिकी तरह भयङ्कर, दीनोंके धन सम्बन्धी मनोराज्यकी परम्पराकी तरह पार न पा सकने योग्य होती हुई। शमन=शान्तिकी बहिन अथवा शमन=यमराजकी बहिन यमुना घुटनों तक जलवाली होगई और वसुदेवने उसे खेलमें ही पारकर लिया ॥५४॥

---

(1) वज्र।
(2) यमुना।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

साङ्केतिकं यदभिधानमजामिलोऽपि
वक्त्रे निधाय भवसागरमुत्ततार।
अङ्के तमेव वसुदेवकृती दधानो
भानोः सुतामतरदित्यपि किं विचित्रम् ॥५५॥

यशोदाङ्के कृष्ण स्थापनम्

वसुवदसुवदङ्के नन्द पङ्केरुहाक्ष्या-
स्तुमुरसि वसुदेवो वासुदेवं निधाय।
तदुदरभुवमाद्यामाद धन्मोघमाद्य-
न्मति पुरमनुलेभे प्राप्ततद्वाक् प्रतीतिः ॥५६॥

रूपं गोपय गोपयेति पितरौ प्रागेव यत्प्रोचतु-
स्तामाज्ञामतिगौरवादिव तयोराधाय मूर्ध्नि द्रुतम्।

विशेष—श्रीकृष्णके जन्मकी प्रसन्नतायुक्त श्रीयमुनाका बड़ा ही मनोहारी वर्णन है ॥५४॥

अनुवाद—संकेत द्वारा पुत्र नारायणका नाम मुखमें लेकर अजामिल भवसागरको पारकर गया। वसुदेवने उन्हीं नारायणको जब अपने गोदमें ही कर लिया और भानुसुता यमुनाको पारकर गये, तो इसमें आश्चर्य ही क्या है ? ॥५५॥

विशेष—'अजामिल' कान्यकुब्जका रहनेवाला ब्राह्मण था। यह बाल्यावस्थामें बड़ा ही पितृ-भक्त था। एक वेश्यागामी पुरुषके आचरणके प्रभावसे यह महान् कुकर्मी हो गया। और वेश्यागामी हो जानेपर बाल, वृद्धोंकी हत्या पशुओंके मांससे जीविका चलानेवाला बन गया। महात्माओंके प्रसादसे अपने पुत्रका नारायण नाम रख दिया, और मरते समय उसी पुत्र नारायणका नाम लेनेसे वैकुण्ठ लोकको चलागया था ॥५५॥

यशोदाकी शैयापर कृष्णको छोड़ना

अनुवाद—वसुदेवजी नन्द पत्नी यशोदाके समीप गये और बालकृष्णको वहाँ रखकर, उनके उदरसे उत्पन्न आद्यमायाको उठाकर बालकृष्णकी वाणीपर विश्वास करके अपने स्थानको चले आये ॥५६॥

विशेष—भागवतमें श्रीकृष्णने कहा था—"यदि कंसाद् विभेषित्वं तर्हि मां गोकूलंनय।" यदि तुम्हें कंससे भय है तो मुझे गोकुलमें पहुँचा दो ॥५६॥

अनुवाद—माता-पिताने जो कृष्णको देखकर कहा था कि रूप छिपाओ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तादृग्भीमतमस्विनीमगणयन्मेघान्नदीलङ्घनं
रूपं गोपयितुं जगाम भगवान् गोपाकुलं गोकुलम् ॥५७॥

कंसाय योगमायार्पणम्

अथ वसुदेवे दैवके क्रोडे कुमारीमर्पयत्येव कंस दैत्यानुचारिणस्तदनु सन्धान कारिणः किमजनि किमजनीति व्याह[1]रन्तो दूराद् दुरात्मानः परिवव्रिरेन्तःपुरं परितः ॥५८॥

द्रुतमवधीर्य धैर्यैक महोदधिं वसुदेवं कुररीमिव विक्रोशन्तीमहह तीव्र बाधया देवकीमपि नव शावकीं तामवरुन्धानामनामादरेण ताम पर्वाय तर्जनगर्जजर्जरित दिग्दिगन्तरास्तस्याः क्रोडात्क्रीडन्त इव तामादाय श्येना इव कपोतिकापोतीम्, शार्दूला इव सुरभिकिशोरीम्, पारीन्द्रा[2] इव दम्भादिभीकल[3] भीम् व्याधा इव मृगीबालिकाम्,

---

अतः उन्हें गौरव प्रदान करनेके लिये उन दोनोंकी आज्ञाको शिरोधार्य करके मेघके कारण अँधेरी रात्रीमें नदी-लङ्घनकी चिन्ता न करते हुए रूप छिपानेको गोपोंसे भरे गोकुलमें भगवान् चले गये ॥५७॥

कंसको योगमाया समर्पण

अनुवाद—इसके पश्चात् वसुदेवने उस बालिकाको देवकीकी गोदमें रखा कंसके द्वार रक्षकोंने बालकका जन्म सुनकर क्या हुआ, कैसा हुआ ? आदि शकपूर्वक उन दुष्टोंने चारों ओरसे अन्तःपुरको घेर लिया ।।५८।।

अनुवाद– उन्होंने वसुदेवको वहाँसे हटा दिया—यद्यपि वसुदेव धैर्यके समुद्र थे तथापि उनके बलसे थोड़ा विचलित हुए और हटे, उग्र बाधाके कारण कुररी गायकी तरह विलाप करनेवाली उस देवकीको भी हटा दिया, जब नवजात बालिकाको देवकीने छिपानेकी चेष्टाकी तो तर्जन गर्जन करके दिशाओंको गुञ्जित करनेवाले उन रक्षकोंने देवकीकी गोदसे खेलते हुएकी तरह ले लिया । जिस तरह कबूतरीके बच्चेको बाज उठाता है. अथवा जिस प्रकार गायकी बछियाको सिंह उठाता है अथवा दम्भ आदि भयसे भीति उत्पन्नकर शावकीको गजेन्द्र अपने साथले जाता है अथवा जैसे मृग शिशुको व्याधले जाता है या कामान्ध पुरुष जैसे

---

(1) कथयन्तः ।
(2) पारीन्द्रः, [पृषो० ह्रस्वः] सिंहः ।
(3) गजशावकीम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामान्धा इव मतिधैर्य सम्पदं व्याधूयेव सुकुमार तनुकान्तिम्, झंझा इव वल्लरीशोभाम्, निदाघवासरा इव कोकिलाकाकलीम्, अवग्रहा इव कादम्बिनीजलधाराम्, कीनाशकिङ्करा इव पाञ्चभौतिकाकृतेर्जीवात्मनो मूर्त्तिम्, हेमन्तदिवसा इव सरोजिनीलक्ष्मीम्, अक्षीणबल शालिनो निर्ययुस्त्वरितं त्वरितगति विजृम्भमाण निःश्वासपरम्पराः श्रमजलमेदुरमेदस्विवर्ष्माणो जलधरजलधोरणीपिच्छिले पथि प्रस्खलन्तोऽपि कृतकृत्या इव धावन्तो भोजेन्द्र[1] कराम्भोजेषुकुमारीमिव केवलं कुमारीमारोपयामासुः ॥५९॥

योगमायायाः मारणोपक्रमः

स पुनरविचारितपूर्वापरः पामरो भगिन्या इति भागिनेयीमिति स्त्रियमिति बालिकामित्यविचिन्तयन्नेव मर्यादामतिवर्त्तमानो जीवैकलोलुपः शिलायां पातयितुमारेभे ॥६०॥

अपनी बुद्धिकी धैर्य सम्पत्तिको खो देता है या सुकुमार शरीरकी शोभाको नष्टकर के झंझावात जैसे लताओंकी शोभा नष्टकर देता है, ग्रीष्म-कालका दिन जैसे कोयलकी वाणीको नष्टकर देता है, वर्षाका अभाव जैसे मेघकी जल-धाराको नष्टकर देता है, यमके दूत जैसे जीवके पाँच भौतिक शरीरकी मूर्त्तिको नष्टकर देते हैं, शीत कालके दिन जैसे कमलिनीकी शोभाको नष्टकर देते हैं, वैसेही अक्षीण बलशाली, तत्काल निकले और त्वरित गतिके कारण बड़े-बड़े श्वांस लेते हुए श्रमके स्वेद-बिन्दुओंसे बड़े आकारवाले शरीरको शोभित करते हुए बादलोंके जल प्रवाह पंकयुक्त मार्गोंमें, गिरते हुए भी, अपनेको कृतकृत्य मानते हुएकी तरह दौड़ते हुए उस बालिकाको देवकीकी गोदसे लेकर कंसके हाथोंमें दे दिया ॥५९॥

विशेष--बालिकाको कंसने देवकीके हाथोंसे लिया और शिलापर पटक दिया था ऐसा भागवतमें उल्लेख है। कारागारके द्वारपर एक बड़े आकारकी शिलापर वसुदेवजीके कई बालक पटककर मार दिये थे उसीपर इस कन्याको मारना चाहा परन्तु वह कन्या साधारण बालिका नहीं थी वह थी प्रभुकी अचिन्त्य शक्ति अतः कंसके हाथसे छूटकर आकाशमें चली गई थी ॥५९॥

अनुवाद—उस दुष्ट कंसने पूर्वापरका विचार न करके कि यह लड़की है बहिनकी है मेरी भानजी है। मर्यादाका उल्लंघन करते हुए अपने जीवनके लोलुप उसने उसको शिलापर पटकना चाहा ॥६०॥

---

(1) भोजेन्द्रः=कंसः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

दिशि दिशि जलदा रुदन्त इव नर्दन्तो मुमुचुरजस्रमस्रूणीवाम्बुपूराणि ॥६१॥

तदनुतापमसहमाना इव सौदामन्योऽपि जज्वलुस्तरलाः ॥६२॥

करुणार्द्रा इव भित्तयो निपेतुस्तत्क्षण बहलझंझानिलव्याजात् । प्राणानिव दिग्वाम-लोचना मुमुचुरक्षेमं तद्दीक्षितुमिवाक्षमाः ॥६३॥

क्षमारुहैः सह गृहा आत्मन एवोररी चक्रिरे भङ्गम् ॥६४॥

अतिचण्डमान-पवमान-जव निवह-निपात्यमान धरणीतल-धूयमान पङ्कपूर-परिपूर्य माणपुरुभवनमूर्द्ध बद्ध ध्वज पट-कपटेन कीर्त्तयो निपत्य मलीमसायन्तेस्म ॥६५॥

नगरनिवासिनां दशा वर्णनम्

पौराः केचन दुर्मनोभूय भेजिरे दूरम्, केचन चोलाञ्चलेनाननमाच्छाद्य रुरुदुरेव दीर्घकालम् ॥६६॥

काश्चन पौराङ्गनाः पुनरात्मनो रसनाग्रं दशनाग्रेण सन्दश्य पाणिभिरुत्ताडयामासुरुरांसि ॥६७॥

अनुवाद—दिशाओंमें रोते हुएकी तरह गरजते हुए बादलोंने आँसुओंकी तरह जल-धाराओंकी झड़ी लगादी ॥६१॥

अनुवाद—इस दुःखको सहन न करते हुएकी तरह बिजली चञ्चल होकर चमकने लगी ॥६२॥

अनुवाद—तत्काल झंझावातके बहाने मानों करुणासे आर्द्र होकर ही दीवारें गिरने लगीं। दिशारूप स्त्रियाँ मानों इस कठोरताको देखनेमें असमर्थ होती हुई अपने प्राणोंको छोड़ने लगीं ॥६३॥

अनुवाद—वृक्षोंके साथ गृहोंने भी अपने विनाशको स्वीकारकर लिया।

अनुवाद—अति वेगसे चलते हुए पवनके वेगसे पृथ्वीपर गिरे हुए और उड़ते हुए तथा कीचड़से सने हुए बड़े-बड़े भवनोंपर बँधे हुए ध्वजाओंके वस्त्रोंके बहाने मानों कीर्ति मलिन होती हुई दीख रही थी ॥६५॥

नगर-निवासियोंकी दशाका वर्णन

अनुवाद—कोई नगरके लोग उन्मत्त होकर दूर चले गये, कोई वस्त्रके अञ्चलसे मुँहको ढँककर देरतक रोते रहे ॥६६॥

कोई-कोई स्त्रीतो अपने जिह्वाके अग्रभागको दाँतोंसे काटकर हाथोंसे छाती पीटने लगी ॥६७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

काश्चन जनित विलापाः कुलपांशुलः कुलपांशुलोऽयमिति निनिन्दुरेव निभृतेष्वसदवतंसस्य कंसस्य निजवंशस्यापि । ६८॥

किमपि कर्तुं व्याहर्तुमप्यशक्नुवाना उग्रसेनादयोऽपि सनिःश्वासमभिदधुर्मुहुरपि हाहेति ॥६९॥

द्रुतमुपचीयमान-निर्वापित प्रदीप - परम्परा व्याजेनराजतेजांसीव सर्वतः प्रशान्तानि ॥७०॥

अति संरम्भाकुलजम्भाराति प्रमुख गीर्वाणैः क्षिप्तास्तप्तायःपिण्डा इव दम्भोलयो ददृशिरे लोकैः ॥७१॥

अनुचितमेतादृशानुचितकर्मावलोकनमिति भुविदिवि चान्तर्दधिरे नक्षत्रमण्डलानि निबिड घनचयोपचीयमान तिमिरमिषेण ॥७२॥

दिशः पुपूरिरे दुर्यशोभिरसुरराजस्य ॥७३॥

असदवलोकन वर्धमाना स्तोक शोकैरिव कोकैः करुणमुदीरितं पुरदीर्घिकासु ॥७४॥

अनुवाद—कोई स्त्रियाँ विलाप करती हुई 'कुल कलंक है, कुल कलंक है" यह इस प्रकार कुल दूषण कंसकी तरह तथा अपने वंशकी निन्दा करने लगीं ॥६८॥

अनुवाद—कुछ करनेको अथवा कहनेको असमर्थ होते हुए उग्रसेन आदि भी लम्बी-लम्बी साँसें लेकर हा-हाकरने लगे ॥६९॥

अनुवाद—तेजीसे बढ़े हुए तथा शान्त किये हुए दीपकोंके बहाने मानों राजाओंके तेज शान्त हो गये ॥७०॥

विशेष--दुःखित नागरिकोंकी ललनाओंका सजीव चित्रण है और कवि की समुचित कल्पना है ॥७०॥

अनुवाद—अति क्रोधमें भरे हुए इन्द्र आदि देवताओंके द्वारा फेंके हुए तप्त लौह पिण्डकी तरह 'वज्र' लोगोंके द्वारा देखे गये ॥७१॥

अनुवाद—ऐसे अनुचित कर्मका देखना भी अनुचित है इसलिये पृथ्वी और आकाशमें अत्यन्त बादलोंके बढ़े हुए अन्धकारके बहाने मानों नक्षत्र मण्डल भी छिप गया ॥७२॥

अनुवाद—उस असुर राज कंसके अपयशसे सब दिशायें भरगईं ॥७३॥

अनुवाद—उस कंसके अनौचित्यके अवलोकनसे बढ़े हुए अत्यन्त शोकसे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करिवर-कर-पुष्करादिव पुष्करिणी समीरणो[1]पनीयमाना भुजग-पति-भोग-पीवराद् भोजभूपतेर्भीम भुजदण्डाग्रतो मनुज - किशोरी कपट-पटीयसी राजश्रीरिव नभसि रंहसोत्पतन्ती त्रिभुवन-भवन-विभाविनी भव-भाविनी व्यलोकि राजलोकेन ।।७५।।

भवानीरूप वर्णनम्

अथ तस्याः पदकमलनाभिकमलकरकमलानन-कमलायत दृक्कमलस्रक्कमलादि समुल्लासैरम्बरतलमखिलमलोकत कमलमयं सकल-राजलोकः ।।७६।।

व्योम्नि स्यन्दन[2] चारिणी, चरणयोः शिञ्जानमञ्जीरिणी
मध्ये मेखलिनी करे वलयिनी, बाहौ च केयूरिणी ।
ग्रीवायां मणिहारिणी, श्रवणयोरत्नोत्तमोत्तंसिनी
चार्वङ्गेऽरुण चोलिनी, मुकुटिनी, मौलौ[3] भवानी बभौ ।।७७।।

मानों चकवा चकवीकी तरह करुणतापूर्वक पुरकी वावलियोंमें कोलाहल किया गयाहो ।।७४।।

अनुवाद—हाथीकी सूँड़के कमलसे हिलाई गई पुष्करिणीके सुगन्धित पवनके समान, सर्पके स्थूल देहके समान स्थूल काय भयङ्कर राजा कंसके अग्र-भागसे, मनुजकुमारी कपट कला निपुणा, राज्यलक्ष्मीकी तरह आकाशमें वेगपूर्वक, तीनों भुवनोंके भवनोंको चमत्कृत करती हुई उछलकर जाती. राज लोगोंने देखी ।।७५।।

भवानी रूपका वर्णन

अनुवाद—इसके अनन्तर उस योगमायाके चरण, नाभि, कर तथा मुख-कमल देखे, और उसके नेत्रकमल, मालाके कमल देखकर सम्पूर्ण आकाशको कमलमय ही देखा ।।७६।।

अनुवाद—आकाशमें रथपर चलनेवाली, चरणोंमें शब्द करते हुए घुंघरूवाली, मध्यमें केयूर पहने हुए, ग्रीवामें मणियोंका हार पहने हुए, कानोंमें रत्नोंका उत्तम भूषण धारण किये हुए, सुन्दर शरीरपर लाल चोला पहने हुए, मस्तकपर मुकुट धारण किये हुए भवानी शोभित हो रही थी ।।७७।।

---

(1) वायुः ।
(2) रथः ।
(3) शिरसि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ध्यायद्वीरमनस्विनी पदतले चन्द्रानने हासिनी
हस्ताग्रेषु महास्त्रिणी त्रिगुणिनी नेत्रोत्पलेषु त्रिषु ।
सर्वाङ्गेऽसित रूपिणी हृदि पुनर्वैशद्य सम्भारिणी
कंसध्वंसनशंसिनीश - गृहिणी कैर्नैक्षि नैकक्षणम् ॥७८॥
निर्यातेऽपि पयोधरे घनमय व्योमत्विषा कुर्वती
विश्रान्तास्वपि चञ्चलासु सतडिद्भासा विभूषावलेः ।
एकेन्दोर्विरहेऽपि पूर्ण विधुना वक्त्रेण विद्योतिता
नैरन्त्येऽपि निरन्तरं दिविषदां[1] वृन्दैर्बभौ पार्वती ॥७९॥

अनुवाद—चरणोंका ध्यान करते हुए वीरपुरुषोंके मनको प्रसन्न करनेवाली हाथोंमें महास्त्रोंको धारण किये हुए तीनों नेत्ररूपी कमलोंमें तीनों गुण धारणकिये हुए सब अङ्गोंमें कृष्ण रूपवाली हृदयमें विशद सुन्दर भाव धारणकिये हुए, कंसके विनाशकी सूचना देनेवाली वह शङ्करकी पत्नी एक क्षणभर किसने नहीं देखी, अर्थात् सभीने उसको देखा ॥७८॥

विशेष—श्रीमद्भागवतमें उसके आयुध, 'धनुष, शूल, चक्र, बाण, चर्म, तलवार, शङ्ख, चक्र, गदा' आठ लिखे हैं—अदृश्यतानुजा विष्णोः सायुधाष्ट महाभुजा ॥ ९ ॥

"दिव्यस्त्रगम्बरा लेपरत्नाभरण भूषिता ।
धनुः - शूलेषु - चर्मासि - शंख-चक्र-गदा-धरा ॥
सिद्धचारण गन्धर्वैरप्सरः किन्नरोरगैः ।
उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत्" ॥ भा. १०।४।११

अनुवाद—बादल न होनेपर भी अपनी कृष्ण कान्तिसे आकाशको बादलों से युक्त-सा बनाती हुई, बिजली शान्त होनेपर भी भूषणोंकी कान्तिसे बिजलीकी प्रतीति-सी कराती हुई, एक चन्द्रमाके न होते हुए भी मुख रूपके द्वारा पूर्ण चन्द्रकी शोभा करती हुई, कोई समीपमें नहीं था फिर भी देवोंके समूहसे वह पार्वती अत्यन्त शोभित हुई ॥७९॥

विशेष—योगमायाका स्वरूप श्यामवर्णका था, उसके भूषण बिजलीकी-सी चमकवाले थे और स्वयं पूर्ण चन्द्रानना थी ॥७९॥

(1) देवाः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नमज्जम्भाराति स्तुति मुखरिताम्भोरुहजनुः
पतन्मूर्द्धा बद्धाञ्जलि हुतवहाम्भः पतितनु ।
घृताचीसध्रीचीगणकृत समीचीन नटनं
बभौ व्योम स्वर्गादधिकमपि दुर्गाहित पदम् ॥८०॥

किमपरमाहो महीलोकेऽतस्त्रयोदशलोकवासिभिरेव कामचारिभिरासिषेवे नभः प्रतोली[1] ॥८१॥

भूलोकैरपि निजरूपाणि तेषामेव रथदर्पणार्पणान्नि सभूचक्राण्यदृश्यन्तेति चतुर्द्दशभुवनमयमभूदेव-तत्क्षणं व्योम ॥८२॥

तदिदं चरण रजसोपपादित कोटि-कोटि ब्रह्माण्ड घटनायानापूर्वं मन्यते मुनिभिः ॥८३॥

धनेशः कीनाशो नयन पथलेशोदयकृते
कृत प्रादक्षिण्यं पदयुगदिदृक्षाकुलमती ।
परिभ्रामं भ्रामं गमितबहुयामं व्यचरतां
न लेभाते भाते नभसिपुरजाते न तदपि ॥८४॥

अनुवाद—उस समय, इन्द्र प्रणाम करने लगा, ब्रह्मा-स्तुति करने लगे, अग्निने मस्तकपर अंजलि बाँधकर प्रणाम किया, वरुण भी उपस्थित थे इनसे आकाश सुशोभित था, घृताची आदि अप्सराओंका नाट्य हो रहा था। ऐसा वह आकाश दुर्गाके चरण रखते ही स्वर्गसे भी अधिक शोभायमान हो गया था ॥८०॥

अनुवाद—अधिक क्या, इस भूलोकसे पृथक् तेरह लोकोंके रहनेवाले तथा इच्छानुसार विहरण करनेवालोंने उस समय आकाशरूपी प्रतोलीका सेवन किया ॥८१॥

अनुवाद—तथा भूलोकने भी अपने रूपोंको रथरूपी दर्पणोंको अर्पितकर रखा था अर्थात् रथके दर्पणमें भूलोक वासियोंका प्रतिबिम्ब पड़ता था इस कारण भूचक्र सहित सब दिखलाई पड़ता था, ऐसा प्रतीत हो रहा था मानों चौदह भुवन यहीं हैं ॥८२॥

अनुवाद—इनके चरणोंकी रजसे करोड़ों ब्रह्माण्ड निर्मित हैं ऐसा सभी मुनियोंने स्वीकार किया ॥८३॥

अनुवाद—उनके चरण युगलके दर्शनोंके लिये आकुल बुद्धिवाले कुबेर

(1) वीथी।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सरक्षोयक्षोडु ग्रह निवह गन्धर्व परिष-
त्स्वयम्भूजम्भारि प्रणुत चरणाम्भोरुह युगाम् ।
स तां दृष्ट्वा कंसो विगलदवतंसश्रुतिमुहु-
र्धुनानो मूर्द्धानं मनसि गणयामास विपदम् ॥८५॥

योगमाया वचनम्

अथ भयमवधाय भोजभूपतेर्भगवती भ्रूभङ्गस्फुरदखिल सृष्टि-स्थिति प्रलयकेलिरट्टाट्टहास मुखरिताकाशदिङ्मुखालिरभाषत सोपहासम् ॥८६॥

मा भैषीः कंस नासि त्वमिह स महिषो नो निशुम्भो न शुम्भो
नो वा त्वं रक्तबीजो रणभुवि विजयी नापि चण्डो न मुण्डः ॥
उद्दण्डो युद्धशौण्डः पुनरपि भविता कोऽपि शुम्भो निशुम्भः
संभूतिर्मे तदर्था व्रज[1] भुवि समभूत्तेऽभ्रकालः स कालः ॥८७॥

और यमराज भी चाहते थे कि हमें नेत्रोंके द्वारा दर्शनोंका लेश ही प्राप्त हो जाय अतः वे घूम-घूमकर बहुत समय व्यतीतकर रहे थे परन्तु भीड़ में वे भी असमर्थसे घूम रहे थे ।८४॥

अनुवाद—राक्षस, यक्ष, नक्षत्र, ग्रह समूह, गन्धर्वगण, ब्रह्मा - इन्द्र आदि द्वारा पूजित चरण उस महामायाको कंसने देखा । कंसके कानोंका आभूषण खिसककर गिर गया था । बार-बार मस्तकको कम्पित करके भावी विपत्तिका ज्ञान उसे हो गया था ।।८५॥

योगमाया कथन

अनुवाद—इसके पश्चात् भगवतीने ताड़ लिया कि कंस भयभीत है, वह भृकुटीके भङ्गमात्रसे सम्पूर्ण सृष्टिकी रक्षा करती है, प्रलय करती है, उसने अपने अट्टहास द्वारा सभी दिशायें गुञ्जितकर दीं थीं, हँसती उस देवीने कंससे कहा ॥८६॥

अनुवाद—हे कंस ! तुम मत डरो, तुम न तो महिषासुर हो, और न शुम्भ या निशुम्भ हो, न तुम रक्त बीज ही हो, रणभूमिमें विजय प्राप्त करनेवाले चण्ड-मुण्ड भी तुम नहीं हो । भविष्यमें युद्धमें कुशल शुम्भ-निशुम्भ कोई फिर भी होगा उसीके लिये मेरी उत्पत्ति हुई है । ब्रजभूमिमें अब तुम्हारा काल उत्पन्न हो गया ॥८७॥

---

(1) इयं कथा भा० १० स्कं ४ अध्याये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगमायायाः—विन्ध्याचलवासनिरूपणम्

अथ सगणहंसहंसवाहन-पुरुहूत-हव्यवाहन-काल-कौणप-कुल-पाल-वरुण-गन्धवाहन-धनद-महेशानैरपि रथ मण्डल मण्डनी - कृतमणि-मुकुर - कोटि बिम्बस्व प्रतिबिम्ब कोटि - कपट - कलित - कलेवरकदम्बैरनुगम्यमाना ससध्रीचीगण - घृताची - रम्भोर्वशीवशीकृत-निखिल-तिलोत्तमा-मदन मदालस-मदालसादिसुरवार सीमन्तिनी-वार-दर्शित परमहर्षित-महर्षि-देव-दानव-यक्ष-रक्षो-मानव-प्रतिनव-नृत्यकृत्य-कौशलारम्भा, अथ गणताड्यमान-पटु पटह-कोटि डमरु-डिण्डिम-भूरि-भेरी-गभीर-दुन्दुभि-बहुल-झल्लकी-निकर-झर्झर-मुरज-वेणु-मर्दल-ध्वान मर्दिताखण्ड ब्रह्माण्ड भाण्डोदराति मधुर-गान गुण-गर्व-दुर्वार-गन्धर्व-गन्धर्ववदन गणगीय मान चरणाम्भोजमहिमपरम्परा रथनिकर निकाम-वर्द्धमान मधुरमन्द्रतार-तरध्वनि-धोरणो भरितचतुर्दश भुवनावनी-

---

योगमायाका विन्ध्यपर वास

अनुवाद—इसके उपरान्त गण सहित विष्णु भगवान् इन्द्रदेव, अग्नि-देव, काल, कौणप, कुलपाल, वरुण, पवन, कुबेर एवं महेशसे अनुगत वह देवी हो गई, ये सभी देव, रथ मण्डलमें भूषित अनेक मणि-मुकुटके बिम्बोंके द्वारा अपने शरीरको स्वयं ही विभूषितकर रहे थे।

सध्रीचीगण सहित घृताची, अप्सरा, रम्भा, उर्वशीके द्वारा वशकी हुई तिलोत्तमा तथा मदनके मदसे अलसित मदालसा, आदि देवोंकी स्त्रियोंके दिखाये हुए तथा परमहर्षित महर्षि, देव, दानव, यक्ष, राक्षस मनुष्योंको नये-नये नृत्य-कृत्यको सुन्दर कौशलके रूपमें उस देवीने दिखाया। उस समय सुन्दर नगाड़े बजाये जाने लगे। डमरू, डिंडिम तथा बहुत भेरी गम्भीर दुन्दुभी बहुत-सी झल्लकी, झर्झर, मुरज, वेणु, मर्दलसे सम्पूर्ण ब्रह्माण्ड मण्डल व्याप्त होगया था।

मधुर गुणगानके गर्वसे युक्त गन्धर्व अपने मुखोंसे देवीके चरणोंकी महिमाका गान करने लगे थे। रथोंकी बढ़ी हुई मधुर सुन्दर क्रमबद्ध ध्वनि भारसे चौदह भुवनभर गये थे। वह देवी विन्ध्याचलके ऊपर विराजमान हुई मानों त्रिलोकीके मध्यभागमें स्थित प्रासादपर ही वह यशोदानन्दिनी महामाया विराज-मान हुई हो ॥८८॥

विशेष—भागवतमें योगमायाने कहा है—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विंध्यावनी धरमूर्धानं त्रिभुवनैक पुरमध्य-प्रासादमिवाध्युवास, नन्दिनी यशोदायाः ॥८८॥

यद्वन्ध्यतमं विन्ध्योर्विधायाज्ञां दधेगुरोः ।
तदभूत्पार्वती धाम गुर्वधीना हि सिद्धयः[1] ॥८९॥

इति श्रीमन्मित्रमिश्रकृतावानन्दकन्द चम्पू काव्ये
द्वितीयोऽयमुल्लासः ॥ २ ॥

किं मया हतया मन्द जातः खलु तवान्तकृत् ।
यत्र क्व वा पूर्व शत्रुर्मा हिंसीः कृपणान् वृथा ॥
इति प्रभाष्य तं देवी माया भगवती भुवि ।
बहुनाम निकेतेषु बहुनामा बभूवह ॥ भा. १०।४।१३

जब योगमायाको श्रीकृष्णने बुलवाया था तब ये बतला दिया था कि भूमिमें तुम्हारी अनेक प्रकारसे लोग पूजा करेंगे और अनेक स्थानोंमें तुम पूजा प्राप्त करोगी उन नामोंमें—दुर्गा, चण्डिका, भद्रकाली आदि नाम तथा विन्ध्याचल नामका संकेत स्पष्ट है—

नामधेयानि कुर्वन्ति स्थानानि च नरा भुवि ।
दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥
कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च ।
माया नारायणीशानी शारदेत्यम्बिकेति च ॥ भा. १०।२।१२

अनुवाद—विन्ध्याचल-पर्वतने अपने गुरुकी आज्ञा मानकर जिस वन्दनीय उद्यमको किया है उसीके फलस्वरूप उसके शिखरपर पार्वतीजीका परमधाम निश्चित हुआ ! सिद्धियां गुरुओंके ही आधीन होती हैं ॥८९॥

विशेष—विन्ध्यने गुरुके उपदेशको माना था अतः उसे पूज्य पार्वतीके प्रासाद ग्रहणका फल मिला है । अन्तिम वाक्य सूक्ति है ॥८९॥

इति सप्ताचार्य डा० श्रीवासुदेवकृष्ण चतुर्वेद शास्त्रि विरचिते-श्रीवरानन्दिनी
नाम्नी भाषाटीका सहिते श्रीआनन्दकन्द चम्पू काव्ये
कृष्णजन्मवर्णननामद्वितीय उल्लासः ॥ २ ॥

---

(1) सूक्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ तृतीय उल्लासः

यशोदाङ्के कृष्णवर्णनम्

अथ कुमारीमादाय गच्छत्येव वसुदेवे परिणत शरदिन्दुमण्डलः क्रोडे क्रीडतीति स्वप्नमनुपश्यन्ती द्रुतमुप जातजागरा काचमन्वेषमाणा काञ्चनमिव कौप सलिल-मनुगवेषमाणा गङ्गाप्रवाहमिव, सा कोट-तरुमर्थयमाना कल्पतरुमिव; शम्बूकमनुसन्दधाना दक्षिणावर्त्त शङ्ख मिव; इन्धनमनुधावमाना चन्दनमिव; [1]कर्कन्धूफलमन्विच्छन्ती द्राक्षा-

---

यशोदाको गोदमें कृष्ण-वर्णन

अनुवाद—जब वसुदेव कुमारी कन्याको लेकर गोकुलसे चल दिये उसके उपरान्त (यशोदाने श्रीकृष्णका दर्शन किया) "पूर्ण शरद-ऋतुका चन्द्रमा गोदमें खेल रहा है" स्वप्न देखा और तत्काल शय्यासे उठी और कांच ढूँढनेवालेको जैसे कांचन मिल जाय अथवा कूपके जल ढूँढनेवालेको गङ्गाजल मिल जाय अथवा कोटवृक्षको चाहनेवालीको मानों कल्पवृक्ष मिलगया हो, अथवा सीप ढूँढनेवालेको मानों दक्षिणावर्ती शङ्ख मिलगया हो, इन्धन चाहनेवालीको मानों चन्दन मिलगया हो बेर ढूँढनेवालीको मानों द्राक्षाफल (मुनक्का) मिलगया हो, अथवा किसी गायको चाहनेवालीको मानों कामधेनु मिलगई हो, कुटीर (झोंपड़ो) चाहनेवाली को मानों महाप्रासाद मिलगया हो, नीवार (संवां) चाहनेवालीको मानों तण्डुल राशि मिलगई हो पाषाण पर्वतको चाहनेवालीको मानों सुमेरु (सोनेका पर्वत) मिला हो, नौका बुलानेवालीको मानों नदीका पार मिलगया हो, जन्मसे जो बकरे को ढूँढ रही हो उसे मानो महागज मिलगया हो, सहारेको अन्धा व्यक्ति लकड़ी चाहता है किन्तु उसे दिव्य दृष्टि मिलगई हो, धूपसे रक्षाके लिये पत्तोंको चाहने-वालीको मानों दिव्य छत्र मिलगया हो, स्नानके लिये क्षार-समुद्र चाहनेवालीको मानों सुधासागर मिलगया हो, लोष्ठ (मिट्टीका पिण्ड) चाहनेवालीको मानों श्रेष्ठ निधि मिलगई हो, बहुत दिनसे किसी भी कुमारको गोदमें खिलानेकी यशोदाने इच्छाकी थी आज वेदसे भी न समझमें आनेवाले हरि भगवान्‌को हठ-पूर्वक अपनी गोदमें बैठे देखा ॥ १ ॥

---

(1) बदरीफलम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

फलमिव; कामपि धेनुं कामयमाना कामधेनुमिव; कुटीरमभिकाङ्-क्षन्ती महाप्रासादमिव, नीवार कणमनुचिन्तयन्ती तण्डुलराशिमिव; दृषद्दुर्वीधरमभीष्टयन्ती सुमेरुमिव; औषधमनुमार्गन्ती नैरुज्यमिव; नौकामाकारयन्ती स्रवन्तीपारमिव; अजमाजन्म मृगयमाना महागज-मिव, अन्धयष्टिमुद्दिश्ययन्ती दिव्यदृष्टिमिव, आतपत्राणाय पत्रमभिलिप्सन्ती दिव्यातपत्रमिव, अवगाहनाय क्षाराम्भोधि मोह-माना सुधाम्भोधिमिव, लोष्टमनुचेष्टमाना श्रेष्ठनिधिमिव, कमपि कुमारं सुचिरमासाधिरूढयन्ती निगमनिगूढं हठान्निजाङ्कमधिरूढं हरि-मुपलेभे व्रजेन्द्र सुन्दरी यशोदैव ।। १ ।।

अथ सपदि समुत्तिष्ठन्त्या गृहान्तरालमनन्धकारमनुभवन्त्याः सर्वानिर्वचनीयाभिरामाभिरपि श्यामलाभिरभिभावयन्तीभिरपि प्रदीप-शोभाः शोभमाने कमनीय कौमार वपुषि सुदिनप्रभातभात-कमल-कोष - कन्दरे सुचिरमुपोषित चञ्चरीकीव[1], परिणत सुधाधामनि

विशेष—(१) गम्य उत्प्रेक्षा अलङ्कार है। (२) यशोदाको कृष्ण कैसे मिले उसकी सुन्दर उत्प्रेक्षायें विभिन्न वाक्योंमेंकी गई हैं। कविने कल्पनाकी है कि यशोदाने स्वप्नमें कृष्ण-शिशुको गोदमें क्रीड़ा करते देखा। साहित्यमें नन्दद्वारा देखे गये स्वप्नकी चर्चा है—

"श्यामं कोमलगात्रमिन्दुवदनं वालंस्तवांकेमया हृष्टः।" ।। १ ।।

अनुवाद—इसके अनन्तर यशोदा उठी और उसने अन्तर्ग्रहमें प्रकाश देखा--सभीमें अनिर्वचनीय अत्यन्त सुन्दर श्यामल शोभासे दीपकोंकी शोभाको तिरस्कृत करनेवाले कमनीय कुमारके शोभित होनेपर, प्रातःकाल अच्छे दिन कमल-कोषके भीतर देरतक उपोषित भ्रमर पत्नीकी तरह पूर्ण चन्द्रमे बड़े-बड़े दिनवाले जेठ मासमें सूर्यकी कठिन किरणोंसे विकल चकोरीकी तरह, अकस्मात् प्राप्त हुई सुवर्ण राशिमें धनहीन मनुष्यकी चित्त वृद्धिकी तरह, नवीन सुन्दर शस्य कन्दलिकाओंसे शोभित क्षेत्र (खेत) में क्षुधित मृग शावकीकी तरह, अत्यन्त रम-णीय शोभा सौन्दर्यमें विषयोंमें लिप्त बुद्धिकी तरह (अत्यधिक सुन्दरताको देख-कर बुद्धि पथसे विचलित हो जाती है और वह विषयोंमें ग्रस जाती है) अधिक गहरे दलदलमें फँसी हुई वृद्ध गौकी तरह, हठपूर्वक यशोदाकी बाणी रुक गई ।। २

---

(1) पुत्तलिकेव।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्राघीयो दिवस कठोरज्यैष्ठनिष्ठुरारुणकठिनमयूख हूयमाना चकोरीव अकस्मादुपचितहैमभूमनि दरिद्रचित्तवृत्तिरिव, अभिनवकल मकन्दल शालिनी केदारे क्षुधितकुरंगकिशोरीव, अतिरमणीयरामणीय लवणिमनि विषयावेश-वशीकृतशेमुषीव, अधिक जरत्तर-गौरिवागाधसुधापङ्कसंकटे हठेन निपतन्ती निर्ममज्ज गौर्यशोदायाः ॥ २ ॥

नन्दोत्सवः

स्वलोकमाकारयितुं रयेण,
चिरं विवक्षोरपि पक्ष्मलाक्ष्याः ।
प्रियं परिज्ञाय ह्रियेव वाणी,
नासीत्तदानीं बहिरास्यगेहात् ॥ ३ ॥
समं तदा गोकुलचक्रमासी,
दुन्निद्रमाशीर्ष तनूरुहेण ।

विशेष—भगवान् श्रीकृष्णके श्यामल पूर्णचन्द्र कान्तिवाले स्वरूपको देखकर यशोदाका गला भर आया और उसकी दशा हो गई जो दशा ऊपरलिखित अवस्थाओंमें, भ्रमरी, चकोरी, धनहीनको चित्तवृत्ति, भूखी मृगशावकी विषय-लिप्त बुद्धि, और दलदलमें फँसी गौकी होती है अर्थात् उसे यह स्वप्नमें भी कल्पना नहीं थी कि उसके अङ्कमें इस वृद्धावस्थामें कुमार क्रीड़ा करेगा और उसमें भी इतना सुन्दर अनिर्वचनीय कुमार जिसे देखकर वह स्वयं मुग्ध है जड़ हो गई है ॥ २ ॥

नन्दोत्सव

अनुवाद—उस समय यशोदा अपने प्रियजनोंको टेरना चाहती थी पर वह नहीं बोल सकी, वाणी (सरस्वती) ने अपने प्रिय (भगवान् विष्णु) को पहचान लिया था उस लज्जाके कारण मानों वह मुखसे बाहर नहीं निकली ॥ ३

विशेष—यशोदाके मुखसे वाणीके न निकलनेपर कविने उत्प्रेक्षाकी है क्योंकि वाणीके पति हैं भगवान् ! वे भगवान् वंकुण्ठ छोड़कर आज गोकुलमें गोप पत्नीके अङ्कमें उसने देखे तो देखते ही लज्जित होगई । यही कारण था जो यशोदाके मुखसे वचन नहीं निकले थे ॥ ३ ॥

अनुवाद—उस समय समस्त गोकुल-निवासी जनसमुदाय रोमाञ्चित होगया था और जाग गया था, पुण्यशालिनी यशोदाके स्तनोंसे भी निरन्तर दुग्धामृत प्रवाहित होने लगा ॥ ४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

स्तन्येन पुण्यैक - निकेतनाया,
मुदस्रमामादचिरादजस्रम् ॥ ४ ॥

नन्दारविन्दायत लोचनायाः
पुरस्तनूजे सति जायमाने ।
सोदर्य्य भावादिव वीक्षणार्थं,
मभ्युत्त्थितं तैरपि तत्तनूजैः ॥ ५ ॥

आनन्दकन्दे सति नन्दनेन्दौ,
ननन्द नन्दाम्बुधिरुत्सवेन ।
मुदस्रवीची बवृधे विशाला,
दृक्कूल मुल्लङ्घ्य च रंहसैव ॥ ६ ॥

अन्तर्गते कर्णपथेन दूरात्,
सुतो जनीति ध्वनि सिद्ध मन्त्रे ।

विशेष—गोकुलके निवासी बिना किसीके जगाये ही जाग गये । स्वाभाविक है जिस धाममें समस्त इन्द्रियों एवं प्राणके आराध्य प्रभु अवतरित हुए हों तो उनके दिव्य तेजसे सभी इन्द्रियां और प्राण प्रफुल्लित हो गये थे अतः निद्रा भी खुल गई थी ॥ ४ ॥

अनुवाद—उस समय नन्दपत्नी यशोदाके पुत्र उत्पन्न होनेपर भ्रातृ-भाव के कारण देखनेके लिये मानों रोमांच भी तत्काल उत्पन्न हो गये ॥ ५ ॥

विशेष--यहाँ कविने यह सिद्ध किया है कि कृष्ण-भगवान् भी तनूज हैं=तनुसे उत्पन्न हैं और रोमांच भी तनूज हैं तो भाई-भाई हुए । भ्राताको=कृष्णको देखनेके लिये ही रोमांच प्रकट हुए । सुन्दर उत्प्रेक्षा है ॥ ५ ॥

अनुवाद—आनन्दकन्द-नन्दनन्दनके उत्पन्न होनेपर उस समय नन्दरूपी समुद्र आनन्दित होने लगा । उठे हुए हर्षाश्रुकी विशाल तरङ्गें नेत्र-सीमाका लङ्घन करके वेगसे बढ़ गईं ॥ ६ ॥

विशेष—नन्द मानों समुद्र हैं और अश्रुधारा तरङ्ग हैं । नेत्र किनारे हैं उनका लङ्घन करके हर्षाश्रु बाहर निकल रहे हैं । श्रीमद्भागवतमें भी इस हर्षका वर्णन है—"नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ।" भा० १०।५।१ आत्मजके साथ आह्लादका भी जन्म हो गया ॥ ६ ॥

अनुवाद—नन्दने जब सुना कि "पुत्र उत्पन्न हुआ है" तो इस ध्वनि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

जाग्रत्तनूजालिमिषेण तस्य,
हृच्छल्य जालानि बहिर्गतानि ।। ७ ।।
आशंसते वंशवतंस जन्म
शर्माकुलोऽसूनददद् व्रजेन्द्रः ।
[1]वसूनि दत्वा पुनराददेऽसौ
तस्मात्स्वसूनोरवलोकनाय ।। ८ ।।
पश्यन्नपि श्यामलधाम सूनो-
र्न रूप भेदं पुनरेष वेद ।
निःस्पन्द दृक्केवल शालभञ्जी[2]-
गञ्जी मुदासीदवशीकृतात्मा ।। ९ ।।
प्राणैःसहात्मानमदत्त तस्मै,
तच्छ्यामधाम्नेक्षि वसु द्विजेभ्यः ।

रूपी मन्त्रके दूरसे ही कानोंके द्वारा अन्दर आनेपर निकले हुए रोमपंक्तिके बहाने मानों हृदयमें स्थित दुःखरूपी शल्य (कील) बाहर आगई ।। ७ ।।

विशेष—मन्त्र पासमे सुना जाता है पर नन्दने 'पुत्र हुआ है' यह मंत्र दूरसे सुना । मन्त्रसे दुःख दूर होते हैं—पुत्र संवादसे हृदयका सब कष्ट दूर हो गया । रोमांचपंक्ति शल्यकी प्रतीक हैं, स्पष्ट प्रमाणके रूपमें इन्हें रखा गया है ।।७

अनुवाद—वंशभूषण बालकका जन्म सवाद कहनेवालेको प्रसन्न होकर व्रजेन्द्र नन्दबाबाने अपने प्राण भी दे दिये, फिर धन देकर प्राण वापिस ले लिये । प्राण युक्त होकर ही वे अपने पुत्रका दर्शनकर सकते थे अत उन्होंने धन देकर प्राण वापिस ले लिये थे ।। ८ ।।

अनुवाद—पुत्रका वर्ण श्याम था परन्तु वह तो श्याम तेजका दर्शनकर रहे थे अतः रूप भेदको वे न समझ सके । उनकी दृष्टि निश्चल (टकटकी युक्त) थी प्रसन्नताके कारण आत्मा वशमें नहीं थी । केवल निस्पन्द भावसे वे स्थित थे ।। ९ ।।

विशेष—नन्दने बालकका रूप नहीं भगवानूका रूपही समझा ।। ९ ।।

अनुवाद—प्राणोंके साथ अपनी आत्माको उस श्याम तेजवाले बालकको (दिया) तथा धन ब्राह्मणोंको (दिया) शरीर जड़ताको (दिया) अपना हर्ष

(1) धनानि । (2) पुत्तलिकेव ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वपुर्जडिम्ने प्रमदाय चेतो,
नन्दस्य नासीदथ देयमेव ॥१०॥
सर्वस्वानि ददे द्विजाय सहसा नन्दोमहानन्दितो ।
विश्वानन्दिनि नन्दने पुनरधात्प्राणात्मनः सेन्द्रियान् ॥
कस्मैचिद्विवशोकृतेन मनसा दास्यत्यथाङ्गं हठा-
दुद्दण्डायितमित्थमङ्गजकुलैरात्याकुलैः सर्वतः ॥११॥
स्खलन्तमात्मानयथाक्षिपन्त,
मन्यं च वासः स्खलदङ्गतोऽपि ।
पतङ्गमङ्गेष्वपरं दहन्त-
मग्नि च किञ्चिन्न विवेद नन्दः ॥१२॥
मनोऽपि नेतुं न मुनिः शशाक,
हविर्लवं ग्राहयितुं न होता ।

को दे दिया । उस समय नन्दको कोई पदार्थ अदेय नहीं था ॥१०॥

अनुवाद—ब्राह्मणोंके लिये प्रसन्नतासे नन्दने एक साथ सब कुछ दे डाला । विश्वको आनन्द देनेवाले अपने पुत्रमें इन्द्रियोंके सहित प्राण और आत्मा-का स्थिरकर दिया । विवश हुए मनसे हठपूर्वक ये अपने अङ्गको किसीके लिये दे देंगे, इसलिये अत्याकुल होकर सब ओरसे अङ्ग रोमाकुल होकर उठ पड़े, अर्थात् सारा शरीर रोमाञ्चित होगया ॥११॥

विशेष—श्रीमद्भागवतमें नन्दद्वारा अनेक प्रकारके दानोंका उल्लेख है—"आहूय विप्रान् दैवज्ञान् स्नातः शुचिरलंकृतः ।" धनकी शुद्धि दानसे ही होती है । यहाँ रोमाञ्चके लिये कविने सुन्दर उत्प्रेक्षाकी है, नन्दबाबा विवश हुए मनसे बलात् अपने अङ्ग भी किसीको दे देवेंगे अतः सब रोम व्याकुल होगये और शरीर में खड़े होगये पहले प्राण और धनकी वापिसीकी कल्पनासे प्राणकी चर्चा और यहाँ अङ्ग दानसे रोमाञ्चकी कल्पना है । नन्द अपनी प्रत्येक वस्तु दान देनेपर तुले हैं ।.११॥

अनुवाद—उस समय अपने आपको गिरते हुए भी उन्होंने नहीं देखा, किसीके द्वारा आक्षेपको भी नहीं सुना । शरीरसे गिरनेवाले वस्त्र भी नहीं देखे और तो क्या अङ्गपर पतङ्गा जलाते अग्निको भी नहीं देखा । नन्दबाबा पुत्रोत्पत्ति के हर्षसे इतने बेसुध थे कि उन्हें किसीका कुछ भी ज्ञान नहीं था ॥१२॥

अनुवाद—जहाँपर मुनि अपने मनको नहीं लेजा सकता, होता हविके

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तमङ्कमारोप्य चिरं यशोदा,
स्नेहस्रुतं स्तन्यमदत्त तस्मै ॥१३॥
पङ्कापहारी हरिराविरास,
पङ्कान्न शङ्का किल काचिदेव ।
इतीव चक्रेऽखिलगोपचक्रं,
पङ्कैरनातङ्क कुतूहलानि ॥१४॥
द्रागेव दूरात्सति नन्दसूनौ,
पलायितं पंक परम्पराभिः ।
काश्मीरकर्पूरपटीरपूर-
क्षीरैरकारीति धरासु पङ्कः ॥१५॥
इयं धरित्री हरिणा भवित्री
परिच्युता निर्भरतापभारैः ।

अंशको जिन्हें ग्रहण नहीं करा सकता उसीको गोदमें बिठाकर यशोदा प्रेमपूर्ण दुग्धको पिला रही है ॥१३॥

विशेष –'यन्मनसा न मनुते" जो तत्त्व मनसे परे है, वाणीसे परे है, इन्द्रियोंसे भी परे है वही तो श्रीकृष्ण है। हविका अंश अग्निमें डाल दिया जाता है साक्षात् ब्रह्मके मुखमें पड़ते किसने देखा है पर यहाँ तो यशोदा साक्षात् ब्रह्मको स्तन्य पान करा रही है ॥१३॥

अनुवाद –पापोंका नाश करनेवाले हरि उत्पन्न हो गये हैं इसलिये किसीको अब पापकी शङ्का तो करनी ही नहीं चाहिये इसीलिये गोप मानों पंक-का आतङ्क छोड़कर कुतूहल करने लगे ॥१४॥

विशेष—गोपने दूध-दहीकी कीचकी क्योंकि वे जान गये कि भगवान् चराचरात्मा ही प्रकट हुए हैं। पंकका भय भी उन्हें नहीं था ॥१४॥

अनुवाद—नन्दपुत्रके दूर रहते हुए भी सब पंक परम्परा अर्थात् पाप समूह नष्ट होगया था। परन्तु उस समय केसर कपूर मिश्रित दुग्धसे पृथ्वीपर पंक अर्थात् कीचड़ बहुत होगई थी। हर्षोत्सवमें दुग्धादिके द्वारा पंक स्वाभाविक है ॥१५॥

अनुवाद—यह पृथ्वी अब हरिके द्वारा अत्यन्त तापके भारसे रहित हो जायगी इस विश्वासको हरिने इस पृथ्वीके हृदयमें दधिसे क्रीड़ा करके उत्पन्नकर कर दिया ॥१६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वासमस्या हृदि वल्लवेन्द्रो
बध्नाति दध्ना स्म विधाय सेकम् ॥१६॥

पंकापसाराय कथा मुरारे–
रास्तां विदूरे विदिते हि तस्मिन् ।

उत्सारयामास विगाढपंकं
न गोकुले कः पदलीलयापिः ॥१७॥

शिशोरमुष्यामलकीर्ति पूर्णा
स्यादेव भूर्नाम बिना विलम्बैः ।

अपूरि सा गोकुल पूरितीव
क्षीरोल्लसत्पाण्डुरकीर्तिपूरैः ॥१८॥

भारापसाराय हरिर्ममासौ,
क्षीराम्बुधेरेव समाजगाम ।

विजानती भूरिति सा बभूव,
पंकच्छलक्षीरमयी क्षणेन ॥१९॥

पात्रीकृत्य धरित्रीं चन्दनकर्पूरकुङ्कुमैर्गोपाः ।
विदधुः पंकमहोत्सवमुत्साहानाम् च दुष्करं जगति ॥२०॥

विशेष—पृथ्वी गौका रूप धारण करके भगवान्‌की शरणमें गई थी और अपना ताप सुनाया था। आज भगवान् प्रकट होकर दधि क्रीड़ाके द्वारा मानों उसके तापको शान्तकर रहे हैं विश्वास दृढ़करा रहे हैं कि पृथ्वी ! अब तेरा ताप दूर ही है ॥१६॥

अनुवाद—पाप नाशके लिये मुरारिकी कथाकी बात तो दूर रही दूरसे ही उसके विदित होनेपर गोकुलमें पदलीलासे ही गहरी पंकको किसने नहीं हटाया ॥१७॥

अनुवाद—इस बालककी निर्मल कीर्तिसे पूर्ण पृथ्वी शीघ्र ही होगई इसीलिये मानों गोकुल नगरी भी क्षीरके समान शोभित कीर्तिके प्रवाहसे भर गई ॥१८॥

अनुवाद—मेरे भारको दूर करनेके लिये हरि भगवान् क्षीरसागरसे आये हैं यह जानकर पृथ्वी भी मानों पंकके बहाने क्षीरयुक्त क्षणभरमें होगई ॥१९

अनुवाद—पृथ्वीको पात्र बनाकर गोपोंने चन्दन, कपूर, कुंकुमसे संसार में दुष्कर उत्साहके योग्य पंकका उत्सव मनाया ॥२०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतिमाद[1]मोदमत्ताभीर बहलकोलाहल मदकलमहिलाकुल कौतुहलाकुल कलकलकलबहुल तरोलू[2]लूमलङ्गलाचारैः, अतिमधुरमृदङ्गमर्द्दलविविधवर्धमानसुरमुनिमनुजमनोनुकूल काहलाकुलवर्जितकलध्वानधाराभिः, मुखरितदिङ्मुखमङ्गलाधानधुरीणासंख्येयशंख निध्वानैः निर्धूत सुघनघना[3] घनानां घनानां घनाघोषैः, भृशमधरीकृत मधुमाधुरीकानां पीयूषादपि शिशिराणाम् सुषिराणाम् च निःस्वनप्रकरैः, अतिगम्भीर दुन्दुभीनामप्यदभ्रनिर्भरध्वनिभिरपि चण्डीशाद्रिगम्भीर गह्वर गर्भारब्ध प्रतिध्वनिमुखरचण्डिमडिण्डिमाडम्बरैरपि, रुचिरो-

---

अनुवाद - अत्यन्त मद और मोदसे मत्त आभीरोंके अत्यन्त कोलाहल था मदवाली महिलाओंके कौतूहलसे आकुल कल कल शब्दवाले उलूलू क्रीडा मङ्गलके द्वारा अति सुन्दर मृदङ्ग मर्दल अनेक विध बढ़े हुए मनके अनुकूल सुन्दर ध्वनिकी धाराओंसे बजते हुए दिशाओंमें, मङ्गलाधान करनेवाले शङ्खकी ध्वनियोंसे अन्योन्य संघट्टन द्वारा बादलोंके जैसे आघोषोंसे, मधुमाधुरीको भी तिरस्कृत करनेवाले अमृतसे भी उत्तम वंशवाद्यके शब्द समूहसे, अति गम्भीर नगाड़ोंके अत्यन्त निर्भर ध्वनियोंसे हिमालयकी गम्भीर गुहाओंसे निकली प्रतिध्वनिसे मुखर उग्र डिण्डिमके आडम्बरोंसे, रुचिर ऋचाओंके उच्चारण करनेवाले सामकी झङ्कार करनेवाले, जप करते हुए जापकों तथा यजुर्वेदके पढ़नेवाले, यज्ञ करनेवाले, तथा मुखमें सम्पूर्ण अथर्ववेदको कण्ठमें रखनेवाले ब्राह्मणोंके आशीर्वाद वचनोंसे, दधिकी गहरी कीचसे अखण्ड धवलिमाके कारण उठते हुए समुद्रके फेन तथा कमलके समान धवल तथा चंचल लहरोंसे कलकल करते हुए नक्र समूह तथा अनेकविध जल-जन्तुओंके उद्धत नादसे क्षीरसागरके रूपका अनुकरण करती हुई वह गोपनगरी अत्यन्त प्रसन्नता व्यक्तकर रही थी, अतिशय मङ्गल प्रकट करते हुए महोत्सवपूर्वक जातकर्मादि कार्य करके आभीर जातिके सार्वभौम नन्दने बालककी लौकिक और अलौकिक रक्षा सब प्रकार कराई ।।२१।।

विशेष—नन्दमहोत्सवका वर्णन है ! भगवान् श्रीकृष्णके जन्मका महोत्सव अद्भुत था। अनेक गोप और गोपियोंने स्थान-स्थानपर दूध-दधि-माखनसे

---

(1) मादः=मदः।
(2) उलूलुध्वनिमङ्गलाचारः साम्प्रतं बंगदेशे प्रसिद्धः।
(3) घनाघनः=अन्योन्यसंघट्टनः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्चरितच्चर्चामपि सामञ्झङ्कारकारिणामपि जपजर्जरित जञ्जपूक पूग-यजुर्जागरूकाणामपि यायजूकानां वदनोदर विहरदखर्वाथर्व गर्व दुर्वाराणामुर्वीगीर्वाणानामाशीर्वाद गीर्वाणैरपि दधिकर्दमसम्मर्दाखण्ड पाण्डिम्नां समुदयदुरुडिण्डीरपिण्ड पुण्डरीकखण्ड परिपाण्डरीभवल्लोल कल्लोल कुलकल कलनक्रचक्रादिक विविध यादोनादोद्धत दुग्धतोधेरनुकुर्वतीरूपं गोपानां वसतिरतीव मुदे हरेरुदेति स्म, सुविदितबहुमङ्गल महो महोत्सव पूर्वकं जातकर्म्मादिककर्म्माणि निर्माथाभीरसार्वभौमो-बालकस्यलौकिकालौकिक रक्षामयांचक्रे ॥२१॥

अशोक कोकः कमलाभिनन्दनः,

प्रभातभास्वानिव नन्दनन्दनः ।

परस्परमें क्रीडाकी, अतः समस्त गोकुल दूध-दधिसे भरगया था। नन्दने अनेक प्रकारके दान दिये। दान गृहीताको जब ज्ञात होता कि मुझसे अच्छी वस्तु अगले-को मिली है वह अविलम्ब मागमें ही प्राप्त दक्षिणाको डालकर नन्दसे अभीष्ट वस्तु माँगता और पाता था अतः रजत, सुवर्णके भी ढेर गोकुलमें लग गये थे। हीरा, पन्ना, मोती, मूँगा बिखरे पड़े हैं ज्ञात होता है लक्ष्मी प्रसन्न होकर स्वयं यहाँ आई है। बात भी यही है गोपियोंने रासप्रकरणमें कहा भी है कि यहाँ तो इन्दिरा सदैव निवासकर रही है—

जयति तेऽधिकं जन्मना व्रजः
श्रयत इन्दिरा शश्वदत्र हि।
दयित दृश्यतां दिक्षुतावका-
स्त्वयि धृतासव स्त्वां विचिन्वते ॥ भा० १०।३१।१

एक कविने नन्दके दानका वर्णन करते हुए ठीक ही लिखा है—

पूत सपूत जन्यौ जसुदा इतनी सुनिकैं वसुधा सब दौरी।
देवन कें आनन्द भयौ उठि धावत गावत मङ्गल गौरी।
नन्द कछू इतनौ जु दियो धन स्वामि कुबेरहु की मति बौरी।
मोहि देखत व्रजहि लुटाय दियो न बची बछिया छछिया न पिछोरी ॥२१॥

अनुवाद—कोक [चक्रवाक] के शोकको दूर करनेवाले कमलोंको प्रसन्न करनेवाले, प्रात.कालीन सूर्यकी तरह नन्दनन्दन' क्षण-क्षणमें विलक्षण क्रमको प्रकट करते हुए अन्धकार नष्ट करनेवाले, अनन्त रुचिवाले, प्रसन्न करने लगे ॥२२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षणे क्षणे लक्ष्य विलक्षणक्रमो,
ननन्द सोऽनन्तरुचिस्तमः क्लमः ॥२२॥
सुरक्षणाक्षीणविलासबल्लवः,
सुशोणशोभाधर नव्य पल्लवः ।
दिनेदिनेऽशोभत तुङ्गमङ्गलः,
सुरमद्रुमस्येव नवीन कंदलः ॥२३॥
श्रुतिस्मृतिक्षालितविश्वदूषणः, सगौरगोरोचनलेशभूषणः ।
सचीनपीतांशुकरज्यदङ्गतो, रराज राजेव नवोदयं गतः ॥२४॥
निशासु सन्ध्यासु दिनेषु यत्नतः,
स पश्यतामभ्यधिकं च रत्नतः ।
ऋषेरगम्यो व्रजवासशालिनां,
जगाम चक्षुर्मयतां विलासिनाम् ॥२५॥

विशेष—रात्रिमें चक्रवाक युगल दूर हो जाते हैं प्रातः मिलते हैं अतः सूर्य चक्रवाकका बन्धु है । सूर्यकी किरण जालसे ही कमल खिलते हैं अतः ये कमल बन्धु हैं । भगवान् कृष्ण भी अन्धकारको दूरकर बान्धवोंको सुखदायी हैं । सूर्यकी भाँति अनन्त रुचिवाले हैं ॥२२॥

अनुवाद—सुरक्षाके कारण अक्षीण विलासवाले, लाल शोभासे युक्त अधर पल्लववाले अति मङ्गलवाले, सुरद्रुम (कल्पवृक्ष) के नवीन कन्दलकी तरह नन्दनंदन दिनदिन दूनी शोभाको प्राप्त करने लगे ॥२३॥

अनुवाद—श्रुति-स्मृतिके द्वारा विश्वके दोषोंको हटानेवाला गौर गोरोचनको भूषणके रूपमें धारण करनेवाला, सूक्ष्म और पीत अंशुकसे शरीरको शोभित करनेवाला, नवाभिषिक्त राजाकी तरह शोभित था ॥२४॥

विशेष—श्रुति-स्मृतियोंसे समस्त दोष दूर हो जाते हैं गोरोचनको कान में लगानेसे वह भूषण बन जाता है अर्थात् शोभा बढ़ जाती है । सूक्ष्म और पीत-वस्त्रके धारण से नये अभिषिक्त राजाकी भाँति नन्दकी शोभा हुई थी ॥२४॥

अनुवाद—रात्रिमें, दिनमें, सन्ध्या समयमें भी बड़े यत्नसे रत्नोंसे भी अधिक देखनेवाले व्रजवासियोंको ऋषियोंसे अगम्य वह विलासियोंकी दृष्टिका विषय बन रहा था ॥२५॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

स रोहिणीगर्भकृतावरोहणः,
सरोहिणीशद्युतिरीशमोहनः ।
दधच्छ्रियैरावत कालभक्रमं,
भुवीह केषां विदधे नभभ्रमम् ॥२६॥

पूतनावधः

दिनेषु गच्छत्सु कियत्सु मत्सरा-
न्मनोदधद्भीषणभूतिमच्छरात् ।
स पूतनां[1] प्रैषय दुग्रशासन-
स्तयोस्तयोपाश्रित नाशवासनः ॥२७॥

यमस्य दूतीव तमस्विनं जनं,
वयोवसाने रुगिवाक्ष्यनञ्जनम् ।
समागता सा पुरि नन्द सुन्दरी-
सुतं चिकिर्षुस्तमसौ व्यसुन्दरी ॥२८॥

अनुवाद—रोहिणीके गर्भसे अवतार लेनेवाला चन्द्र सदृश द्युतिवाला, ईशको मुग्ध करनेवाला शोभासे ऐरावतके शिशुके सदृश पृथ्वीपर सबका उससे आकाशकी भ्रान्ति होती थी ॥२६॥

पूतना-वध

अनुवाद—कुछ दिवस व्यतीत होनेपर, कृष्ण द्वेषी उग्र शासन करने-वाले कंसने बलराम-कृष्णको पूतना द्वारा नष्ट करानेकी इच्छासे भेजा ॥२७॥

विशेष—पूतनाको भागवतके अनुसार श्रीकृष्णके जन्म-दिवसके छठे दिन भेजा गया था। पूतना भी भगवान्‌को मारनेकी प्रतिज्ञाकर चुकी थी। पुराणान्तरमें पूतनाको राजाबलिकी पुत्री रत्नावली कहा है जिसने वामनावतारमें श्रीवामन जैसे सुन्दर बालककी गोदमें लेकर स्तन्यपान करानेकी इच्छाकी थी। फलतः श्रीकृष्णावतारमें वह इच्छा-पूर्ण की गई ॥२७॥

अनुवाद—अज्ञानी पुरुषके पास यमदूतीकी तरह अथवा वृद्धावस्थामें कज्जलशून्य नेत्रमें रोगकी तरह यशोदानन्दनको प्राणहीन करनेकी इच्छासे वह पूतना नगरमें आई ॥२८॥

विशेष—इस श्लोकमें पादान्त यमकालङ्कार है। यह क्रम तीसवें श्लोक तक है ॥२८॥

---

(1) भा० १० स्कं० ६ अध्याये पूतना वध कथा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनिन्द्यमान्द्यं दधती गमे खला,
नितम्बबिम्बाहितहेम मेखला ।
समुल्लसत्कुण्डलमण्डलश्रुतिः,
सुचारु शोभाखिलभीप्रतिश्रुतिः ॥२९॥
मृगेन्द्रमध्या मृगशावकेक्षणा
सहारकण्ठो सरसा बकेक्षणा ।
तनुत्विषा गञ्जितमञ्जुरोचना
मुखेन्दु सौन्दर्यजगद्विरोचना ॥३०॥
दुकूल वल्लीपरिणद्धविग्रहा,
बकी त्रिलोकी प्रथितोग्रविग्रहा ।
समाल्प धम्मिल्लसमृद्ध सौरभा,
ललाट सिन्दूरविमूढ़ सौरभा ॥३१॥
हरेरसुग्रामकुवासनामिता,
सकालकूटस्तनभार नामिता ।
निगूढनक्रेव कृता तरङ्गिणी,
विगाढ माया घटनातिरङ्गिणी ॥३२॥

अनुवाद—वह दुष्टागतिमें सुन्दर मन्दता धारण करती हुई नितम्बपर स्वर्ण खचित मेखला (करधनी) धारण किये थी । कुण्डलोंसे कान भूषित थे । उत्तम शोभासे वह अपनी दुष्टता छिपा रही थी ॥२९॥

अनुवाद—वह सिंह सदृश कटिवाली थी, मृग शिशुके समान उसके नेत्र थे, कण्ठमें सुन्दर हार था, वक सदृश नेत्रोंसे सरसा बनो थी. शरीरकी शोभासे रोचनाको तिरस्कृत करनेवाली थी, और अपने चन्द्र समान मुखसे संसारके लोगों को प्रसन्न कर रही थी ॥३०॥

अनुवाद—शरीरके ऊपर दुकूल धारण किये थी, त्रिलोकीमें भयङ्कर शरीरको दिखानेवाली थी । वह बक नामक असुरकी बहिन (पूतना) केशपाशपर सुगन्ध लगाये थी और उसके ललाटपर गन्धयुक्त सिन्दूर शोभित था ॥३१॥

अनुवाद—वह कृष्ण भगवान्के प्राणोंकी कुवासना वाली थी, स्तनपर कालकूट विष लगाकर आई थी, स्तनोंके भारसे नम्र थी, छिपे हुए नक्रवाली नदीकी तरह भयङ्कर मायाका विस्तार करनेमें अत्यन्त पटु थी ॥३२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

निलीनशार्दूल मिवोपकाननम्,
प्रकाशयन्तो ललितालकाननम् ।
स्तनं दधाना विषमेचकाननं,
ग्रहीतुकामा दनुजान्त काननम् ॥३३॥
जगाम नन्दस्य ततो निकेतनम्,
लसत्त्रिलोकी गृहजैत्र[1] केतनम् ।
उवाच वाचा मधुमाधुरी मुचा,
रुचा तिरोभूय रदस्य मौक्तिम् ॥३४॥
मदे यशोदे तनयो नयोत्तमे,
न कस्य मेघाधिक मेच[2] कोदयः ।
चिरेण जातश्चरमे वयस्यहो,
महोदयं विन्दतु नन्दतु श्रिया ॥३५॥
भस्मभूषितमिवानल पिण्डम्,
कोषगूढ़मिव सायक खण्डम् ।
सा ददर्श समदर्शि यशोदा-
क्रोड शायिनमशङ्क किशोरम् ॥३६॥

अनुवाद—वह छिपे हुए सिंहवाले उद्यानकी तरह सुन्दर केशयुक्त मुखको प्रकाशितकर रही थी, विषयुक्त नीलमुखवाले स्तनोंको धारण किये थी, और दनुजोंके अन्तक=काल, कृष्णके प्राणोंको लेनेकी इच्छा करनेवाली थी ॥३३॥

अनुवाद—वह पूतना तीनों लोकोंको जीतनेवाली ध्वजासे शोभित नन्दके घर पहुँची । कान्तिसे दन्तोंकी शोभा ढकती हुई मधुर सुन्दर वाणीसे वह बोली—

अनुवाद—हे उत्तमनीतिवाली यशोदे ! मेघसे अधिक नीलिमा धारण करनेवाला तेरा पुत्र किसको आनन्दित नहीं करता ! अर्थात् सबको सुख देनेवाला है बहुत समयके पश्चात् वृद्धावस्थामें पैदा हुआ है, यह महान् उदय प्राप्त करे और सदा प्रसन्न रहे ॥३५॥

अनुवाद--भस्मसे ढकी अग्निकी तरह, तरकशमें छिपे बाणकी तरह, समदर्शिनी यशोदाकी गोदमें खेलते हुए उस निश्शङ्क बालकको पूतनाने देखा ॥३६

---

(1) जेतृ+अण् । विजय प्राप्त करनेवाला ।
(2) मच्+वुन्, इत च [काला बादल]

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एहि वत्स मुखमच्छदर्पणं,
द्रष्टुमुत्सववहं समुत्सहे ।
इत्युदीर्य निजपाणि पल्लवं,
बल्लवेन्द्र[1] गृहिणी पुरो दधे ॥३७॥
आशिषं कुलपुरन्ध्रि विधेहि,
श्रीपदं शिरसि साधु निधेहि ।
एतया सह गिरैव विशङ्का,
स्वाङ्कतः शिशुमदत्त तदंके ॥३८॥
दन्दशूकमिवदामशङ्कया-
वह्निकूटमिव हाटकाशया ।
चन्द्रहासमिव कन्दलीधिया,
नन्दशावकमदत्त सा बकी ॥३९॥

अनुवाद--उसके उपरान्त (पूतनाने कहा--) आओ वत्स ! आनन्दित करते हुए स्वच्छ दर्पणके समान तुम्हारे मुखको देखनेकी मेरी इच्छा है, यह कहकर नन्दपत्नी यशोदाके आगे अपने हाथ फैला दिये ॥३७॥

अनुवाद--हे कुलदेवि ! आप आशीर्वाद देवें और अपने श्रीचरण अच्छे प्रकार इसके सिरपर रखें. यह कहकर निश्शङ्क होकर यशोदाने अपनी गोदसे बालक (कृष्ण) को उस पूतनाकी गोदमें रख दिया ॥३८॥

अनुवाद--जैसे कोई माला समझकर साँपको पकड़ ले अथवा सुवर्ण समझकर अग्निपुञ्ज पकड़ ले अथवा कदली समझकर चन्द्रहास (तलवार) को पकड़ ले ऐसे उस पूतनाने नन्दतनय (कृष्ण) को गोदमें ले लिया ॥३९॥

विशेष--भ्रान्तिमान अलङ्कार है। माला और सर्पमें साम्य है । अतः मालाके धोखे सर्पको उठा लेना वैसेही श्रीकृष्णको गोद लेना है । आशय यह है कि जैसे सर्पको उठा लेनेवाला पछताता है वही दशा पूतनाकी होगी । कोशमें चन्द्रहास नाम तलवारका है । भागवतपुराणमें भी सर्पका उल्लेख है--बालघातिनी पूतनाको देखकर श्रीकृष्णने अपने नेत्र बन्दकर लिये और उस पूतनाने सोते सर्पको अज्ञानी जिस प्रकार उठा लेवे वैसेही कालरूप कृष्णको गोदमें रखा--

विबुध्यतां बालक मारिका ग्रहं चराचरात्मा स निमीलितेक्षणः ।
अनन्तभारोपयदं कभन्तकं यथोरगं सुप्तमबुद्धरज्जुधीः ॥ ३९॥

---

(1) गोपेन्द्रनन्दः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालकूटमिव सा मृगनाभी,
भानतो हरिमिवैण मानतः ।
भीमवज्रमिव पद्मबुद्धित,
स्तंब्रभार विभुमर्म मोहतः ॥४०॥

वामपाणिधृत मूर्द्ध निबद्ध,
स्वस्तिकासन मधत्त तदङ्के ।
कञ्चुल्लीं च समुदस्य कुचाग्रं,
दक्षिणेन च करेण चकर्ष ॥४१॥

कम्पमान भुवन त्रयमन्तः,
शोचमानमुनि देव मशङ्का ।
वाम चूचुकमधत्त मुरारेः,
बन्धुजीवमधुराधर बिम्बे ॥४२॥

श्याम चूचुकमतीव चकास,
श्रीधराधरपुटेऽरुणभासि ।
बन्धुजीव कुसुमोदर मज्ज,
चचञ्चरीक इव कंचन कालम् ॥४३॥

अनुवाद—जिस प्रकार कोई कस्तूरी समझकर विषको ग्रहण करे, अथवा मृग चर्मकी शङ्कासे सिंहको पकड़े अथवा कमल समझकर भयङ्कर वज्रको पकड़ले, इसी प्रकार मोहमें आकर उस बालकको पूतनाने ले लिया ॥४०॥

अनुवाद—बांये हाथपर सिर रखकर उसकी गोदमें कृष्णने स्वस्तिकासन [स्वस्तिकका-सा आकार] ग्रहणकर लिया । पूतनाके कंचुकको उठाकर दक्षिण हस्तसे उसके स्तनका अग्रभाग खींचा ॥४१॥

अनुवाद—निश्शङ्क होकर पूतनाने तीनों लोकोंके कम्पित होते हुए तथा हृदयमें मुनि और देवताओंके शोकाकुल हो जानेपर, बन्धुजीव पुष्पके समान अधर-वाले मुरारिके मुखमें वामस्तन दे दिया ॥४२॥

अनुवाद—बन्धुजीव पुष्पपर अन्दर बैठे हुए भ्रमरके समान थोड़ी देर-तक श्रीधर (कृष्ण) के लाल-लाल अधर पुटपर पूतनाका श्यामस्तन बड़ा ही शोभित हुआ ॥४३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्दमन्दचल दृक्पदपाणि,
स्पन्दमान मधुराधर बिम्बम् ।
प्राणपञ्चकममतर्पयदीशः,
प्राणपञ्चक मिलत्पयसास्याः ॥४४॥
वह्निदीपनकृते हरिरुग्र,
क्ष्माभुजामशन मारभमाणः ।
षड्सीमिव जघास स बक्याः,
प्राण पञ्चक पयोरस षट्कम् ॥४५॥
कालकूटकवलेन मुरारे,
र्दुःसहो जठरवह्निरदीपि ।
इत्यति क्षुधित एव तदीय,
प्राणपञ्चकमपि प्रभुरादात् ॥४६॥
कालकूटमखिलैरविषह्यं,
पूतनापि निखिलैरविषह्या ।

अनुवाद—धीरे-धीरे दृष्टि हाथ-पैरोंको चलाते हुए तथा मधुर अधर-बिम्बको हिलाते हुए भगवान् कृष्णने पाँचों प्राणोंमें पहुंचते हुए पूतनाके दुग्धसे अपने पाँचों प्राणोंको तृप्त किया ॥४४॥

विशेष—भगवान्‌ने उसके स्तनोंको जोरसे दबाया था जिससे पूतनाने बड़ा क्रन्दन किया और छोड़-छोड़ शब्द कहे—

सा मुञ्च मुञ्चालमिति प्रभाषिणी
निष्पीड्यमानाखिल जीवमर्मणि ।
विवृत्य नेत्रे चरणौ भुजौ मुहुः
प्रस्विन्नगात्रा क्षिपती रुरोदह ॥ भा. १०।६

अनुवाद—उग्र राजाओंका नाश आरम्भ करनेवाले हरिने अग्नि दीप्त करनेके लिये षड्रसयुक्त पदार्थकी तरह पूतनाके पाँचों प्राणोंमें पहुँचे हुए दुग्धके छःरसोंका आनन्द लिया ॥४५॥

अनुवाद—कालकूट विषके भक्षण करनेसे मुरारिकी जठराग्नि बहुत दीप्त हो गयी, उसके कारण अत्यन्त क्षुधति प्रभुने उसके प्राणोंका भी भक्षणकर लिया ॥४६॥

अनुवाद-- कालकूटको कोई सहन नहीं कर सकता, पूतनाकी शक्ति भी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सौहृदादिति तया तह भेजे,
कैटभारिजठरं विषकूटः ॥४७॥

कालकूट गरलाच्च गरीयो,
वेत्ति वैभवमसौ स्वमहिम्नः ।

तत्पथेन तदनु द्रुतमित्थं,
केशवोदरदरीं विजगाहे ॥४८॥

या व्यधत्त दधतो हरिमङ्कं,
मोक्षमाशु कुच कञ्चुलिकायाः ।

सात्ममोक्षमकरोन्न विचित्रं,
वस्तुशक्तिरपरैव जगत्याम् ॥४९॥

अथ पञ्चप्राणानुगतमाया प्रपञ्चं "मा पिब" "मा पिबेति" "मुञ्च मुञ्चेति" क्रोशन्त्याः, आन्दोलितभुजदण्ड चण्डिमपुण्डरीक-नयनमुत्क्षिपन्त्याः, आस्फालस्फुट दुरुचरण निपात्यमान पान भवन-महीरुहधोरणीकं कंसं प्रति चरित मिदमाशंसदिव सार्त्तनादव्यात्तमुख-

---

सहन योग्य नहीं थी इसी सौहृद्-भावसे वह विष पूतनाके साथ प्रभुके उदरमें रहने लगा । असह्य विष जब पूतनाके उदरमें पहुँचा तो उसने असह्य पूतनाको भी उदरमें बुला लिया ॥४७॥

अनुवाद—कालकूट विषसे उस पूतनाने अपनी महिमाका वैभव अधिक माना । जब कालकूट उदरमें पहुँच गया तो पूतना क्यों न पहुँचती । इस विचारसे ही पूतना केशवके उदरमें (विषवाले मार्गसे ही) पहुँच गयी ॥४८॥

अनुवाद—जिसने हरिको गोदमें धारण करते हुए, स्तनोंके वस्त्र (कंचुक) को हटा दिया था उसने अब अपनी मोक्ष भी करली, इसमें कुछ विचित्र नहीं क्योंकि पृथ्वीपर वस्तुओंकी शक्ति और ही होती है ॥४९॥

अनुवाद—पाँचों प्राणोंके साथ मायाका प्रपञ्च लगानेवाले हरिसे, मत पियो मत पियो, छोड़ो, छोड़ो, ऐसा उच्च स्वरसे कहती हुई तथा हाथ पटकती हुई नेत्रोंसे देखती हुई, बड़े-बड़े पैरोंके पटकनेसे पान, भवन, वृक्ष, वाहन आदिको गिराती हुई कंसको दशा बतलाती-सी, आर्तनाद सहित मुख फाड़ती हुई भयङ्कर मुखको विदीर्ण करती, भूमिको कंपाती हुई पूतनाने कोसोंतक पृथ्वीको आक्रान्त

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रमुखमावर्त्तमाननयन भीषणं कम्पितभूमिचक्रमाक्रान्त बहु क्रोश पर्यन्तमत्यन्तभयदमतीव पीवरं वपुरपतदखर्वमुर्वीधराभोग इव ॥५०॥

अनन्तरमस्याः पयोधरपारावारमुन्मथ्यपयो गरलं पञ्चप्राणाभिधानपञ्चद्रुमानपि तत्तच्छ्रियं चामृतं च समाहृत्य भूय्र्येव मनसि विचार्य्य धूर्जटिना विषमन्यदा गृहीतममृतं पुनरसुरैः कृतश्रमै रपि न प्राप्तमेव इति केवलममृतमसुरकुलोद्भवायै तस्यै दत्त्वा सकल मन्यत्स्वयमेवादत्त दैत्य कुलारातिः ॥५१॥

धत्तेऽद्याऽपि हरः कण्ठे हरिरादत्त यत्नतः ।
दत्त्वामृतमहो बक्यै[1] विषं स्वादुवमृतादिव ॥५२॥
निष्पतन्त्याः पृथिव्यां तु मुखमासीदनावृतम् ।
दैत्यप्राणप्रयाणार्थमिव द्वारमनर्गलम् ॥५३॥

कर दिया था उसका अत्यन्त भयानक स्थूल पर्वत जैसा शरीर एक साथ गिरा था ॥५०॥

अनुवाद—इसके पश्चात् स्तनरूप समुद्रका मन्थन करके क्षीर, विष, पंच प्राण नामवाले पाँच वृक्ष, लक्ष्मी, अमृत निकालकर मनमें बहुत विचार करके कि एक समय शिवजीने विष पान किया था, श्रम करके भी असुरोंको अमृत नहीं मिला था इसलिये असुर कुलमें उत्पन्न उस पूतनाको अमृत देकर अर्थात् उसका मोक्ष करके अन्य सब वस्तुओंको दैत्यकुल शत्रु भगवान्ने स्वयं ग्रहण किया ॥५१

विशेष—क्षीर-समुद्रमेंसे विष, अमृत, लक्ष्मी, कल्पवृक्ष निकले थे पूतनाके स्तन समुद्रमें से मथकर कृष्णने दूध (अमृत) विष (स्तनपर लगा विष) लक्ष्मी (शोभा) पाँच प्राणरूप वृक्ष निकाले पर यह सोचकर कि असुरोंको अमृतसे हाथ धोना पड़ा था जबकि श्रमतो उन्होंने किया था, तो आज पूतनाको अमृत (मोक्ष) देदी । शिवजीने विष लिया आज हरिने विष लेलिया ॥५१॥

अनुवाद—जिसको हरिने यत्नपूर्वक निकाला था उस विषको अमृतसे भी अधिक स्वादु समझकर शिवजीने अपने कण्ठमें धारणकर रखा है, अमृत पूतनाको दे दिया । पूतना अपना स्तन पिलाकर मातृभाव प्रकटकर रही है इसलिये भगवान् कृष्णने उसकी मुक्तिकर दी ॥५२॥

अनुवाद—पृथ्वीपर गिरते हुए पूतनाका मुख फैलगया था मानों दैत्यका प्राण निकलनेके लिये द्वार खुल गया हो ॥५३॥

---

(1) पूतनायै ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

घनयोः स्तनयोरन्तरशोभत नृकेसरी ।
केसरीव यशोमुक्तां जिघृक्षुः करिकुम्भयोः ॥५४॥
लम्बमानस्य हारस्य पूतनोरस्यवस्थितः ।
लोकैरतरलोऽप्येक तरलोऽगीयत क्षणम् ॥५५॥

अथ सम्भ्रमाकुल चित्ताभिराभीरीभिरसम्भ्रममेव शयानस्तदुरसि शयेन स्वमेङ्कमानीयता चिरेणैव । तदनु ब्राह्मणानाहूय भूयसो भूयांस्येव भावकोद्भावीनि कर्माणि भावयामासुराभीराः । ग्रहानुग्रह निर्वाहिनोऽपि होमानारेभिरे याज्ञिकाः । केचन महारुद्राभिषेक मनेकधा बुधा विदधुः । केचन मन्त्राणामेव जापं चक्रिरे महामान्त्रिकाः । केचन बह्वाशीर्वादानेव वितेनिरे सुधियः । केचन यशोदानन्दयोः पुण्यातिशयं वर्णयन्तिस्म महात्मानः ॥५६॥

अथ पूतनाया हरिपरिपीतस्तन्यतया परिपूतमेव तत्कटं[1] नाति निकटदेशे कठिन कुठारादिना खण्डखण्डीकृतं संवार्य ज्वालयाञ्चक्रिरे

अनुवाद—गजके कुम्भस्थलसे यश रूप मुक्ताको ग्रहण करनेकी इच्छा से शेरकी तरह वह नरसिंह प्रभु दोनों घने स्तनोंके बीच शोभित हो रहे थे ॥५४॥

विशेष—पूतनाके स्तनरूपी कुम्भस्थलसे यशरूप मुक्ता कृष्णने प्राप्त किये। अर्थात् पूतनाके वधसे उनका यश हुआ। यह बालघातिनी थी ॥५४॥

अनुवाद—पूतनाके हृदयपर बैठे हुए लटकते हुए हारके कारण अचंचल होते हुए भी लोगोंके द्वारा थोड़ी देरके लिये चचल कहलाये गये ॥५५॥

अनुवाद—इसके अनन्तर घबड़ाहटयुक्त गोपियोंने निर्भय होकर पूतनाके हृदयपर विहार करते हुए हरिको शीघ्र ही अपनी गोदमें उठा लिया इसके बाद बहुत ब्राह्मणोंको बुलाकर मङ्गल जनक कार्य गोपोंने कराये, याज्ञिकोंने ग्रहोंको अनुकूल करनेवाले यज्ञ किये, कुछ पण्डितोंने महारुद्रका अभिषेक किया, कुछ महामान्त्रिकोंने मन्त्रोंका जाप किया, कुछ विद्वानोंने बड़े-बड़े आशीर्वाद दिये कुछ महात्माओंने यशोदा और नन्दके अतिशय पुण्यका वर्णन किया ॥५६॥

अनुवाद--फिर भगवान्के स्तन पीनेके कारण पवित्र वह पूतनाका शरीर (शव) दूर स्थानपर लेजाकर कठिन-कुठार आदिसे उसके खण्ड-खण्ड

---

(1) कटं=शवः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोपाः । यद् धूमादपि जगदपि सौरभगौरवेण सुरभि कुर्वन्तो मलयजागरुकाश्मीरकस्तूरिकापूरकर्पूर-कुसुमालि - सौरभ्याणि परिभवन्ति स्म बहुकालम । कंसोऽपीति पूतनाचरितमाकर्ण्य विवर्ण वदनो महापात्र परम्परामाहूय मन्त्रानेव सन्ततं तेने ।।५७।।

तृणावर्तवधः

[1]तमाहूय तृणावर्त्तमनावर्त्तितशासनः ।
गोकुलं व्याकुलीकर्त्तुमादिदेश विशेषतः ।।५८।।
आज्ञां शिरसि राज्ञां च प्रज्ञां स विरही वहन् ।
बाहुमास्फोटयामास मुखरीकृतदिङ्मुखम् ।।५९।।

करके फिर एकत्र करके गोपोंने जला दिया। पूतनाके देहका सुगन्धित धूम था जिसके समक्ष संसारको सुगन्धित करते हुए चन्दन, अगर, कस्तूरी, कपूर, पुष्प आदिकी सुगन्धि बहुत समय तक फीकी प्रतीत होती रही। कंसने पूतनाके चरित्रको सुनकर उदासीन मुख होकर अनेक मन्त्रवेत्ता विद्वानोंको बुलाकर निरन्तर विचार करना आरम्भ किया ।।५७।

विशेष—पूतनाका देह छःकोशके मध्य गिरा था—

पतमानोऽपि तद्देहस्त्रिगत्यूत्यन्तरद्रुमान् ।
चूर्णयाभासराजेन्द्र किमेतदासीदद्भुतम् ।। भा. १०।६।

श्रीकृष्णके चरणारविन्दकी धूलिसे सारा ब्रह्माण्ड पवित्र हो जाता है समस्त पाप दूर हो जाते हैं तो पूतनाके पाप तो अत्यन्त स्वल्प थे–अतः पापरहित उसके शवदाहसे सुन्दर गन्ध निकली थी ।।५७।।

तृणावर्त्त-वध

अनुवाद—अनुल्लङ्घनीय शासनवाले कंसने तृणावर्त्तको बुलाकर गोकुलको विशेषकर नष्ट भ्रष्ट करनेका आदेश दिया ।।५८।।

विशेष—कंस अपनी सभामें यह स्पष्टकर चुका था कि मेरा शत्रु ब्रजमें कहीं जन्म ले चुका है किन्तु पूतनाके वधसे उसने निश्चय किया कि मेरा शत्रु गोकुल में है इसलिये विशेषतः गोकुलको नष्ट करनेका उसने आदेश दिया ।।५८।।

अनुवाद--पूतनाके विरहवाला वह तृणावर्त्त कंसकी आज्ञा प्राप्तकर वहाँसे चला। वह बुद्धिमत्तामें राजाओंसे कम न था। उसने अपने भुजदण्ड बजाकर दिशायें गुञ्जित करदी थीं ।।५९।।

---

(1) तृणावर्त्तवध कथा भा० १० स्कं० ७ अध्याये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अभिवाद्य महीपालमराल मति भीषणः ।
प्राह प्राहण्मि विश्वानि गोकुलं कियदाकुलम् ॥६०॥

ततश्चलित वानतिप्रबलचक्रवाकाकृति-
दिति प्रथितवंशभूर्मुदित कंस भूमीपतिः ।
भ्रमितभ्रमितभूधरं त्रुटित-भूरि-भूमीरुहं
नमत्क्षितिपतद्‌गृहं धरणि-चक्रगूढग्रहम् ॥६१॥

तरङ्गतरलीभवत्तनुलरीतुलं गोकुलं
समाकुलित गोकुलं मुषित सर्वगोगोकुलम् ।
प्रचण्ड पटुचंक्रमोच्छलितरेणु सद्धारुण-
श्चकार चकितं जगत्तिमिर-वर्षिवर्षोदयम् ॥६२॥

विशष—तृणावर्त्त भी मल्ल था । मल्लोंका यह स्वभाव होता है कि वे अपनी जंघा और भुजा इनको बजाते हैं । यह वीरोंका स्वभाव भी है ॥५९॥

अनुवाद—वह भयङ्कर तृणावर्त्त दुष्ट राजाओंमें हंस कंसको प्रणामकर बोला—राजन् ! मैं सारे विश्वको समाप्तकर सकता हूँ गोकलको व्याकुल करना क्या बड़ा काम है ।६०॥

अनुवाद—तब वह तृणावर्त्त चकवेको-सी आकृतिवाला अत्यन्त बलवान दितिके प्रसिद्ध वंशमें उत्पन्न हुआ राजा कंसको प्रसन्न करके चलने लगा । तब उसके गतिके वेगसे पहाड़ हिलने लगे, वृक्ष टूट गए । पृथ्वीके हिलनेसे घर गिर पड़े और अनेक नक्षत्र भी गिर गये ॥६१॥

अनुवाद—लहरोंसे हिलती हुई छोटी नावके समान गोकुल हिलने लगा, गौयें सब घबराने लगीं । सब गोकुल वासियोंकी इन्द्रियाँ विचलित होगईं । प्रचण्ड और घूम-घूमकर वायुके चलनेके कारण धूलि घूमने लगी । सब ओर अन्धकारके कारण सारा संसार चकित होगया ॥६२॥

विशेष—तरी=नौका, तरिः (तरन्ति अनया) 'नाव्यं (त्रिलिंगं नौतार्ये) स्त्रियां नौस्तरणिस्तरिः" इति अमरकोशः १।१०।१० । प्रथम पंक्तिमें शब्दालङ्कारकी छटा दर्शनीय है, ओजगुण है । मुषित=मुषस्तेय, कर्ममें त प्रत्यय, चोरी अर्थमें, किन्तु विश्वकोशमें "मुषितम् हृत खण्डिते" के अनुसार हरण करनेके अर्थमें तथा खण्डन अर्थमें भी है । यहाँ इसका अर्थ हर लेना होगा अर्थ सम्पूर्ण गोकुलको हर लिया ॥६२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हरिमुग्धमहोविद्ध मध्यया धूलि धारया ।
प्रयागं वर्त्तयामास तृणावर्त्तो रयाद्दिवि[1] ॥६३॥

दधज्ज्वलदसुन्दरं मुरहरं तु चक्रान्तरे
सविभ्रममसम्भ्रमो भुवि दिवि भ्रमन्भ्रामयन् ।
अशोभत यशोभरैरहह चक्रवातासुरः
कुलाल[2] इव केलिना कलितकाचकुम्भभ्रमिः । ६४॥

तृणावर्त्त महावर्त्त समावर्त्तितविग्रहः ।
स मायाचक्रविभ्रान्त वेदनां वेद माधवः ॥६५॥

कलापकुसुमत्विषं परमपूरुषं तं दध-
न्महो भसितभूति चेद्भ्रमति चक्रवातासुरः ।

अनुवाद --हरिको मुग्ध करनेवाले तेजसे युक्त मध्यवाली धूलिकी धारा-से तृणावर्त्तने आकाशमें वेगसे प्रयाग बना दिया। जैसे प्रयागमें तीन धारायें मिलती हैं वैसे ही आकाशमें धाराओंके सङ्गममे प्रयाग बन गया ॥६३॥

विशेष—कविने यह कल्पनाकी है कि श्रीकृष्णका तेज और बवण्डरकी धूल ये यमुना और गङ्गाके समान हैं और मानों आकाशी प्रयाग, प्रयागमें जिस प्रकार गङ्गा-यमुनाका सङ्गम दर्शनीय होता है वैसी ही छटा आकाशमें थोड़ी देरके लिए हुई ॥६३॥

अनुवाद—वात्याचक्रमें मुर शत्रु तेजस्वी उसके प्राणोंका नाश करनेवाले हरिको धारण करते हुए बड़े विभ्रमके साथ भ्रान्तिको छोड़कर स्वयं घूमता हुआ हरिको घुमाता हुआ वह तृणावर्त्त असुर इस प्रकार यहाँ सुशोभित हुआ जिस प्रकार कुम्हार खेलमें किसी काँचके घड़ेको घुमा रहा हो ॥६४॥

विशेष —असुन्दर—असुम्=प्राण "(पुंसिभूम्न्य) सवः प्राणा (श्चैवं) जीवोऽसुधारणम् ॥" अमरकोष २ क्षत्रियवर्ग/११९ असुन्दरति इति असुन्दरः जो प्राणोंको हरता है उसका नाम है—असुन्दर। मुरहर=मुर नामके असुरको मारने के कारण इनका नाम मुरहर पड़ा ॥६४॥

अनुवाद—तृणावर्त्तके घूमनेसे घूमनेवाले माधवने मायाके चक्रमें घूमने-वालेकी जैसी वेदनाका अनुभव किया ॥६५॥

अनुवाद—मोरपुच्छकी नीलिमा जैसी कान्तिवाले उन परम पुरुषको

---

1) वेगात् ।   (2) कुम्भकारः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदा कृतसनिद्रदृक्कमलगोकुल श्रीकुलः
शशीव दिवसोदरे भृशमदीपि सीमोपरि ॥६६॥
हर इव कण्ठेकालः कण्ठे कालत्विषं दधत्पुरुषम् ।
भृतभूति-चक्रवातस्तेनाघ्रातः स एव सञ्जातः ॥६७॥

एवंविधभावि विर्येविहितमखिलं खमिव, विस्तारित निखिल-स्वस्तिकस्तूरिकानेपथ्यमिव, भाविनीलाम्बरनीलाम्बरैक-खण्ड मण्डित कण्ठाभिख्यां प्रख्यापयन्निव, अतिचिक्कणैकमहानीलरत्नमिव, यत्नतो व्रजरत्नाकर देवतारत्नं कलित - कलाप - कुसुमसुकुमार - कोमला-कारं नन्दकुमारं दधदेव तत्सङ्गादुपचितनिरवद्यवैशद्यमिव, चिरा-देव भाविमोक्षतया प्रादुर्भूत सत्त्वगुणव्रज - नगरीकरीष - भूतिमादाय पाण्डरी भूतो बहुवेलमेव दिवि भुवि च चक्रवच्चक्रवातासुरो बभ्राम ॥६८॥

धारण करते हुए वह तृणावर्त्त असुर चक्रवातके रूपमें चमकती हुई भस्मकी तरह घूम रहा था, गोकुलकी सीमापर दिनमें चन्द्रमाकी तरह निद्रा सहित नेत्रोंवाले गोकुलकी शोभाकी तरह वह शोभित हुआ ॥६६॥

विशेष—शशीव दिवसोदरे में सुन्दर उत्प्रेक्षा है ॥६६॥

अनुवाद—कण्ठमें काल रक्खे हुए हरकी तरह काल सदृश कान्तिवाले हरिको धारण किये हुए धूलि उड़ाते हुए वात्या चक्रकी तरह उस तृणावर्त्तको हरिने पकड़ा ॥६७॥

अनुवाद--इस प्रकार होनहार जैसे अखिल आकाशको धारण कारण करता हो तथा फैलाई हुई कस्तूरीके स्वास्तिकयुक्त नेपथ्यकी तरह बलरामने नीलवस्त्रके खण्डसे शोभित कण्ठको बताते हुएकी तरह अति चिकने महानील रत्नकी तरह बड़े यत्नसे व्रजरूपी समुद्र देवताके रत्नके सुन्दर मोरपुच्छके नील-कुसुमके समान कोमल आकारवाले नन्दकुमारको धारण करते हुये ही उसके सङ्ग से बढ़ी हुई सुन्दर स्वच्छताकी तरह विलम्बसे होनेवाले मोक्षके कारण उत्पन्न हुए सत्वगुण वाली व्रज नगरीकी सुन्दर विभूतिसे स्वच्छ होते हुए बहुत देरतक आकाश में और पृथ्वीपर चक्रकी तरह वह चक्रवातासुर तृणावर्त्त घूमता रहा । [भागवत में शकटासुर कथाके पश्चात् तृणावर्त्त प्रसङ्ग है] ॥६८॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तं चकर्ष चिराच्चक्री चक्रीकृतभुजद्वयम् ।
अकुण्ठमहिमा कण्ठे कण्ठीरव इव द्विपम् ॥६९॥
निपतन्नप्यधो दैत्यः सकलोपर्यरोचत ।
कृष्णस्पर्शमणिस्पर्शादसुरोऽपि सुरोऽभवत् ॥७०॥
असौ हरिपरीरम्भरसं वदे महासुरः ।
कण्ठग्राहिणि वैकुण्ठे यदकुण्ठो ददावसून् ॥७१॥

अथ विश्वम्भराभार - सम्भार - परिभूयमानो वितीर्णप्राणो गोकुल-भूमावेव प्राणपणगृहीतमितीव वैकुण्ठाकुण्ठमहिममहानील-रत्नं कण्ठे दधदेव नभोदेशात्परिवर्त्यापतत् तृणावर्त्तो नाम महादनुजः । हरिरपि तस्मिन्दत्त प्राणेऽपि प्राणाः प्राप्ताः पुनरपि किमपि प्राप्तव्यमित्याशयेनेवादत्त - तत्कण्ठस्तदुरसि कालसर्पकिशोर इव बल्लवैर्ददृशे । तदङ्कशायी मायी शिशुरसौ महामहीधरोत्सङ्गविहारी करि कलभ इव, अभिनवजलदकदम्ब इव, दैवैरपि दूरादद्दृश्यतेव बहुकालम् ॥७२॥

अनुवाद—अकुण्ठ महिमावाले हरिने दोनों भुजाओंको गोल करके सिंह जैसे गजको पकड़ता है उसकी तरह पकड़ा ॥६९॥

अनुवाद—सबके ऊपर नीचे गिरते हुए वह दैत्य शोभित हुआ । कृष्ण-स्पर्शरूपी मणिके स्पर्शसे वह दैत्य असुर होते हुए भी सुरकी तरह प्रतीत हुआ ॥७०॥

अनुवाद—उस महाअसुरने हरिके स्पर्शके आनन्दको जाना, कण्ठ ग्रहण करनेवाले वैकुण्ठमें अकुण्ठित होकर प्राण त्यागकर दिये ॥७१॥

अनुवाद इसके पश्चात् विश्वम्भरके आभारके बोझसे दुःखी होते हुए गोकुल भूमिमें प्राण देकर प्राणोंकी बाजी लगाकर मानों वैकुण्ठकी अकुण्ठ महिमा-वाले महारत्नको कण्ठमें धारण करते हुए ही आकाशसे उलटकर वह तृणावर्त्त नामका महादैत्य गिरा । हरि भी उसके प्राण देनेपर ही प्राण प्राप्त हुए हैं फिर भी और कुछ भी प्राप्त करना है इस आशासे मानों उसका कण्ठ न छोड़ते हुए उसके हृदयपर काल सर्पके किशोर की तरह गोप बालकों द्वारा देखे गए । उसकी गोदमें सोते हुए वह मायावी बालक महापर्वतपर विहार करनेवाले गज कलभकी तरह अथवा नये बादल समूहकी तरह देवताओंके द्वारा बहुत देरतक देखे गये ॥७२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शकटासुरवधः

अथ कदाचिदेकदा हरिजन्मर्क्षयोगजनितौत्थानिक महामहोत्सवकर्मणि शर्म्मनिकरनिरन्तरीकृत निखिलमर्मणि समुदयनिवार्यतौर्यत्रिकप्रकरे समवेतानामखिल घोषयोषाणामविरल - वर्द्धमानबहलकौतूहलकोलाहलानां समुचितरचनार्थमादृतया यशोदया विस्तारितसमस्त स्वस्त्ययनमधस्तादेव शकटस्यास्तृतशयनीये कपटनिद्रया मुद्रितार्द्धनयनमाहितगोरोचनैक तिलकं कुल तिलकं संवेश्य प्रस्थितं क्वापि ।।७३।।

अर्द्धोल्लसदवस्थाय मर्द्धोदञ्चददिनद्युति ।
वपुर्मायाशिशोरासीदर्द्धकालीश्वराकृति ।।७४।।

शकट भञ्जन

अनुवाद—इसके बाद हरिके जन्म नक्षत्र महोत्सवके समय तथा मांगलिक कृत्यों द्वारा अखिल मर्मस्थलोंके स्तब्ध हो जानेपर जनसमुदाय द्वारा वाद्यसमूह [तौर्यत्रिक—नृत्य गीत वाद्यमिदं त्रयं तोरितु महं तूर्यं मृदङ्गा मुरजादि तत्र भवं तौर्यं । त्रयोऽशाइतिनिकं, तौर्योपलक्षितं त्रिकं तौर्यत्रिकम्] बजानेसे रोक दिये जानेपर इकट्ठी हुई निरन्तर बढ़ते हुए कौतूहलसे कोलाहल करनेवाली शब्द करती हुई सब स्त्रियोंके समुचित सत्कार द्वारा आदर प्राप्तकी हुई यशोदाके द्वारा सब स्वस्ति वाचन सामग्री एकत्र जब करदी गई उस समय गाड़ीके नीचे बिछे हुए बिछौनेपर कपट निद्रासे आधी आँखें बन्द किए हुए, गोरोचनका तिलक लगाए हुए वंशके तिलक हरिको सुलाकर यशोदा कहीं चली गई ।।७३।।

विशेष—यह शकटके आकारवाला असुर था । 'शकट' गोपोंका पूज्य है । औत्थानिक महोत्सव–करवट लेना है । 'औत्थानिक' के पर्याय अमरकोषमें नहीं है । यह भागवतका शब्द है ।।७३।।

अनुवाद—आधेमें अपने शरीरकी अवस्था शोभित है, आधेमें दिन निकलते हुए जैसी शोभा है उस समय माया शिशु उन हरिका अर्ध नारीश्वर जैसा शरीर शोभित होता था ।।७४।।

विशेष—अर्द्ध नारीश्वरकी कल्पना द्वारा कविने अपने पांडित्यका पूर्ण परिचय दिया है । ऐसी कल्पना अन्यत्र कहीं देखनेमें नहीं आती ।।७४।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यग्रशकटभङ्गरङ्गाविर्भूतया प्रभूतया रुषेव मनाङ् मिलदर्क-कर्कशरुचा सुचारु दृक्कोण माक्रम्योज्जागरितो मानुषकिशोरानुकृतिं वितन्वानः किञ्चित्कञ्चितदृष्टिपटुकुटिलीकृतभ्रू पुट - सृष्ट लघुजृम्भा-रम्भा-विकसदर्द्ध-वदनाम्भोजं मुहुरामोटितघटित घनालस स्फुटित-घनाघन[1]-सन्निभापघनं मृदुतरतल्पतलानल्पनिर्मज्जनाभिव्यज्यमान किंकिणोप्रमुखविभूषणांकपरम्परं मन्दं मन्दं मृदुकरचरणारविन्द-मुत्क्षिपन्नेव स्तन्यार्थी चक्रन्द नन्द नन्दनो बहुकालम् । तत्क्षणजनित बुभुक्षयोत्क्षिप्तकरचरणमाक्रन्दतो नन्दनन्दनस्य ध्वज - वज्राङ्कुशकुशेशयाङ्क[2] पदपङ्कजाभिघातेन विघटित पटुचक्र कूबराद्यवयवमुद्घाटितहाटिकादिभाजनजनितझणझणाकारपूरिताशेष-दिग्भागं त्रुटित

अनुवाद—तत्काल शकटके भंगके कारण उत्पन्न मानों अत्यन्त क्रोधके कारण थोड़ी पड़ती हुई कठोर सूर्य किरणोंसे नेत्रोंपर चोंध लगनेसे मानों सहसा जगे हुए मनुष्यके बालकके समान आकार बनाए हुए कुछ तिरछी दृष्टिसे तनिक वक्र भृकुटिके से युक्त हलक जंभाईसे आधा मुखकमल खुल जानेपर बार-बार अङ्गड़ाई लेनेपर उत्पन्न हुए अत्यन्त आलससे स्फुटित होते हुए वर्षा कालीन बादलकी तरह शरीरके अङ्ग हो जानेपर कोमल शय्यापर अति करवट बदलनेसे प्रकट होते हुए किंकिणी आदि भूषणोंके बहुतसे चिह्न प्रतीत होनेपर धीरे-धीरे कोमल हाथ-पैरोंको पटकते हुए दूधकी इच्छासे बहुत देरतक नन्द नन्दन रोते रहे। तत्काल उत्पन्न हुई भूखसे हाथ-पैर पटककर रोते हुए नन्द नन्दनके ध्वज वज्र अकुश कमल चिह्नवाले चरणोंके पटकनेसे पहिया आदि अवयवोंके टूट जानेसे सोनेके पात्रोंके टूटनेसे झन-झन शब्दसे सब दिशाओंके भर जानेपर टूटे हुए घड़ा आदिसे पैदा हुए उग्र शब्दसे नगरके सब लोगोंके कान सुन्न हो जानेपर भयङ्कर शब्दके साथ वह शकट उलटकर शीघ्र ही गिर गया ॥७५॥

विशेष—शकट गोपोंका पूज्य है उसका गिरना गोपोंने अनुचित एवं

---

(1) वर्षण शीलो वारिदश्च घनाघनः स्यात् । हन्तीति विग्रहे "हन्तेर्घत्वं चेति" पचाद्यचि, द्वित्वे, अभ्यासागमे कुले च घनाघनः ।

(2) कुशेशयः—शतपत्र कुशेशयम् [अ० को० १।१०।४०]
कुशे जलेशेते कुशेशयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घटघटीघटाविघटनाविर्भूता - रावस्फुटितपुरपरम्परा - नरादि कर्ण-बाढं निपतितमचिरेण परिवृत्य शकटेन[1] ॥७५॥

आक्रन्दितमिवाकर्ण्य कर्णाय तद्दृशो हरेः ।
अनसा[2] पतितं व्यग्रमनसा तरसा भुवि ।७६॥
यादवेन्द्रपदस्पर्शादवसायित चेतसा ।
अनसा न नसा नूनमशायि तरसा भुवि ॥७७॥
शिशुभूय परं ब्रह्म पुनर्दुग्धाय रोदिति ।
समुत्पतितमित्येव चमत्कारैरिवानसा ॥७८॥
हरेः परमनोभङ्गैर्मनोभङ्गः परस्य च ।
कियद्दिनं पदाम्भोजक्षिप्तानस्त्वेन भण्यते ॥७९॥

अपशकुन कारक माना । शकट भंगकी शान्ति भी की गई पर गोपोंका गोकुल छूट गया ॥७५॥

अनुवाद—कान तक फैली हुई बड़ी-बड़ी आँखोंवाले हरिके क्रन्दनको सुनकर मानों उस समय बड़े वेगसे पृथ्वीपर दुःखी मन होकर वह शकट गिर गया ॥७६॥

अनुवाद--हरिके चरण स्पर्शसे शून्य चित्तवाला वह शकट बड़े वेगसे मानों पृथ्वीपर क्या नाकके सहारे उलटा होकर नहीं गिरा ? (अर्थात् गिरा) ॥७७

विशेष--नासा=नासिका. (नासिकाको नस आदेश हो जाता है) ॥७७

अनुवाद--परब्रह्म बालक होकर दूधके लिए रोरहा है इसी चमत्कारसे मानों वह शकट पृथ्वीपर गिर पड़ा ॥७८॥

विशेष--"एतेचांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" अर्थात् अन्य अवतार कला हैं और श्रीकृष्ण साक्षात् भगवान् हैं वे पूर्ण ब्रह्म हैं । भा. १।३।२८

अनुवाद--इस प्रकार हरिके द्वारा शकट भंग किये जानेके कारण दूसरोंका मन टूट गया और कुछ दिन तक हरिको पैरसे शकट तोड़नेवाला लोग कहते रहे ॥७९॥

विशेष—भगवान्‌की विपत्तिको देखकर स्नेही व्यक्तियोंका मन दुःखित होना ही टूटना है अथवा शकट भंगको अपशकुन मानकर भावी विपत्तिसे मन टूट गया ॥७९॥

---

(1) शकटासुरकथा भा० १० स्कं० ७ अध्याये ।
(2) अनसा=शकटेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जाता क्षुधा बलवती सविधे न माता ।
तातादिकं च न च कञ्चिदथालुलोचे ।
चक्रन्द मन्दमशृणोन्न च कश्चनेति
बालः क्रुधा शकटमेव पदा बभञ्ज ॥८०॥

विश्वरूपदर्शनम्

क्वचिदपि समये व्रजेन्द्रसुन्दरीत्रिभुवनसौन्दर्यपर्याप्त्यधिकरणमनादिमनन्तमखिलादिं सुतमाधायाङ्के निरातंकेन मनसा भृशादशालिनी स्तन्यपरिपानकृतावधानमुपलालयन्ती वप्रेति[1], पितरिति, जनकेति, तातेति, धनजनसकलसम्पदिति, विपदनयनधुरन्धरेति, बान्धवेति, जीवेति, जीवनसुखेति, सुखनिधानेति, गुणनिध इति, वत्सेति, चन्द्रवदनेति, नन्दनेति, नन्दहृदयानन्दनेति, ईश्वरेति, स्वामिन्निति, चक्षुरिति,

---

अनुवाद—उस समय भूख बहुत थी, समीपमें माता नहीं थी पितादिको तथा और किसीको भी नहीं देखा तब धीरे-धीरे रोने लगे फिर भी किसीने नहीं सुना तब बालकरूप हरिने क्रोधमें आकर पैरसे शकटको तोड़ दिया ॥८०॥

विशेष—भागवतमें दूध पीनेकी चर्चा नहीं है रोनेके साथ शकट फेंकना है 'रूदताने नपादेन क्षिप्तमेतन्नसंशयः ।" १।७।८ ॥८०॥

विश्वरूपदर्शन

[शकट--तृणावर्त्त और विश्वरूप भागवतके दशम स्कन्धके सप्तम-अध्याय में हैं]

अनुवाद—किसी समय ब्रजेन्द्रसुन्दरी यशोदा त्रिलोकीको अपने सौन्दर्यसे भरनेवाले अनादि अनन्त सबके आदि कारण पुत्रको गोदमें लेकर निर्भीक मनसे प्रसन्न होती हुई दूध पीकर सावधान हुए को खिलाती हुई हे वपु ! [वप्र=केदार, खाई, उप्यतेइतिरनिवप्रम । मेदिनी कोषमें तात अर्थमें इसका प्रयोग है परन्तु यहाँ 'तात' शब्द पृथक् स्पष्ट है] हे पितः ! हे जनक ! हे तात ! हे धन जन सकल सम्पत् ! हे दुःखमें श्रेष्ठ सहायक ! हे बान्धव ! हे जीव ! हे जीवन सुख ! हे सुखनिधान ! हे गुणनिधे ! हे वत्स ! हे चन्द्रवदन ! हे नन्दन ! हे नन्द हृदयानन्दन ! हे ईश्वर ! हे स्वामिन् ! हे चक्षु ! हे अन्धेकी लकड़ी ! हे मन ! हे आत्मन् ! सो जाओ इस प्रकार मधुके समान अत्यन्त मधुर वाणोसे कोमल करकमलके स्पर्शसे

---

(1) 'वप्रस्तातेपुमान्' इति मेदिनी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्धलगुडेति, मन इत्यात्मन्निति, निन्द्रां याहीति, मधुमाधुरीधुरीणया वाचा करकोमलकमलाभिमर्शणेन जानुद्वयविधूननेन शनैः शनैर्मुद्रिताद्धं नयनपद्मं निद्रामनुभवतो व्यात्ताननमुत्तानशायिनः शिशोराननं मुदितमुदश्रुमेदुरसुखमीक्षितुमारेभे ॥८१॥

तत्रान्तरे पुनरेकाकिनीमेव जननीमवलोक्य त्रैलोक्यवैभवमात्मकुक्षिनिक्षिप्तमघटनघटना पटीयसीं प्रपञ्च्य तामसीं तामसीममायामातिनिद्रानुकूलां मातुर्वचनालीमिव सफलीकुर्वन्सर्वं तदवस्थ एव मात्रे[1] दर्शयामास ॥८२॥

सापि क्वचिदिन्द्रं क्वचिदिन्दुं क्व च सिन्धुं क्व च बन्धुं क्वचिदपि विन्ध्यमन्दरमेरुकैलासमलयमुखावनीधरं कुत्रापि सुरनरकिन्नर सिद्धविद्याधर यक्षरक्षो नक्षत्र ग्रहचक्रं किमपरमखिलं जगदेव वितस्तिमात्र विस्तारभाजो बालस्य गर्भैकदेशे विवर्त्तमानमालक्ष्य किमिदमिति सम्भ्रमाच्चक्षुषो पिदधे निजमोहमेव मेने यशोदा ॥८३॥

दोनों घुटनोंके हिलानेसे धीरे-धीरे आधे नेत्रकमल बन्द करते हुए चित्त लेटे ऊपरको मुख करके सोते हुए बालकके मुखको निकले हुए प्रसन्नताके अश्रुकणोंसे सुन्दर मुख करके देखने लगी ॥८१॥

अनुवाद—इसी अवसरपर अकेली माताको देखकर अघटित घटनामें चतुर अपनी तामसी मायाका आश्रय लेकर निद्राके अवसरपर ऊपर कही हुई अपनी माताकी वचनावलीको सफल करते हुए उसी अवस्थामें रहकर ही अपनी कुक्षिमें स्थित तीनों लोकोंके वैभवको हरिने दिखाया ॥८२॥

विशेष—भागवतमें श्रीकृष्णके दुग्धपान करनेके उपरान्त जंभाई लेते समय विश्वरूप दर्शन है। (भा० १०।७।३५) ॥८२॥

अनुवाद—माता यशोदाने कहीं इन्द्र [भागवतमें इन्द्रका उल्लेख नहीं है] को कहीं चन्द्रमाको कहीं समुद्रको कहीं भाई [भाईका उल्लेख भी भागवतमें नहीं है] को कहीं विन्ध्य मन्दर मेरु कैलाश मलयादि पर्वतोंको कहीं सुरनर किन्नर सिद्ध विद्याधर यक्ष राक्षस नक्षत्र ग्रह चक्रको अधिक क्या सारे संसारको वितस्ति मात्र बालकके गर्भके एक भागमें बदलते हुए देखकर यह क्या है इस भ्रान्तिसे आँखें बन्दकर लीं और यशोदाने अपना मोह ही समझा ॥८३॥

---

(1) विश्वरूप दर्शन कथा भा० १० स्क० ७ अध्याये।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत एव केचन पुनरिदमादिकैतव परम्पराः कैटभारातेरवधायैव-मभिदधते सुधियः ॥८४॥

[1]क्रोडारूढो निपीय स्तनरसमलसीभूय निद्रामुपेत्य
व्यातेने मातृमोहं कपटघटनया यद्भवान् कैटभारे ।
आजन्माजिह्मधर्मस्तुतिमुखरमुखब्रह्मणो मूढभावं
तद्गोपीनां च तादृक्त्वयि पुनरियता योगिनः सावधानाः[2] ॥८५॥
अतल्पे तल्पे वा स्वपिति न विकल्पं वितनुते
मृदं माध्वीकं वा ग्रसति रसभेदं न मनुते ।
अमित्रं मित्रं वा स्पृशतु जनमात्रं मदयते
शिशोस्तत्वज्ञानादधिकसुखदा नाम शिशुता[3] ॥८६॥

विशेष—खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दु वह्निश्वसनाम्बुधींश्च । द्वीपान् नगांस्तद् दुहितुर्वनानि भूतानि यानि स्थिर जङ्गमानि ॥ भा० १०।७।३६॥

अनुवाद--इसीलिये इस प्रकारकी हरिकी कैतव परम्पराको देखकर कुछ विद्वान् ऐसा कहते हैं ॥८४॥

अनुवाद—गोदमें बैठकर माताका दूध पीकर आलसमें आकर और फिर निद्राका अनुभव करके हे कैटभारे ! आपने इस कपट चातुरीमे माताको मोहितकर लिया साथ ही जन्मसे लेकर सरल धर्म और स्तुतिमें मुखर मुखवाले ब्रह्माका मूढभाव तथा गोपियोंका विचित्र भाव देखकर आपके विषयमें योगी बड़े सावधान हैं ॥८५॥

अनुवाद—आप कभी शय्यापर कभी शय्या रहित सोते हैं कभी ध्यान नहीं करते, कभी मिट्टीका, कभी मधुका भोजन होता है । किसीमें रसका भेद प्रतीत नहीं होता चाहे मित्र या उदासीन कोई भी स्पर्श करे प्रत्येक मनुष्य प्रसन्न हो जाता है । शिशुके इस तत्त्वज्ञानके भावसे शैशवकाल बड़ा सुन्दर प्रतीत होता है ॥८६॥

विशेष—बालकका न कोई मित्र होता है न शत्रु । बालकको मिट्टी और मधुके रसमें कोई भेद नहीं दिखलाई पड़ता ॥८६॥

---

(1) क्रुडयते इति क्रोडं, 'क्रोडं भुजान्तरम्' । हैमकोषकारने इसका अर्थ गोद भी किया है । २।६।७७.
(2) स्रग्धरा छन्दः । (3) शिखरिणी छन्द ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बालक्रीडा

क्षणं जनन्या जनकस्य च क्षणं,
कृतक्षणं वक्षसि निर्ममज्ज सः ।
सघोष हासस्फुरदद्विजाननो,
ममज्जतुस्तौ सुखतोयधौ पुनः[1] ॥८७॥

हुताश मत्रासमधत्त पाणिना,
भुजङ्गमादत्त स रङ्गमानसः ।
निवार्यमाणोऽपि जनैः कृतेक्षणैर्न,
वीरता शैशवसाम्य मञ्चति ॥८८॥

रजो विभूषा परिधा दिगम्बरं,
धरैव शय्या हसितं च भाषितम् ।
उपेतमात्रस्य सुखार्पणं क्रिया,
मुरद्विषाकारि शिशुत्त्व संपदि ॥८९॥

हरिदम्बरो वदनवादनप्रियो,
गणपालकार्भगिरिजातकौतुकः ।

बाल क्रीड़ा

अनुवाद--क्षणभरमें माताके और क्षणभरमें पिताके वक्षस्थलपर बड़े आनन्दके साथ हरि बैठते थे । घोषोंकी हंसीके साथ दाँत और मुख बन्द किये हंसते नन्द यशोदा दोनों सुखके समुद्रमें तैरने लगते थे ॥८ ॥

अनुवाद—दृष्टि डालते हुए लोगोंके द्वारा रोके जाते हुए भी कभी हाथ-पर अग्निको रखते थे कभी प्रसन्न होकर साँपको पकड़ते हैं । वीरता बालकपनकी बराबरी नहीं कर सकती । ८८॥

विशेष—सर्पके प्रदर्शन कर्त्ता सर्पका खेल दिखाते तो नन्दनन्दन उसे पकड़ लेते, अग्निका स्पर्शकर लेते ॥८८॥

अनुवाद -भूषण केवल धूलिका, पहिनावेमें केवल दिगम्बर शय्या केवल पृथ्वो, हंसना ही बोलना आनेवालेको सुख देना शैशव-कालमें भगवान्का यही कार्य था ।८९॥

विशेष—वे धूलि-धूसरित रहते, दिगम्बर खेलते पृथ्वीपर लेट जाते, हंसनेके द्वारा ही मानों बोलते और अपनी चेष्टाओंसे सबको सुख देते थे ॥८९॥

अनुवाद – दिगम्बर [हरित्=दिशा—दिशस्तु ककुभःकाष्ठा आशाश्च

---

(1) वंशस्थ छन्द ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हरिरर्भकोऽपि गृहिणां महेश्वरो,
बलभूति दर्शितशरीरसौभगः ॥९०॥
अलकाकुलालिकमनोऽभिनन्दनः,
शिशुराननन्द भुविनन्दनन्दनः ।
उरसा प्रयाणरभसप्रयास भाग्
घनसारपङ्कपरिसंकुलाकृतिः ॥९१॥
कृतचूङ् कृतिगृहणतोऽभिधानं,
पितुरग्राहितहस्तयोः प्रयातुम् ।
चलदङ्घ्रितमोघ झम्पमीहे.
कति कैशोरवशोनृकेसरीह ॥९२॥
भुविलुठच्चरणं करजानुना,
क्वणित घर्घरनूपुर किङ्किणि ।

हरितश्वताः] अर्थात् वस्त्र रहित मुखका बाजा बजानेवाले ये पर्वतपर गणेशके तरह व्रजमें कौतुक करनेवाले, गृहस्थियोंके स्वामी श्रीहरि बलके वैभवसे शरीरके सौन्दर्यको प्रकट करते थे ॥९०॥

विशेष—बालकका मुखसे शब्द करना ही बाजा बजाना होता है । ९०॥

अनुवाद–केशपाश [अलका कुबेर पुर्यामास्त्रियां चूर्णकुन्तले (मोहिनीको.) अलति अल्यतेवेति अलकः] के द्वारा सुन्दर प्रतीत होनेवाले सुन्दर लगनेवाले बालकरूप नन्दनन्दन हरि सबको प्रसन्न करते थे । वक्षस्थलसे चलनेमें वेगसे प्रयास करनेवाले घने कपूरसे शरीरको सुन्दर बनाये हुए थे । ९१॥

विशेष—घनसारः=कपूर [घनोदृढः सारोऽस्य=घनस्य सार इव वा घनघारः ॥९१॥

अनुवाद—पिताके नाम लेनेपर चुङ्कारकर देते थे, चलनेको पिताके हाथ भी नहीं पकड़ते थे, किशोर अवस्थामें नृसिंह भगवान् चलते हुए अपने पैरों-को हिलाते जाते थे ॥९२॥

विशेष—झम्पा शब्द अमरकोषमें नहीं है । "अरबराय कर पानि गहावत डगमगात धरनी पैंया" सूरकी बाललीलासे साम्य है ॥९२॥

अनुवाद—पृथ्वीपर चरणोंको घसीटते हुए हाथों और घुटनोंसे नुपुर

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स जननी जनकोत्सवमाव,
हंश्चलितु मैच्छदगच्छद वत्सरः ॥९३॥
स्खलन्नपि पुनः पुनः परमयत्नतो जानुनी
निधाय धरणीतले करतले च कौतूहली।
हसन्मुखमुरस्थलीतरलतारहारं हरि-
र्व्रजन्नहरदन्तरादहरहर्व्रजानां मनः ॥९४॥
यन्नामापारसंसारपारावार मतीतरत्।
शङ्कते स करालंबी तरीतुं पितुरङ्गणम् ॥९५॥
आश्वासमिव कुर्वाणो मह्या एव यदूद्वहः।
महीपृष्टेऽर्पयत्पाणी जानुभ्यामनुसंचरन् ॥९६॥

और किङ्किणी घर्घर करके बजाते हुए माता और पिताको प्रसन्न करते हुए चलने की इच्छा करते थे और छोटी अवस्थामें वैसे ही चलते थे। ["जानुभ्यां सहपाणिभ्यां रिङ्गमाणौ विजह्नतुः" भा. १०।८।२६] ॥९३॥

विशेष—श्रीकृष्णके आभूषणोंकी ध्वनिसे माता-पिता प्रसन्न होते हैं ॥

अनुवाद—बार-बार गिरते हुए बड़े यत्नसे पैरोंको पृथ्वीपर रखकर हाथोंसे कौतूहल करते हुए मुखमे हंसते हुए हृदयपर चञ्चल हार रखते हुए चलते हुए बीच-बीचमें व्रजवासियोंके मनको प्रसन्न करते थे ॥९४॥

विशेष—श्रीकृष्ण एक प्रकारसे बालजातिके प्रतिनिधि हैं उनकी क्रीडासे यावन्मात्र शिशुओंके अभिभावकोंको सुख मिलता है। अपने चांचल्यके कारण वे व्रजवासियोंका मन वशमें कर लेते हैं ॥९४॥

अनुवाद—जिनका नाम अपार संसाररूपी समुद्रसे पारकर देता है, वह हरि हाथोंका सहारा लगाते हुए पिताके आंगनको पार करनेमें शङ्का करते हैं ॥

विशेष—यह भाव कविकी भगवान् श्रीकृष्णके प्रति अगाध श्रद्धाका परिचायक है ॥९५॥

अनुवाद—यदुकुल भूषण हरि पृथ्वीको आश्वासन-सा देते हुए घुटनोंसे सरकते हुए महीतलपर हाथ रखते थे ॥९६॥

विशेष—पृथ्वीने गौका रूप धारणकर प्रार्थनाकी थी कि मेरा बोझ कम करें मानों हस्तकमलसे धैर्य बंधा रहे हैं कि मैं आगया हूँ ॥९६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यशोदाया दधिमन्थनम्

चलत्कनक मेखला कलकलाभिरामाक्वण-
त्कराग्रमणिकङ्कणा तरलहेमहारा हृदि ।
उदीरितहरिक्रियागुणरुचेर्यशोदा स्वयं
ममन्थ दधि मन्थरं, मुरजिदङ्गति[1] प्राङ्गणे ॥९७॥

श्रोणीकूले दुकूलं तदुपरि रसनां कण्ठमालां च कण्ठे
धम्मिल्ले मल्लिकायाः स्रजमुरसिजयोः कञ्चुलीं चादधाना ।
शिञ्जन्मञ्जीरमञ्चन्मणिवलयकरं सा दधि श्रद्दधाना
मन्दं मन्दं ममन्थ व्रजपतिनगरश्रीर्यशोदा यशोदा[2] ॥९८॥

वारं वारमुपैति मन्थनविधौ मन्थान्तिके माधवो
मातः कर्षति चोलमञ्चति हसन्मन्थानमालम्बते ।

यशोदाका दधि मन्थन

अनुवाद—स्वर्ण मेखलाके हिलते हुए कल-कल शब्दसे लगनेवाली हाथों में बोलते हुए मणिके कङ्कणोंवाली हृदयपर चंचल स्वर्ण हार पहने हुए हरिकी गुणवाली क्रियाओंको रुचिसे कहती हुई यशोदा स्वयं धीरे-धीरे दधि मन्थन करती थीं और हरि आंगनमें चल-फिर रहे थे ॥९७॥

अनुवाद—कटि भागपर साड़ी [दुकूलका अर्थ दुपट्टा भी है पर यहाँ साड़ी अर्थ ही समीचीन है साड़ीपर कमरमें करधनी पहनी जाती है—भागवतमें भी ऐसा वर्णन आया है—"क्षौमंवासः पृथुकाटितटे विभ्रती सूत्र नद्धां ।" भागवत १०।९।३] उसके ऊपर तगड़ी कण्ठमें कण्ठमाला केशोंमें मल्लिकाकी माला हृदय-पर कञ्चुकी पहिने हुए घुंघरू धीरे-धीरे बजते हुए मणि कङ्कण हाथोंमें पहने हुए बड़ी श्रद्ध करती हुई धीरे-धीरे यशस्विनी गोकुल नगरीको शोभारूप यशोदा दधि-मन्थनकर रही थी ॥९८॥

विशेष—माताओंका स्वभाव ही है कि वे अपने प्रिय पुत्रका अहर्निश चिन्तन करती हैं फलतः यशोदा दधि-मन्थनके समय हरिकी लीलाओंको भी सुस्वर कण्ठसे गारहीं हैं ॥९८॥

अनुवाद—यशोदाके मन्थन करते हुए बार-बार माधव मथानोके पास

---

(1) अङ्गति=गच्छति । अगिधातुर्गत्यर्थकः ।
(2) स्रग्धराच्छन्दः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तन्यं प्रार्थयते पिबत्यपि करैर्हैयंगवीनं दधद्
भुङ्क्ते चेति निरीक्ष्य नन्दगृहिणी मग्ना मुदम्भोनिधौ[1] ॥९९॥
कराभ्यां जानुभ्यामुपचितकिणाभ्यां लघुचल-
न्सपङ्कालङ्कारो हरिरलि कलम्बालक-कुलः ।
जनन्या नानेति स्तनित जनितानन्दलहरी
परीवाह प्रायः स्मितरुचि ममज्जोरसि मुहुः[2] ॥१००॥

दामोदर लीला

एकदा यदुमणिः क्षुधातुरस्स्तन्यमेव जननीमयाचत ।
सापि चारु परिचुम्ब्य तन्मुखं दातुमारभत दुग्धमात्मनः ॥१०१॥

आते हैं, हंसते हुए माताकी चोलीको खींचते हैं और मथानी पकड़ लेते हैं, दूध माँगते हैं और पीते हैं। माखन लेते हैं और खाते हैं यह देखकर नन्द पत्नी यशोदा आनन्द समुद्रमें मग्न हो जाती हैं ॥९९॥

विशेष--बालककी स्वाभाविक क्रियाका निरूपण है ॥९९॥

अनुवाद—हाथोंसे किणयुक्त घुटनोंसे धीरे-धीरे चलते हुए कीचड़ एवं अलङ्कारोंसे युक्त भालपर लम्बे बालोंसे शोभित माताके न न कहते हुए मन्दहास-पूर्वक बोलीके आनन्द लहरीसे मग्न होकर हृदयसे आकर लग गया ॥१००॥

विशेष—घुटने एवं हथेली धरतीपर चलनेसे कुछ कठोर है उनपर घिसटनेका चिह्न बन गया है वह किण=चिह्न है ॥१००॥

दामोदर-लीला

अनुवाद—एक बार भूखसे आकुल होकर हरिने मातासे दूध माँगा, [भागवतमें भी ऐसा उल्लेख है --"तां स्तन्यकाम आसाद्य मथनन्तीं जननीं हरिः। गृहीत्वा दधिमन्थानं न्यषेधत् प्रीतिमावहन् ॥" भा० १०।९।४ । वह भी सुन्दर उसके मुखका चुम्बन करके अपना दूध देने लगी ॥१०१॥

विशेष—वात्सल्य रसकी तृप्ति ही प्रभुके अवतरणका उद्देश्य है गोलोक-धाममें वात्सल्य अतृप्त रहता है आपने अपना अवतार लेकर इस रसकी तृप्तिकी है फलतः आप आप्तकाम होते हुए भी, माँकी प्रसन्नता हेतु स्तन्य माँग रहे हैं ॥

---

(1) शार्दूल विक्रीडितच्छन्दः ।
(2) शिखरिणी छन्दः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोरसे मयि रसा रसायने बल्लवीस्तनरसस्तु पीयते ।
क्षीरसिन्धुपतिनेति मत्सरादुत्ससार सहसानले पयः ॥१०२॥
अर्धपीतमपहाय माधवं दुग्धरक्षणकृते दधाव सा ।
प्रार्थयन्नहह तामनुव्रजन्सोऽग्रतो दधिघटीमुदैक्षत ॥१०३॥

दधि भाण्ड भञ्जनम्

सातङ्कदृष्टि जननीपथमीक्षमाणो
द्वाभ्यां दधीनि वदने च ददत्कराभ्याम् ।
तद्गोरसस्य दहनोत्पतन व्रतानि
तानीव कैटभरिपुः सफलीचकार[1] ॥१०४॥

स खलु मनुज कैशोरमनुकुर्वाणो नानोपायेन प्रतिनवदशनांकुरार्द्धदशनबद्धमुष्टिकरकमलचपटापाटनधरणितलाभिघर्षणादिना दधि-

अनुवाद—गौओंकी पक्तिसे शोभित वह मार्ग श्वेत समुद्रफेनसे शोभित समुद्रकी मानों स्पर्धा अर्थात् बराबरी-सी कर रहा था ॥३८।

अनुवाद—चारों ओर दौड़ती हुई पाप नाशिनी श्वेत गौओंकी पंक्तिने भूलोकको मानों गोलोक बना दिया था ॥३९॥

अनुवाद—क्षीरसागरकी सौम्य तरङ्गें जिस प्रकार वायुके द्वारा मर्यादा में रहती हैं उसी प्रकार धूल उड़ाती हुई गौयें अपनी पदवीपर दौड़ रहीं थीं ॥।

अनुवाद—शुभ्र-पलंग एवं अलङ्कारयुक्त गाड़ीपर गोकुलसे चारों ओर घिरे हुए केशव ऐसे प्रतीत होरहे थे, जैसे फणावृन्दसे शोभित शेषनागकी गोदमें सो रहे हों ॥४१॥

---

(1) कमलानाम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मध्यारूढहरिप्रौढमनः पाण्डुपरिच्छदम् ।
उडूनामिव[1] पूर्णेन्दुर्गवामन्तरगाहत ॥४२॥
क्व दूरोत्क्षेपणं पद्भ्याम् मनसःक्वावगाहनम् ।
प्रभुरेव विजानीते निग्रहानुग्रहावपि ॥४३॥
तदानांसि मनांसीव वृषैरिव महावृषैः ।
योजयामासुराभीरा[2] वीराहङ्कारकारिणः ॥४४॥
महोत्कण्ठा मनांसीव तदनांसि महावृषाः ।
आशु प्रोड्डीनयामासुः पोतानिव महानिलाः ॥४५॥
द्विधाबद्धबलीवर्द्दमधावन्ननसो गणाः ।
घना इव घनीभूय पुरोञ्चत्क्रोञ्चपङ्क्तयः ॥४६॥

शकटवृन्दवर्णनम्

गम्भीरैरनसां घोषैश्चक्रप्रोद्धूतधूलिभिः ।
अवरुद्धं नभो वीक्ष्य मेनिरे दुर्दिनं परे ॥४७॥

अनुवाद—जिसके मध्यमें हरि विराजित हैं ऐसो पीले आवरणवाली गाड़ी गौओंके बीच ऐसे प्रविष्ट हुई जैसे पूर्णचन्द्र तारागणमें प्रविष्ट होता है ।

अनुवाद—कहाँ तो प्रभुने एकबार शकटको पैरोंसे दूर फेंक दिया था और उसे पलट दिया था, और कहाँ आज उसमें अन्दर लेटे हैं, निग्रह तथा अनुग्रह करना प्रभु ही जानते हैं ॥४३॥

अनुवाद—वीर अहङ्कार करनेवाले गोपोंने गाड़ियोंको बैलोंसे तथा मनको बड़े पुण्योंसे जोड़ रक्खा था ॥४४॥

अनुवाद—बड़ी उत्कण्ठावाले महात्मा जसे मनकी हरिमें उड़ान लगाते हैं, उसी प्रकार बैलगाड़ियोंको, वायु वेग जैसे जहाजोंको तेजले जाता है वैसे ही तेजले जारहे थे ॥४५॥

अनुवाद—जिसके दोनों ओर बैल जुते हैं ऐसे शकट समूह, सुन्दर क्रौञ्च पक्षियोंकी तरह इकट्ठे होकर मार्गमें दौड़ रहे थे ॥ ६॥

शकटवृन्द वर्णन

अनुवाद—शकट समूहके गम्भीर घोषसे तथा पहियोंकी उठी हुई धूलसे भरे आकाशको देखकर कुछ लोग दुर्दिन समझ रहे थे ॥४७॥

---

(1) ताराणाम् । (2) गोपाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रजोरुद्धनभोघोषमुखराशमनः कुलम् ।
समुद्ग्रीव मुदैक्षन्त मण्डलानि शिखण्डिनाम् ॥४८॥
अधावन्त गवां धाराः कोटिधैव पुरोऽनसाम् ।
दुर्वाराः सलिलासाराः श्रावणाम्भोमुचामिव ॥४९॥
पाण्डरं पाण्डुभिर्नद्धमुख्यमुख्ये द्विधाग्रतः ।
अविन्ददनसो वृन्दं कोटिकुम्भीन्द्रसौभगम् ॥५०॥
व्रजाम्भोजदृशामङ्गभासामासीच्चमत्कृतिः ।
अनोवृन्देषु तुन्देषु शैलेष्विव तडित्विषाम् ॥५१॥
रोहिणी च यशोदा च रोहिणीशनिभाऽऽनने ।
गायन्त्यौ सुतयोः कर्म्म शर्म्मसिन्धौ ममज्जतुः ॥५२॥
महीधरमहादण्डमण्डितं मुरवैरिणः ।
पिहितार्करजोनीलच्छत्रमादत्त मेदिनी ॥५३॥

अनुवाद—मयूरोंका समूह धूलसे भरे हुए आकाशमें शब्द करनेवाले शकट समूहको ग्रीवा उठाकर देख रहा था ॥४८॥

अनुवाद—श्रावणके बादलोंकी न रोकने योग्य जलधाराकी तरह गौओं-की वह धारा शकट समूहके आगे अनेक प्रकारसे दौड़ रही थी ॥४९॥

अनुवाद—श्वेत तथा अग्रभागमें पीत रज्जुसे दोनों ओर मुख्यभाग बँधे हुए शकट समूह करोड़ों कुम्भीन्द्रके समान प्रतीत होते थे ॥५०॥

अनुवाद—बड़े-बड़े शकटपर बैठी हुई व्रजकी कमल सदृश नेत्रवाली गोपियोंकी अङ्ग शोभाका चमत्कार पर्वतोंपर बिजलीकी कान्तिके समान प्रतीत होता था ॥५१॥

अनुवाद—चन्द्रमाके समान मुखवाली रोहिणी और यशोदा कृष्ण-बल-रामके चरित्रका गान करती हुई आनन्दके समुद्रमें मग्न होरहीं थीं ॥५२॥

अनुवाद—पहाड़रूपी महान दण्डसे शोभित धूलिसे ढँके हुए सूर्यरूपी नीलच्छत्रको पृथ्वी मुर वैरी श्रीकृष्णके ऊपर लगाये हुये थी । पर्वतको छत्र दण्ड तथा धूलिसे आच्छादित रविकी नील धूलिको छत्र मानकर कविने मुरके अरि कृष्णके ऊपर छत्रको कल्पना पृथ्वीके द्वाराको गई है यह अत्यन्त सुन्दर है ॥५३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आभीरनिकरोत्तानविषाणध्वनिधोरणी ।
अन्तरान्दोलयामास द्विषामपि दिशामपि ॥५४॥
हम्भाराश्चैव वत्सानां धेनूनामपि हुङ्कृतैः ।
[1]उक्षातिशयहिक्काभिरापुपूरे नभोऽन्तरम् ॥५५॥
विश्राम्यन्त्यः प्रतिच्छायं पश्यन्त्यः प्रतिभूरुहम् ।
गृहादपि सुखं वर्त्म मेनिरे व्रजसुभ्रुवः ॥५६॥

मध्याह्न वर्णनम्

धावन्धावमन्धकारध्वंसिनि मधुरिपुमधुरमुखेन्दोरवलोकनेन लोचनेन्दीवरमेव सानन्दीकर्त्तुमम्बरमध्यमवलम्बमाने किरणमालिनि संमुखमवगाह्य स्वच्छन्दं हरिमुखचन्द्रमनुपश्यतीव गति विस्मृतिवशात्, निस्पन्दीभवति मध्याह्ने, मिहिरतनूजा[2]वार्यवगाह्य निर्वाह्यापि माध्याह्निकमह्नायाह्निकमानह्यापि सबहुबाह्य पट्ट-शकटकोटि माट-देव वृन्दाटवीनिकटवटकाननोपकण्ठं स वैकुण्ठो व्रजकण्ठीरवाकुण्ठ-

---

अनुवाद—गोप समूहके ऊँचे उठे हुए शृङ्गोंकी ध्वनि समूहने बीचमें दिशाओंको तथा शत्रुओंको भी हिला दिया है ॥५४॥

अनुवाद—गौओंके हुङ्कारोंसे तथा वृषभोंके हिक्का शब्दसे व बछड़ोंके हम्भारोंने आकाशके मध्यभागको भर दिया ॥५५॥

विशेष—स्वभावोक्ति अलङ्कार है ॥५५॥

अनुवाद—व्रजकी गोपियोंने प्रत्येक छायामें विश्राम करते हुए तथा प्रत्येक वृक्षको देखते हुए मार्गमें घरसे अधिक सुख माना ॥५६॥

मध्याह्न वर्णन

अनुवाद—दौड़ते-दौड़ते अन्धकारको नष्ट करनेवाले मधुरिपुके मधुर मुखचन्द्रके अवलोकनसे नेत्रकमलको प्रसन्न करनेके लिये अंशुमाली सूर्यके आकाशके मध्यभागमें आ जानेपर सम्मुख स्नान करके मानों स्वच्छन्द होकर भगवान्के मुखचन्द्रको देखते हुएकी तरह अथवा गति भूल जानेके कारण मध्याह्न कालके स्थिर हो जानेपर यमुनाजलमें स्नान करके शीघ्र ही मध्याह्नका नित्यकर्म पूरा करके अनेक वाह्य शकटकी सब कोटियोंको ठीक करके वृन्दावनके समीप वट-

---

(1) वृष. ।
(2) यमुना (मिहिरः=सूर्यः तस्य तनूजा=तनया) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिवारः। यस्मिन्नस्ति हि भाण्डीरो नाम महावटविटपी निखिल पटीयोऽवनी मण्डनीभूतः ॥५७॥

यस्याधो न पतन्ति वर्षति पयोवाहे पयोबिन्दवो
मूलं न प्रभवन्ति वीक्षितुमहो नक्षत्रमित्रेन्दवः।
छत्रस्येव दलैरजस्रनिबिडैश्छिन्नस्य विश्रामभू
र्यच्छाया मरुतोऽभिजुष्टसरितो दूराध्व संचारिणः ॥५८॥

असितदलभवच्चतुर्विभागः
प्रतिनवपल्लववल्लभोच्चमूर्द्धा।
अचरमचरमाचलोपमानं
प्रतिदिन मञ्चति सन्ध्ययोर्द्वयोर्यः ॥५९॥

यस्तु प्राघुणक सपर्यापर्याप्तये दिग्दिगन्तसंचारिणोऽनन्तपान्थान्मृदुपवनविधूयमाननव किसलयपाणिना विहङ्गकलरवैराह्वयन्निव, दलभूरिभारविनमितशिखरतया तानेव प्रणमन्निव, नव किसलयोपचीयमानशोणतया तेष्वेवानुरागगरिमाणमुद्गिरन्निव, निजनिकटपटु-

---

काननके पास व्रजविहारीका प्रसन्न परिवार भ्रमण करता रहा। जिसमें भाण्डीर नामका बहुत बड़ा वट वृक्ष है जो बहुत सुन्दर तथा पृथ्वीका अलङ्कार भूत है ॥

अनुवाद – मेघ बरसनेपर जिसके नीचे जलकी बूँदें नहीं गिरतीं और सूर्य चन्द्रमा नक्षत्र जिसकी जड़को नहीं देखपाते, निरन्तर घने पत्तोंसे ढँके हुए छत्रकी तरह जिसकी छाया दूर मार्ग तक चलती हुई तथा यमुना जलके सम्पर्कवाली हवासे सुन्दर विश्रामकी स्थली बनगई है ॥५८॥

अनुवाद –प्रत्येक नवीन किसलयके समान सुन्दर तथा ऊँचे मस्तकवाला हरे पत्तोंके चार भाग बनाये हुए जो प्रतिदिन सायम् दोनों सन्ध्याकालमें उदयाचल अस्ताचलकी मानों पूजा करता है ॥५९॥

विशेष–उत्प्रेक्षालङ्कार ॥५९।

अनुवाद –जो अतिथियोंका सत्कार करनेके लिये अनेक दिशाओंसे आये सब पथिकोंको मृदु पवनसे हिलते हुए नव किसलयरूप हाथसे पक्षियोंके शब्द द्वारा बुलाते हुएकी तरह, पत्तोंके भारसे नम्र शिखर द्वारा उनको प्रणाम करते हुएकी तरह, नये पत्तोंपर बढ़ी हुई लालिमाके कारण उनपर अनुराग भारको प्रकट करते हुएकी तरह, अपने निकट बहती हुई यमुनाकी मृदु-तरङ्गोंमें विहार

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

घटमानपुटकिनीवल्लभनन्दिनी लघुतरलहरिविहारहारहारिणा नानाविधकमलकुलकल्हारकुमुदाटवीपर्यटन श्रमादिव, उपचितमञ्जुकञ्ज पुञ्जकिञ्जल्कक्लपबहुसौरभभावगौरवादिव, मन्दं मन्दं हता स्वगन्धैः ? कृत पुष्पन्धयनिवहेन गन्धवाहेन दरान्दोली भवद्भिरभिनवपल्लव चारु चामरैस्तानेव वीजयन्निव, निजतलपतितदलौघैस्तेषामेवासनसम्पदं सम्पादयन्निव, निजमुद्भावयति सतां भावम् । अतिविजनतरातिशीतलविततलवर्तिभिरविरलविनिवेशपेशलकिशलयपरं-परं व्याप्तव्योमतया यच्छिर एवावधार्यतेव्योम । निजगुरुभारनिर्भरन्यग्भावभुग्नीभवदवनिमेवोद्धर्त्तुमुपचीयमानो जटा कपट प्रकटित कोटिरिव. अविरतविरतविहितविष्णुपद[1]प्रकाशो बहुशोभमानशिफा[2]

करनेवाले तथा अनेक प्रकारके कमल समूह कल्हार कुमुदादिके समूहमें भ्रमणके परिश्रमसे मानों इकट्ठी हुई कंज समूहकी सौरभके भावसे प्राप्त मानों गौरवसे धीरे-धीरे अपनी उत्कट गन्धसे अन्य गन्धको दबाकर भ्रमर समूहको साथ लिये वायुके द्वारा कुछ हिलते हुए, नवीन पत्तोंके सुन्दर चंवरों द्वारा उन अतिथियोंका उद्वीजन करते हुएकी तरह, अपने नीचे गिरे हुए पत्तोंसे उन अतिथियोंको आसन देते हुए अपने आपको सदाचार व्यवहार करता हुआ प्रकट करता है। अति विस्तृत जन शून्य शीतल तलपर बैठने वालोंके द्वारा अत्यन्त घना कोमल पत्तोंकी परम्परा वाला आकाशमें व्याप्त होनेके कारण जिसका सिर ही आकाश है ऐसा निश्चय किया जाता है । अपने अधिक भारसे झुकती हुई टेढ़ी हुई पृथ्वीको उठानेके लिये बढ़े हुए मानों जटाके बहाने प्रकटितकी है कोटि अथवा नोक जिसने ऐसा निरन्तर अथवा कभी आकाशको प्रकाशित करनेवाला, अत्यन्त शोभित जटाओंके बहाने बढ़े हुए हजारों पैरों वालेके समान, गज शुण्ड सदृश स्थूल तथा निरन्तर धारा-वर्षणसे व्याप्त पृथ्वी तलपर छाये हुए मेघमण्डलके समान, खुली हुई जटाभारसे युक्त समाधिरत योगीके समान, निरन्तर पत्तोंके भारसे भङ्ग हो जायगा इस शङ्कासे बीच-बीचमें मोटे-मोटे जिनमें स्तम्भ लगाये हों, तथा असह्य बोझको ढोती हुई पृथ्वीके जटा सदृश मोटी बँधी हुई रस्सियोंकी तरह अथवा अत्यन्त घनी और चिकनी छाया होनेके कारण शीतल पवनको खानेके

---

(1) आकाश ।
(2) शेते इति शिफा बटादेःशाखाया अवलम्बिनी शिफा (मूलम्) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याजविजृम्भित बहुपातसहस्रपादिव, करिकर परिपीवराविरल-तरासारस्यूत धरणितलाकाशतल कादम्बिनीमण्डल इव, विगलित-जटाभार समाधिसार महायोगीव, अविरलदलभूरिभारैर्भङ्गः स्यादिति शङ्कयैवान्तरान्तरानिहित स्थूलस्थूणाभिरिवाविषह्यमानभरभरित-वाह्यमानमह्या एव शिक्कानुकूलस्थूलरज्जुभिरिवातिनिबिडतराति-स्निग्धच्छायतयाशिशिर तरानिलकवलनकुतुकेन प्रतिविटपविलम्बमाना-भिरहिपरम्पराभिरिवातिदीर्घकालोद्भूततया द्राघीयसीभिरंगरुहराजो-भिरिव जटोपजटाभिरभिजटालो बहूवाऽऽलोकि परमाश्चर्यमिव व्रज-लोकैः। हरिः पुनरवलोक्य भाविरभसस्थलमिति जहर्ष, जहास च, निगूढम्। तत एव नातिदूरे निखिलनृगोकुलानन्दावनं वृन्दावनं कालिन्दी निकटे च, शकटैरर्द्धचन्द्राकृतिं विधाय विदधिरे निर्भियः सुखनिवासमाभीराः ॥६०॥

महीमूर्त्तेः शम्भोस्तपनतनयाम्भोसितलसद्
गुरुग्रीवं गोभिर्विहितहित गाङ्गेयलहरि।

उत्साहसे प्रत्येक शाखामें लटकते हुए लम्बे सर्पोंकी तरह अति दीर्घकालमें प्राचीनताके कारण उत्पन्न हुई लम्बी-लम्बी रोमपक्तिकी तरह जटाओं और उपजटाओं से जटाधारी वह महान् "वटवृक्ष" परम आश्चर्यकी तरह व्रजवासियों द्वारा देखा गया। भगवान् कृष्ण उसे देखकर भविष्यमें क्रीड़ा स्थल जानकर प्रसन्न हुए और मनमें हँसे। वहाँसे थोड़ी ही दूरपर सब मनुष्यों तथा गौओंको आनन्द प्रदान करनेवाले वृन्दावनको यमुनाके किनारे शकट समूहसे अर्ध चन्द्राकार बनाकर निर्भय होकर ग्वाल-बालोंने अपना निवास स्थान बनाया। इस वृन्दावनको कविने महीमूर्ति शङ्कर भगवान्के सिरकी उपमा दी है ॥६०॥

विशेष—कविवर कालिदासने शिवकी ८ मूर्ति लिखी हैं. उनमें पृथ्वीको भी शिवमूर्ति माना है। कविवर मित्रमिश्रने वृन्दावनभूमिको शिवरूप माना है और शिवकी सभी उपमायें सांगोपांगदी हैं। या सृष्टिः स्रष्टुराद्या वहति हुतवहं याह-विर्या च होत्री····यामाहुः सर्वबीजप्रकृतिरिति" शा० अङ्क०१, श्लोक १ ॥६०॥

अनुवाद—पृथ्वी मूर्तिवाले भगवान् शङ्कर तपन तनया यमुनाके जलसे शोभित ग्रीवावाला, श्वेत गौओंके द्वारा मानों गङ्गाजीकी श्वेत लहरें जिनके ऊपर शोभित हैं तथा अर्धचन्द्राकार शकट समूह के द्वारा सुन्दर अर्धचन्द्र जिसपर

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उदञ्चत्साधीयः शकटघटितार्द्धेन्दुमुकुटं
बभौ वृन्दारण्यं त्रिभुवनशरण्यं शिर इव ॥६१॥
अमृतोल्लसनं विष्णुपदोल्लासमलाञ्छनम् ।
सर्वोपरि बभौ वृन्दावनमर्द्धमिवेन्दवम् । ६२॥
दूरोद्धूततमोनीतिगोवृन्दैरभिनन्दितम् ।
वृन्दावनतमीशार्द्धमासीन्निशि दिवा समम् ॥६३॥
हरमूर्द्धस्थितस्यापि विधोः स्पर्द्धां विधास्यति ।
अर्द्धचन्द्राकृतिर्नूनमित्यनोभिरतानि पूः ॥६४॥
लोकेषु त्रिषु तद्धाम नाम स्पर्द्धेत किं पुरम् ।
प्रारम्भेणैव सम्भूतमर्द्धचन्द्राकृतीह यत् ॥६५॥
मुरारातिपदासङ्गरङ्गोद्धत मिवास्पदम् ।
चम्पकेतुमिषेणोपजहास त्रिजगत्पुरम् ॥६६॥

शोभित है ऐसा वृन्दावन मानों तीनों लोकोंको शरण देनेवाला भगवान् शङ्करका सिर है ॥६१॥

अनुवाद—अमृत परिपूर्ण लाञ्छनशून्य आकाशको शोभित करनेवाला वृन्दावन मानों अर्धचन्द्रके समान शोभित होरहा है ॥६२॥

अनुवाद—तमोगुणी नीतिको तथा अन्धकारको दूरतक नष्ट करनेवाला तथा गौओंसे अभिनन्दित वह वृन्दावनरूपी अर्द्धचन्द्र रात्रिमें दिनके समान प्रतीत होता था ॥६३॥

अनुवाद—शकट समूह अर्धचन्द्रके आकारवाला निवास यह सोचकर ऐसा बनाया गया था जो निश्चय ही भगवान् शङ्करके सिरपर रहनेवाले चन्द्रमाकी स्पर्धा करेगा ॥६४॥

अनुवाद—इस निवासकी क्या लोकत्रयमें उनके धामकी स्पर्धाकी जायगी, जो प्रारम्भसे ही अर्धचन्द्रके आकारवाला जिनका स्थान बना है ॥६५॥

अनुवाद—मुरशत्रुके चरणोंमें आसक्ति रखनेवाला यह सुन्दर स्थान चम्पक ध्वजाके बहाने मानों तीनों जगत्का उपहासकर रहा था ॥६६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्त्तव्यानन्तसेवेति द्विखण्डीभूय चन्द्रमाः ।
अनन्ताभिख्ययोरासीद्वसुधानभसोरपि ॥६७॥

अर्द्धेन्दोर्भङ्गिभाजिप्रकटितशकटस्योद्भटाभिर्घटाभि-
र्वृन्दाटव्युत्कटाभा घटितपटुपदा चित्रमासीत्तदेव ।
कोदण्डं दण्डपाणिर्यदमनुत निजाखण्डदण्डोग्रदण्डं
यत्पण्ड[1]श्चण्डिमाऽभूद् दुरितभटनटद्भूपुटीभ्रूकुटीनाम् ॥६८॥

वृन्दावने शकटस्थिति वर्णनम्

वृन्दारण्याभिधाने शकट घटनयैवार्द्धचन्द्रायमाणे
स्थानेप्याशोभमानेन्तरभुवि जलदास्कन्दने नन्दसूनौ ।
भूरेषाभालभूषामकृत मृगमदैः प्राह कश्चित्परस्तु
[2]स्फारभ्रूभित्तिभाजि भ्रमति दृशि भृशं मोक्षलक्ष्म्याः कटाक्षः॥६९

अनुवाद—अनन्तकी सेवा करनी चाहिये यह बतानेके लिये अनन्त नामवाले आकाश और पृथ्वी दोनों मानों दो खण्ड होकर कह रहे थे ॥६७॥

विशेष– आकाश और पृथ्वी दोनोंका अन्त न होनेसे अनन्त कहलाते हैं ॥६७।

अनुवाद—अर्धचन्द्रकी भङ्गिमा प्रकट करने शकट समूहकी उद्भट घटाओंसे वृन्दावनकी शोभा उत्कट तथा बड़ी सुन्दर थी, उनमें एक आश्चर्य हुआ, दण्डपाणि यमराजने अखण्ड उग्रदण्ड देनेवाला उसे धनुष समझा, पापरूपी योधाओंकी भ्रूकुटियोंको उग्रता उसे देखकर सब समाप्त होगई ॥६८॥

विशेष—वृन्दावनको देखकर पापोंकी शक्ति क्षीण होगई ॥६८॥

वृन्दावनमें शकट स्थितिका वर्णन

अनुवाद शकट समूहकी रचनासे अर्धचन्द्रके आकारवाले वृन्दावनमें तथा पृथ्वीपर स्थानके शोभित होनेपर तथा नन्दसूनु कृष्णके मेघकी स्पर्धावाला श्यामलरूप धारण करनेपर इस पृथ्वीने कस्तूरीसे अपने मस्तकको भूषित किया, इसपर किसी रसिकने कहा कि विस्तृत भ्रूकुटि शोभित दृष्टिपर मोक्षरूपी लक्ष्मी का कटाक्ष होरहा ह ॥६९॥

---

(1) पण्डः=षण्ढः—"तृतोया प्रकृतिः शण्ठः क्लीवः पण्डोनपुंसकम्" अ. २।६।३९
(2) स्फार=स्फाय+रक्=विस्तृत ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्ताधः सन्ति गुप्ता ध्रुवमिदमतुलोभूय भावीति लोकाः
स्वर्भूमीशामृतान्धा भ्रमविधुरमपि ज्योतिषामैक्षि चक्रम् ।
भेजुः पञ्चत्वभाजः परमुपरि पुरः पञ्चताभागिभोग्याः
का योग्याः सन्तु वृन्दावननगरतुलां पर्य्युपेतुं नगर्य्यः ॥७०॥

चन्द्रोदयवर्णनम्

वृन्दावनवृन्दैरानन्दानां घनीभवतः
अम्बरमुकुरविलम्बिप्रतिबिम्बं स्वरेव तं ब्रूमः ॥७१॥

व्रजमहिलामुखचन्द्रान्वृन्दावनभूषु भूरुहान्तरितः ।
ऐक्षत चरमदशायां रभसादिव पद्मिनीरमणः[1] ॥७२॥

अनुवाद—निश्चय हो इस वृन्दावनको तुलना हम नहीं कर सकते यह सोचकर सात लोकके नीचे अतल-वितलादि नीचे छिप गये, स्वर्गपति अमृतसे तथा भूमि पति मोहसे अविचार शील है ज्योतिष, चक्र, नक्षत्र समूह सब भ्रमण करनेसे विकल होने लगे। ऊपरके कुछ लोकोंको शरीर त्यागके पश्चात् पञ्चत्व भागी ही भोग सकते हैं फिर कौन-सी नगरियाँ वृन्दावन नगरकी समानता करनेको समर्थ हो सकती हैं ॥७०॥

विशेष—पांचतत्त्वों पृथ्वी, जल, तेज, वायु और आकाशसे यह शरीर निर्मित होता है पांचतत्त्वोंका मूलरूपमें मिलना ही मृत्यु कहलाता है ॥७०॥

चन्द्र उदयका वर्णन

अनुवाद—अनेक वृन्दावनोंके आनन्दोंके घनीभूत समूहका आकाशरूपी दर्पणमें विस्तृत पड़ा हुआ प्रतिबिम्ब ही स्वर्ग है। यह हम कहते हैं ॥७१॥

विशेष—अब तक स्वर्गकी छाया भूमिपर आती थी पर कविका कथन है कि आकाश दर्पणमें प्रतिबिम्ब भाव स्वर्ग है ["दिवःखण्डमेकम्" [मेघदूत पू०] अवन्ती नगरी स्वर्गका खण्ड है और जिनके पुण्यशेष रह जाते हैं उन्हें भूमिमें यह भूभाग निवास करनेको मिलता है] ॥७१॥

अनुवाद—वृन्दावनकी भूमिमें वृक्षोंमें अन्तरित होकर छिपकर सूर्य भगवान्ने अपनी अस्तकाल दशामें शीघ्रतासे व्रजगोपियोंके मुखचन्द्रका दर्शन किया ॥७२॥

विशेष—सूर्य-चन्द्रका दर्शनकर रहे हैं, सुन्दर कल्पना है ॥७२॥

---

(1) सूर्यः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रथमं मन्दिरवासादिव बहिरासामुदीक्ष्य मुखचंद्रान् ।
अनुरागारुणबिम्बो दिनमणिरालम्बते स्म चरमाशाम् ॥७३॥

पूर्वं व्यधात्कुमुदिनी विरहोपतापं
पापं तदाप परिपाकमिति प्रतीमः ।
यत्पद्मिणोविरहदावमुखे मिषेण
सन्ध्यारुचेर्ज्वलति चण्डरुचि[1]र्ममज्ज ॥७४॥

निर्यन्तीभीरिवात्मना सह घनाम्भोजाटवो कान्तिभिः
शोणोभूय सरोजिनीपरिवृढः सार्द्धं प्रतीचीरुचा ।
वारम्वारमुदीक्ष्यमाण इव तां पद्माननां पद्मिनीं
प्रेम्णा मन्थरमद्रिकन्दरतटीमाटत्पटीयानपि ॥७५॥

श्रीवासानन्दकन्दः कमलजनिभूल्लाससन्दोहसिन्धु—
र्लोकानामेकबन्धुर्निखिलगिलतमोभावपादप्रभावः ।

अनुवाद—मानों गृह निवाससे बाहर प्रथम गोपियोंका मुखचन्द्र देखकर उनके प्रेमसे अरुण बिम्ब होकर सूर्य पश्चिम दिशामें लटक रहा है—यह सूर्यास्तका वर्णन है ॥७३॥

विशष—उत्प्रेक्षालङ्कार ॥७३॥

अनुवाद—प्रथम कुमुदिनीने जो विरहका कष्ट सहन किया था उस कष्ट सहनसे उसका पाप पककर समाप्त होगया यह हम विश्वास करते हैं। जो सन्ध्याकी अरुण शोभाके बहाने जलती हुई पद्मिनीकी विरहाग्निमें सूर्य डूबा है—उसने निकलकर कुमुदिनीको दुःखी किया था ॥७४॥

अनुवाद—निकलती हुई कमल समूहकी कान्तिके साथ स्वयं सरोजिनी द्वारा वृद्धिको प्राप्त सूर्य पश्चिमकी शोभाके साथ लाल होकर बार-बार सुन्दर मुखवाली कमलिनीको देखता हुआ चतुर होता हुआ भी प्रेमसे शिथिल पर्वतकी कन्दरामें चला गया अर्थात् अस्त होगया ॥७५॥

अनुवाद—श्रीके निवाससे आनन्द देनेवाला कमलोंको खिलाकर आनन्द समूहका समुद्र लोकका एकमात्र बन्धु सम्पूर्ण अन्धकारकी विनाशक किरणोंवाला दोषा रात्रि अथवा दोषोंका विनाशक ऐसा सूर्य भी परिणत होकर पश्चिम दिशामें

---

(1) चण्डरुचिः=सूर्यः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सद्यो दोषाभिमर्दी स बत परिणतो वारुणी[1]मालम्बे
क्रोधैरन्धेति सन्ध्या ज्वलति धृतवती दुर्द्धरं धामशोणम् ॥७६॥
मन्दीभूत निजप्रभृतिकिरणत्वेनातिमात्रोज्ज्वल–
च्छैलोपान्त हुताशसन्तति चमत्कारं रविः प्रैक्षत ।
अस्तोर्वीधरगर्भगह्वरवहद्दुर्वारदीर्घोभव –
द्रक्तोग्रद्युति-लक्ष-भक्षकफणिस्फूर्जन्मणिश्रीः क्षणम् ॥७७॥
सौर्वाग्निर्वारुणाशाचरमिहिरकरैः[2] कुत्रचित् कुत्रचिच्च
प्राच्यां नक्षत्ररत्नः क्व च तिमिरचितास्फालकल्लोलचक्रः ।
अव्यक्तानन्तमध्यः क्वचिदपि वसुधाधामसंधानसंधिः
सन्ध्यासिन्धुं समिन्धे जगति किमरं राघवेन्द्रैरलङ्घ्यम् ॥७८॥
अनुरागिणि मार्त्तण्डे दिगभूदनुरागिणी ।
रागो हि प्रिययोर्योगे दुर्वारः स्याद् द्वयोरपि ॥७९॥

लटक गया, अतः सन्ध्या क्रोधसे अन्धी होकर जलने लगी और कठोर लाल तेज धारणकर लिया ॥७६॥

अनुवाद—अस्ताचलकी गर्भ गुहामें दुर्वार और विस्तीर्ण लाल शोभाकी शिथिलतासे चमकती हुई मणि शोभाके समान अपनी किरणोंके शिथिल होनेसे उज्ज्वल पर्वतके समीप अग्नि ज्वालाके चमत्कारकी तरह सूर्य चमकने लगा। अर्थात् अस्त होते हुए सूर्यका तेज कुछ शिथिल होगया ॥७७॥

अनुवाद—पश्चिममें सूर्य किरणोंसे ही कहीं-कहीं अग्नि ज्वाला जैसा प्रकाश है, पूर्व दिशामें चन्द्रमा है, कहीं रात्रिका विस्तृत अन्धकार भी है, कहीं-कहीं पृथ्वी व गृहोंका आदि मध्य अन्त नहीं प्रकट हो रहा है। संसारमें राघवेन्द्रसे भी अलङ्घनीय दूसरा ही यह सन्ध्यारूपी सिन्धु बढ़गया है ॥७८॥

विशेष—प्रकृतिका चित्रण है ॥७८॥

अनुवाद—सूर्यके अनुराग युक्त होनेपर सन्ध्या भी अनुरागिणी होगई। दोनों प्रिय-प्रियाओंके योगमें राग हटाया नहीं जा सकता [अनुरागवती सन्ध्या दिवसस्तत्पुरः सरः (का० प्र०) ॥७९॥

---

(1) वारुणी—सुरा प्रत्यक् च वारुणी । वरुणस्येयम् "तस्येदम्" इत्यणि वृद्धौ अलोपे "टिड्ढाणमिति" ङीपि च वारुणी । वारुणी गण्डदूर्वायां प्रतीची सुरयोः स्त्रियाम्" (इति मेदिनी) अ० को० टी० पृ० ४५६ ।
(2) सूर्यः—मेहतीति मिहिरः । (अ० को० १।३।२९)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हा सिन्धौलोकबन्धौ पतति विधिवशाद्राजनीवाजनि द्राग्-
द्वैराज्यं सर्वराज्ये सतनुतनुरुजं सोऽतनुः संतनोति ।
दोषोद्रेकाद्द्विरेफोऽनुभवति कुमुदं भाविदोषाकरश्री
र्यच्चक्षुर्गोचरार्थानपि हरति हठाद् ध्वान्तदुर्दान्तदस्युः ॥८०॥
तुङ्गभूतिभिरभावितमोभिर्ज्योतिरिङ्गणगणैस्समदोपि ।
युक्तमेव तव शीलितदोषाख्यानकालकवलीकृतभानोः ॥८१॥

अन्धकारवर्णनम्

गम्भीरैरवगाहितेव जलदैर्ग्रस्तेव कालाहिभि-
र्व्यस्तेव द्विपयूथपैर्निरवधौ मग्नेव मष्यम्बुधौ ।
क्रीडत्क्रोडकुलाकुलेव परितो गूढेव गाढाञ्जनैः
कस्तूरीपरिपूरितेव विदधे ध्वान्तैर्जगन्मण्डली ॥ ८२ ॥
वारुण्याश्रयणोज्जिहानकुयशोभारैरिवाहर्पते[1]-
र्दुर्वारैरुदसर्पिसर्पकलुषाकारान्धकारोत्करैः ।

अनुवाद—हा, लोक बन्धु राजा सूर्यके समुद्रमें गिरनेपर एक साथ क्या हुआ ? वह शरीर हीन अन्धकार अथवा काम सब राज्यमें अथवा दो राजाओंके राज्यमें शरीरधारीके शरीरमें पीड़ा कर देता है। दोषा रात्रिके अथवा दोषोंकी अधिकतासे आगे आनेवाली चन्द्रशोभाका ध्यान करके भ्रमर कुमुदका आश्रय ले रहा है। अन्धकाररूपी दुर्दान्त चोर हठपूर्वक आँखोंके सामने वस्तुको नहीं देखने देता ॥८०॥

अनुवाद—अन्धकार बढ़ गया चलने वालोंने ज्योतिः अथवा प्रकाश जलाया। प्रसिद्ध दोषा (रात्रि) अथवा दोषको बतानेवाले कालसे कवलित सूर्यको यह ठीक ही है ॥८१॥

अन्धकारका वर्णन

अनुवाद—सब जगत् मण्डली अथवा पृथ्वी मानों घने बादलोंसे भरगई हो अथवा कालरूप सर्पोंसे ग्रस्त होगई हो अथवा गज समूहसे व्यस्त होगई हो अथवा अवधिशून्य स्याहीके समुद्रमें डूब गई हो अथवा क्रीड़ा करते हुए शूकर कुलसे व्याप्त हुई हो अथवा गहरे काले अञ्जनसे लिप्त हो गई हो अथवा कस्तूरी-से भर गई हो इस प्रकार अन्धकारसे भर गई ॥८२॥

अनुवाद—पश्चिम दिशामें आश्रय लेनेसे उठे हुए सूर्यके दुर्वार अपयश-

---

(1) अहर्पते—त्विषांपतिरहर्पतिः । (अ० को० १।३।३०) अन्हःपति=सूर्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्तर्बद्धमधुव्रतस्य रुदती हुङ्कारकोलाहलै
स्तद् द्रष्टुं द्रुतमक्षमेव पिदधे पद्मेक्षणं पद्मिनी ॥८३॥

धरणिकुहराद्गर्भाद्दुर्वीभृतां तरुकोटराद्
बहिरभिययुः खद्योतानां मिषेण मरीचयः[1] ।
अहिततिमिरैरान्दोल्यन्तेऽन्तरावलिभिर्गते
[2]सवितरि परीवाराः प्रायः प्रभूदयसोदयाः ॥८४॥

सह दिनकृतैवाह्नायाह्ना प्रयातमथोन्मथा
किल कमलिनी यास्यत्येषा दिषां भयशालिनी ।
इति गुरुतमोवृन्दैः सान्द्रैर्दिशो दश गोपिता
निखिलपदवी रुद्धा क्रुद्धात्मभिर्मुषिता दश ॥८५॥

दुर्वारः कालचोरो दिनमणिमहरद्यन्नभःप्राङ्गणस्थं
जाग्रत्येवाऽखिलेऽपि स्वपिति सति पुनर्नाद्भुतं नेष्यतीति ।

से अथवा ऊपर उठते हुए सर्पके समान कलुष आकारवाले अन्धकार समूहसे अथवा अन्दर बन्द हुए भ्रमरके हुङ्कार कोलाहलसे देखनेमें असमर्थ होती हुई पद्मिनीने अपने नेत्रकमल तत्काल बन्दकर दिये । अर्थात् संकुचित हो गई ॥८३॥

अनुवाद—पृथ्वीके अन्दरसे तथा पर्वतोंके मध्यसे तथा वृक्षोंके कोटरोंसे खद्योतके बहाने किरणें बाहर निकलने लगीं । सूर्यके अस्त हो जानेपर प्रायः प्रतिकूल अन्धकार अन्दरसे निकलता हुआ प्रभुके उदयके साथ उदित होनेवाले परिवारको भी निकालना चाहता है । ८४॥

अनुवाद - सूर्यके साथ ही तत्काल दिन भी अस्त हो गया तथा कमलिनी भी उन्मथित हो गई, यह भी प्रकाशके शत्रुको भय देनेवाली हो जाती यही जानकर घने अन्धकारने दशों दिशाओंको छिपा दिया । क्रुद्ध होकर अन्धकारने प्रकाशके सब मार्ग रोक दिये ॥८५॥

अनुवाद—दुर्दमनीय कालरूप चोरने सबके जागते हुए आकाशरूपी आँगनमें बैठे हुए सूर्यको चुरा लिया और सोनेपर तो क्या नहीं ले जायगा । ऐसी

---

(1) मरीचयः—"भानुः करो मरीचिः स्त्री पुंसयो र्दीधितिः स्त्रियाम्" म्रियते तमोऽस्मिन्निति मरीचिः । (अ० १।३।३३) ।

(2) तपनः सविता रविः (अ० को० १।३ ३१) सुवतीति सविता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इत्यन्तर्भूतचिन्ता सपदि दश दिशो रोदसीपूरसीम-
द्वाराणि ध्वान्तकूटै रजनिरपिदधे दुर्विपाटैः कपाटैः ॥८६॥
उत्तुङ्गादद्रिशृङ्गात्कमलकुलपतौ दत्तझम्पे[1] पयोधौ
कीलालै[2] रुच्छलद्भिर्नवजलदनिभैर्विश्वमाप्लावि सद्यः।
ताराखद्योतधाराकपटमणिघटाः कुर्वते पर्वतेऽपि
व्योमान्तर्दिग्दिगन्तेऽप्यतिशयमियता सर्वतो वीथि बन्धम् ॥८७॥
महाद्रिसानोरिव चण्डभानोः पयोधिपाथः सु बभूव पातः।
तमोमिषेणेति विशालजालं विधिस्तमुद्धर्तुमिव व्यधत्ताम् ॥८८॥
नीहारास्रै रजस्रं कुवलयनयनप्रान्ततो निष्पतद्भिः-
कोकानां काकुरावैर्बत वियति समुत्क्षिप्य नक्षत्रमालाम्।
उन्मुक्तध्वान्तधाराघनकचनिचयाच्छादिताङ्गी रुचोना
मस्तं यातेऽधिनाथे[3] विलपति जगतो वर्द्धितास्तोकशोका ॥८६॥

हृदयमें चिन्ता होनेपर रात्रिने अन्धकार समूहके द्वारा आकाश पृथ्वीके असीम द्वारोंको कठोर किवाड़ोंसे बन्दकर दिया ॥८६॥

अनुवाद—ऊँचे पर्वत शिखरसे समुद्रमें सूर्यके कूदकर अस्त होनेपर नये बादलोंकी तरह उछलते हुए जलसे सारा विश्व आप्लावित हो गया। इतनेमें पर्वतपर आकाशके मध्य एवं दिशाओंमें भी तारागण तथा खद्योतकी धाराओंके बहाने मणि कलशोंने अत्यन्त वीथियोंका बन्धन जैसा उत्पन्नकर दिया है ॥८७॥

अनुवाद—पर्वतकी ऊँची चट्टानसे समुद्रके जलमें सूर्यका पतन हुआ, विधाताने उसे जलसे निकालनेको अन्धकारके बहाने बहुत बड़ा जाल डाला है। कविने प्रकृतका निषेध करके अन्य साधनाके द्वारा बड़ा सुन्दर अपन्हुतिका प्रयोग किया है ['प्रकृतं यन्निषिध्यान्यत् साध्यते सात्वपन्हुतिः"]। अन्धकारका निषेध कर जाल डालना सुन्दर कलपना है ॥८८॥

अनुवाद – नीलकमल रूप नयन प्रान्तमे गिरते हुए नीहाररूप आँसुओंसे कोकोंके मदन शब्दसे आकाशमें नक्षत्रमाला रूप भूषणोंको फेंककर बढ़े हुए अन्ध-

---

(1) झम्पे— झम्+पत्+ङ (स्त्रियां टाप् च) उछल-कूद।
(2) कीलाल –(कील+अल्+अण्) जल। पयः कीलालममृतम्' अ०को०
(3) अधिनाथः—परमेश्वरः। चन्द्रे।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अभिससार विधुं रजनीवधूस्तिमिरनीलनिचोलमुपेयुषी ।
यदवमोच्य करेण कुतूहली सह तया स चिरं विहरिष्यति ॥९०॥

प्रातः वर्णनम्

अथ सुखमयमेव यामवतीमतीत्य प्राचीमुखचुम्बिनि मरीचिमालिबिम्बे हरिबिम्बाधरमधुरविकस्वरार्द्धभणिति मधुमाधुरीजलधिकृतविनोदयोर्नन्दयशोदयोर्न केवलं दिनमुखमेव सुप्रभातमपि तु जन्मकर्म्म धर्म्मशर्म्माणि मर्म्माणि [1]नर्माण्यपि सुप्रभातानि जातानि । निरवधिनिखिलानन्दयशोदानन्दनरोहिणीनन्दनयोरतत्त्वविज्ञानामाभीराणामाज्ञामनुपालयतोः कदाचिदुपहरणमदूरवर्त्तिनामेव सलिलपान भोजनादि भाजनानाम्, त्रिभुवनमूर्द्धन्ययोरपि, क्वचिदपि मूर्द्धन्येवोद्वहन-

---

कारकी धारा रूप खुले केश समूहसे शरीर ढँके हुए कान्तिके अधिनाथ सूर्यके अस्त होनेपर अत्यन्त बढ़ा हुआ है शोक जिसका ऐसी दशामें रो रही है ॥८९॥

अनुवाद—अन्धकार रूप नील प्रच्छद पट (चादर) ओढ़कर रजनी रूप वधूने चन्द्रके पास अभिसार किया । वह कुतूहली चन्द्र हाथसे उसकी चादर हटाकर उसके साथ विहार करेगा । अन्धकार लेकर रात्रि आई है चन्द्रमा उसके अन्धकार को हटाकर उसके रूपको उज्वल करेगा यही चन्द्रमाका विहार उसमें भी कविने बड़ी कुशलतासे अपन्हुतिको व्यक्त किया है ॥९०॥

प्रातः वर्णन

अनुवाद—इसके अनन्तर सुखपूर्वक रात्रिको व्यतीत करके सूर्यके पूर्व दिशाका मुख चुम्बन करते ही अर्थात् निकलते ही हरिके अधर बिम्बकी मधुर तथा अर्ध विकसित तोतली बोलीकी माधुरीके आनन्द समुद्रमें विनोद करनेवाले नन्द यशोदाको केवल प्रातःकाल ही सुन्दर नहीं था अपितु जन्म कर्म धर्म सब प्रकारके आनन्द सभी बड़े सुखप्रद तथा हर्षयुक्त थे । असीम अखिल आनन्द स्वरूप कृष्ण बलरामके तत्त्वको न जाननेवाले गोप समूहको आज्ञामें रहनेवाले ये दोनों कभी पासमें रहनेवालोंको भी जलपान तथा भोजन पात्रादिको लाते थे । तीनों लोकोंके शिरोधार्य कृष्ण-बलराम पीठ परिमाण पादुकादिको किरीटकी तरह सिरपर रखकर ले जाते थे, किसी समयपर वाणीसे अगोचर इन दोनोंको

---

(1) नृ+मनिन्, क्रीडा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महह किरीटानामिव पीठपरिमाणपादुका[1]दीनाम्; क्वचिदपि समये गिरामगोचरयोरपि प्रकृतीनामेव गोचरीकरणं गोवारिणामेव सहचारिणीतः, वागधीशयोरपि वाचामेव कदाचिदभ्यसनम्, गोलोकपालकयोरपि क्वचिदपि गवामेव परिपालनपरिचर्याकलनमादराद्दीर्घम्, एवंविधविविधकैशोरानुकृतिविहारसम्पदो बहुवेलं बहुधंवोदपद्यन्त ।

वत्सचारण लीला

वात्सानां बन्धमोक्षं निभृतसमये कुर्वतोर्बालकानाम्
निद्राणानान्तु निद्राविघटनमभितः क्रीडतां ताडनानि ।
चातुर्य्यं चौर्यचर्याचितमुपचरतोश्शिक्यभाण्डस्थितानां
कौमार्यं दुर्निवार्य्यं हरिहलधरयोराविरासीदसीम ॥९२॥
भग्नं भग्नमहार्यहारि भवनान्निर्गम्यते गम्यते
भुक्तं भुक्तमताड्यताडि पुनरप्यावृत्यते वृत्यते ।
नीतं नीतममोच्यमोचि हरिणैवाकार्यकारीत्यभू
त्कौमार्येषु हरेरहर्निशमसौ वाग्विभ्रमः सुभ्रुवाम ॥९३॥

सबके सन्मुख गोपियोंके साथ गोपोंको भी दर्शन देते । वाणीके स्वामी दोनोंको शब्दोंका स्मरण कराना, गोलोकके पालक दोनोंका कभी आदरसे लम्बी गोपालन की परिचर्या बताना इस प्रकारकी अनेक किशोरावस्थाके आनन्द हर समय अनेक प्रकारसे होते रहते थे ॥९१॥

वत्स चारण लीला

अनुवाद—असमयपर बछड़ोंको बन्धनसे छुड़ाना, सोते हुए बालकोंकी निद्राको नष्ट कराकर जगाना, खेलते बच्चोंको ताड़न करना, बड़ी चतुरतासे मक्खनादिकी चोरी करना, छींकेपर रक्खी मक्खनादि वस्तुओंको चुराना, इस प्रकार की हरि हलधरको कुमार अवस्थाका असीम आनन्द था ॥९२॥

अनुवाद—तोड़ दिया, तोड़ दिया, ले गया, ले गया, घरसे निकल गया, निकल गया, खा लिया खा लिया, पीट दिया, पीट दिया फिर आगया, आगया, ले लिया, ले लिया, छोड़ दिया छोड़ दिया हरिने यह कर दिया, कर दिया, हरिकी कुमार अवस्थामें गोपियोंका रात-दिन यही शोर मचा रहता था ॥९३॥

---

(1) "शिक्यं काचोऽथ पादुका" (अ० को० २।१०।३०) स्तंसेः शिः कुट् किच्च इति यति, शिरादेशे, कुटि च शिक्यम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अनतिदीर्घेणैव कालेन मदकलकलभाविव दुर्विभाव्यप्रभावो द्वावप्याभीरकिशोरपरम्पराभिः सह नगरानतिदूर एवचारयाञ्चक्रतु-रौत्सुक्येन कतिचन वत्सान् ॥९४॥

ललाटनटितालकं रटितकिङ्किणीजालकं
नवीनपशुपालकं सवनमालकं बालकम् ।
झणज्झणितनूपुरं लसितगोपुरं तं पुरः
स्ववत्समनुगामिनं कलयति स्म नन्दः कृती ॥९५॥

प्रतिदिनमपि प्रातः प्रातः प्रियप्रिय चुम्बनै-
र्मधुरमधुरस्निग्धस्निग्धोक्तिभिः प्रतिबोधितः ।
हरिरथ समं भ्रात्रा मात्रा पयो दधि भोजितः
सह शिशुगणैर्वत्सानुत्साहितः समचारयत् ॥९६॥

मधुरमुरलीशृङ्गोत्सङ्गः सवेत्रकराम्बुजो
लघुललितया घट्या कट्यां त्रिधा परिवेष्टितः ।
अलिकफलिके गौरं गोरोचनाकणभूषणं
दधदहरत स्वान्तं शान्तं हठादपि योगिनाम् ॥९७॥

अनुवाद—थोड़े ही समयमें मद शोभित गज कलभकी तरह जिनका प्रभाव नहीं जा सकता ऐसे दोनों कृष्ण और बलराम ग्वाल-बालोंके साथ नगरके समीपमें ही बड़ी उत्सुकतासे कुछ बछड़ोंको चराने लगे । ९४॥

अनुवाद—मस्तकपर बाल धीरे-धीरे हिल रहे हैं तथा किङ्किणीके घुंघुरु बज रहे हैं ऐसे नये पशु-पालन करनेवाले वन मालासे शोभित अपने बछड़ों-के पीछे चलनेवाले हरिको नन्दबाबा बड़ा प्रेम कर रहे हैं ॥९५॥

अनुवाद—प्रतिदिन प्रातःकाल प्रिय चुम्बनसे तथा मीठी-मीठी प्रेमभरी स्निग्ध उक्तियोंसे जगाये हुये फिर भाईके साथ माताके द्वारा दूध-दही खिलानेके पश्चात् ग्वाल बालोंके साथ उत्साहसे बछड़े चराने चले गये ॥९६॥

अनुवाद—मधुर मुरली और शृङ्ग गोदमें रक्खे हुए, हाथमें बेंत लिये हुए, हलकी सुन्दर पट्टीसे कमरमें तिहरी लपेटे हुए भालपर गोरोचनका सुन्दर भूषित तिलक लगाये योगियोंके शान्त हृदयको भी हठात् वशमें कर रहे थे ॥९७॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मृदुचरणयोः शिञ्जन्मञ्जीरयोर्मणिघर्घर
ध्वनिनि जघने हारस्फार प्रभाजुषि वक्षसि ।
पथि विहरतोर्वत्सैरच्चैः क्षणं पतदीक्षणं
चिरमनिमिषं तस्थौ सुस्थौकसीव गृही जनः ॥९८॥

सुपटु घटयन्वत्सान्स्वच्छांकुरे नवशाद्वले[1]
स्वयमनुचरन्कच्छे कच्छे समुत्सुकमानसः ।
चिरमुपगतः स्निग्धच्छायास्थलीः सहली हरि
र्व्यहरदमितैराभीराणामभीः[2] शिशुभिः सह ॥९९॥

वेणुं वादयतः कदापि नटतः शिञ्जानमञ्जीरकं
सानन्दं क्षिपतश्च कन्दुकमथोद्धर्त्तुं पुनर्धावतः ।
बालैः कृत्रिमवत्सरूपरुचिरैः सार्द्धं हरेः क्रीडतो
वत्सीभूय पुरो बभूव दनुभूर्वत्सैः[3] समं मत्सरः ॥१००॥

अनुवाद --मञ्जीरके शब्दसे गुञ्जित कोमल चरणोंपर मणियोंकी घर्घर ध्वनिवाली जङ्घाओंपर हारको सुन्दर शोभायुक्त वक्षःस्थलपर सुन्दर बछड़ोंके साथ घूमते हुए दोनोंके मार्गमें गृहस्थ लोग पलकशून्य दृष्टि डालते हुए सुन्दर घरके समान देखते रहते थे ॥९८॥

अनुवाद—स्वच्छ अंकुरवाली नई-नई घासमें बछड़ोंको ले जाते हुए स्वयं उत्सुक मन होकर किनारे-किनारे घूमते हुए बलरामके साथ कृष्ण चिकनी सुन्दर छायावाले स्थानपर पहुँचे अनेकों ग्वाल-बालोंके साथ निर्भय होकर घूमते रहे ॥९९॥

अनुवाद—वंशी बजाते हुए कभी शब्द करते हुए मंजीरोंके साथ नट-लीला करते हुये आनन्दसे गेन्द फेंकते हुए और उसे उठानेको दौड़ते हुए बनावटी बछड़ारूप धारण किये हुए बालकोंके साथ खेलते हुए हरिके आगे द्वेष करनेवाला दानव वत्सासुर बछड़ा बनकर आगया ॥१००॥

---

(1) शाद्वले— तृणे ।
(2) अभीः—भयरहितः ।
(3) वत्सासुर कथा भा० १० स्कं० ११ अध्याये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वत्सासुर वधोपक्रम

सकल सुरासुरभयंकरं तमसुरं बधाय साधारणवत्सरूप धारिणं हलधरमवलोकयन्मधुसूदनः पुनरिदमभाणोत् ॥१०१॥

अहो पश्य बलदेव—

वलति सविधे मन्दं मन्दं गवां शिशुताभुवां
चकितचकितं चक्षुर्दिक्षु क्षिपन्नपि वीक्षते ।
तृणमपि मुदादत्ते धत्ते रदैः स्वदते मदै[1]—
र्न खलु तुलितो वत्सैर्वत्सासुरोऽयमुदीर्य्यते ॥१०२॥
दशतरलितैर्लाङ्गूलाग्रैर्द्वयोरपि पार्श्वयो—
स्तनुमनुवलद्वीथीबन्धां व्यपोहति मक्षिकाम् ।
विरचित वपुर्दंशं दंशं निराकुरुते द्रुतो—
द्वलितवदनाघातैः कण्डूयते च रदांकुरैः ॥१०३॥
निपतति हठादङ्गे यस्मिन्मनागपि मक्षिका
चलति तरसा[2]वारं वारं तदेव न चापरम् ।

वत्सासुर वधोपक्रमः

अनुवाद—सब असुर और देवताओंको भय देनेवाले उस असुरको मारनेके लिये साधारण बछड़ारूप धारण किये हुए बलरामको देखते हुए श्रीकृष्ण यह कहने लगे ॥१०१॥

अनुवाद—अहो हे बलदेव देखो ! जौ गौओंके तथा बनावटी बछड़ोंके पास धीरे-धीरे आरहा है दिशाओंमें चकित होकर दृष्टि डालते हुए देखता है, बड़ी प्रसन्नतासे घास मुँहमें लेता है, दाँतोंसे दबाता है मत्त होकर चाखता है बछड़ोंसे इसकी तुलना नहीं होती है यह वत्सासुर प्रतीत होता है ॥१०२।

अनुवाद—चंचल हिलते किनारेवाले लांगूलके अग्रभागसे दोनों ओर शरीरको कुछ झुकाते हुए बैठी हुई मक्खीको उड़ा रहा है, बनावटी शरीरको नोंच-नोंचकर वेगसे घुमाये हुए मुखके आघातसे दांतोंकी नोकोंसे खुजला रहा है ॥१०३॥

अनुवाद—हठपूर्वक जिस अङ्गपर जरा भी मक्खी बैठ जाती है वहीं

---

(1) रदैः=दन्तैः । (2) तरसा=वेगेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अहह महती माया मायापशोरवधीयताम्
सह पशुगणै रोमन्थानां विधीनधितन्वतः ॥१०४॥

अहो समुचितमेवास्य बलदेवातिशिशुत्वं गोत्वं च। यदिह जानतोऽप्यजानत इवानूभूयते वृत्तिः ॥१०५॥

साक्षादैक्षत पूतनापरिभवं वेत्त्येव वार्त्तां तृणा–
वर्त्तस्यापि निवर्त्तते न तदपि व्यापारभारादतः।
को बालादपरः कृशानुकुहरक्रोडे करं न्यस्यति
प्रत्यक्षीकृतमाशु विस्मरति वा को नाम गोभ्यः परः ॥१०६॥

भवतु नामाचिरेणैव फलमाप्स्यति चतुष्पादमायानां खलानां खलु। तथा हि मायादशायामपि तामसस्वभाव पुनरपरिहार्य एव।

कालः काक इवायं भवति न केषां भयङ्कराकारः।
यस्मिन्नुदयति दृष्टिर्जलद इवोल्कामयीदृष्टिः ॥१०७॥

कुलटाकुटिलकचाधिकमेचकाकारतया त्रिभुवनसंहारकारणं तम इव, तम इव मरीचिमालिमरीचिमालया दिगालयात्परिभूयपरिपातितं

अङ्ग बार-बार चलता है दूसरा नहीं चलता। अहा इस मायाके पशुकी देखो बड़ी माया है वह पशुओंके साथ रोमन्थ कर रहा है ॥१०४॥

अनुवाद—अहो हे बलदेव ! उसका शिशुत्व और गोत्व उचित ही है जो यहाँ इसकी जानते हुए भी अजानकी तरह वृत्ति प्रतीत हो रही है ॥१०५॥

अनुवाद—प्रत्यक्ष ही पूतनाका परिभव देखा, तृणावर्त्तकी बातको भी जानता ही है फिर भी इस अनुचित व्यापारसे रुकता नहीं, बालकके अतिरिक्त कौन अग्निके बिलमें हाथ डालेगा। प्रत्यक्षकी हुई बातको ही पशुके अतिरिक्त कौन इतनी जल्दी भूल जायगा ॥१०६॥

अनुवाद—अस्तु, शीघ्र ही चतुष्पादकी माया धारण करनेवाले दुष्टोंका यह फल प्राप्त करेगा, मायाकी दशामें भी इसका तमोगुणी स्वभाव जाता नहीं।

अनुवाद—काले कौएकी तरह किसके लिये इसका भयङ्कर आकार नहीं होता, जैसे बादलकी दृष्टि उल्कामयी है उसी प्रकार इसकी उल्कामयी कठोर दृष्टि है ॥१०७॥

अनुवाद—कुलटा स्त्रियोंके कुटिल कचोंसे अधिक काले आकारका होनेके कारण त्रिभुवनका संहार करनेवाले तमोगुणकी तरह सूर्यकी किरणोंसे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धरणिमण्डलेषु । एतस्य बालधिरपि कालभुजङ्गमसंभ्रमं तनुते । निविडमषीमलीमसत्विषि वपुषि चान्तरन्तरा शोणच्छवि परम्परा अतिशय सान्द्रधूमवृन्दोपरिपरिवलितहुताशहेतय[1] इव, अहह निरन्तरमन्तरापूर्यदुर्वार्याभोगतया बहिर्निर्यद्रोषहुताशनोत्तुङ्गस्फुलिङ्गा इवानुभूयन्ते । यस्य चत्वारस्तु चरणाश्चतुर्णामपि धर्म्मार्थ काममोक्षनाम्नामुपधोनाममूलमथनमन्दरमन्थान दण्डानां चण्डिमानमावहन्ति, घनतिमिरनिरोध्यमानोडुचन्द्रपादा इवादावेव विडम्बनाय विधिना वितीर्णमषीपूर्णचूर्णानीव पदाकारेषु सान्द्राणीव लक्ष्माणि लक्ष्यन्ते ।

अहो तिष्ठतु क्षणं, विहरिष्यावः ॥१०८॥

उन्मीलद्गलकम्बलौ कुथपरीतत्त्वात्तथा लोमशौ
दोःपादेन चतुष्पदौ दलभवैः शृङ्गैः सशृङ्गावपि ।
श्रीरामश्च हरिश्च लम्बितकटीचञ्चद्धरी बालधी[2]
नर्दन्तौ वृषभाविवाप्तवृषभाकारौ प्रचिक्रीडतुः ॥१०६॥

दिशाओंसे तिरस्कृत होकर पृथ्वी मण्डलमें गिरे हुए अन्धकारकी तरह है । इसको वालधि अर्थात् पूँछ भी काले सर्पका भ्रम पैदा करती है । गहरी स्याहीके समान मैली कान्तिवाले इसके शरीरपर बीच-बीचमें पड़ी हुई लालिमाकी झलक अत्यन्त चिकने धूम समूहके ऊपर पड़ी हुई अग्नि ज्वालाकी तरह निरन्तर बीचमें भरे हुए कठोर आभोग होनेके कारण बाहर निकलते रोष रूप अग्निके उत्तुङ्ग स्फुलिङ्गकी तरह प्रतीत होते हैं । इसके चारों चरण छल रूप धर्म अर्थ, काम, मोक्ष चारोंका समूल मन्थन करनेवाले मन्दर रूप मन्थाके दण्डकी जैसी कठोरता धारण करते हैं, घने अन्धकारसे रोके जाते हुए चन्द्रमाके किरण जालकी तरह प्रारम्भमें ही विधाताने भरी हुई स्याहीके चूर्णकी तरह पैरोंमें चिकने-चिकने चिह्न दिखाई देते हैं । अहो थोड़ी देर ठहर, हम दोनों क्रीड़ा करेंगे ॥१०८॥

अनुवाद—गल, कम्बल, सास्नासे युक्त कुथसे आवृत होनेके कारण लोमयुक्त प्रतीत होनेवाले दो हाथ दो पैरसे चलनेके कारण चतुष्पाद और दलोंसे बने सींगोंके कारण शृङ्ग सहित, कटिभागमें लम्बे चीर वस्त्र लपेटनेसे लांगूलके सहित बैलोंका जैसा आकार धारण करनेवाले शब्द करते हुए क्रीड़ा करने लगे ॥

---

(1) ज्वाला—"वन्हेर्द्वयोर्ज्वाल कीलावर्चिर्हेतिः शिखा स्त्रियाम्" (अ० को० १।-१।५७) हिनोति हन्ति वाहेतिः । (2) बालधि केशवल्लाङ्गूलम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चक्रतुस्तौ नरक्रीडां दधुर्व्रीडां दिवौकसः।
व्यसनानि प्रभूणां हि परिवारस्य मूढये ॥११०॥

हरिरिति विहरन्नेव करिवर इव करलीलया सह कन्दुकेन परचरणावुपगृह्य पर्यवधूयच्छागशावकवत्सिमिव वत्सासुरमुत्सारयन् मायाफलमालोकयामास कपित्थतरुमौलौ। स खलु केवलमेक एव चूर्णतां भेजे। निजबलगरिमाणमादेवलोकमालोकयन्निव निपतनसमकालमेव तानपि चूर्णयाञ्चक्रे ॥१११॥

अथ निपपात देवतारातिरवनिरुह मूर्द्धनि ध्वनिभरमुखरितहरिदाकाश मण्डलः। कंसः पुनरात्मन एव शिरसि कटु कठोरशतकोटिकोटिपतनमाभिशशङ्के मूर्च्छित इवास बहुकालं च ॥११२॥

आभीरार्भकनिवहास्तु तदवधाय व्याधूय च मुहुर्मुहु मूर्द्धानं प्रशशंसुरवतंसममराणाम्। अमराः पुनरमिततरप्रमोदमेदुरा दुरापसुरनगरनवप्रसूनविसरैरानन्दाश्रुपूरैरिव द्रुतमवकिरन्ति स्म ॥११३॥

बकासुरवधः

अथ कदाचिदनुचारयन्तः प्रचुरपशुकिशोरानुपचित जलपान

अनुवाद -कृष्ण और बलराम नर क्रीड़ा करने लगे, देवताओंने लज्जा धारण की, भगवान्‌की क्रीड़ायें देव परिवारको मोहमें डालनेके लिये होती हैं ॥

अनुवाद—भगवान्‌ने खेल करते हुए ही सूँडमें खेल करनेवाले हाथीकी तरह गेंदके समान पिछले पैरोंको पकड़कर और घुमाकर बकरीके बच्चेकी तरह वत्सासुरको कपित्थके पेड़की जड़में पटककर छल करनेका फल दिखा दिया, वह तो अकेला ही विनष्ट हुआ अपने बलकी गरिमाको देवलोक तक दिखाते हुए अपने गिरनेके समय तत्काल दुष्टोंके बलको भी चूर्णकर दिया ॥१११॥

अनुवाद—वह 'देवशत्रु' अपने गिरनेके कोलाहलसे दिशाओं एवं आकाशको गुञ्जित करता हुआ गिर गया उस कोलाहलसे कंसने अपने सिरकी कटु-कठोर सैंकड़ों कोटिके पतनकी आशङ्काकी और देरतक मूर्च्छित पड़ा रहा ॥११२॥

अनुवाद—गोप-बालकोंने यह जानकर बार-बार अपने सिरको हिलाकर देवताओंके शिरोमणि कृष्णकी प्रशंसा की। देवताओंने फिर अत्यन्त प्रमोदमें भरकर दुर्लभ स्वर्गमें होनेवाले नये पुष्पोंकी अश्रु-बिन्दुओंकी तरह वर्षा की ॥११३

बकासुर वध

अनुवाद—इसके अनन्तर एक समय बहुतसे बछड़ोंको चराते हुए जल

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वासनाभिः सह रामकेशवाभ्यामाभीरनन्दना अरविन्द [नन्द] नन्दिनी जलमवगाह्य परिपाय्यापः पशूनपि स्वयमपि निपीतवन्तो विहरन्तोऽपि विचरन्तो नातिदूरे विहितसमाधिमिवार्धमुद्रितनयनमारभ्यैकचरणव्रतमिव संवृत्तैकचरण चरणावलम्बिधरणितलम्, ध्यानानन्दवशीकृतमिव निस्पन्दमानम्, आरब्धयोगाभ्यासमिव ऋजुस्थिरीभवदुन्नतग्रीवम्, तपःप्रभावाविर्भूतप्रभूतसत्वगुणमिवबहलधवलिमानमावहमानम्, निर्धूतकलुषतया प्रत्यवयवं बहिर्भवत्तेजोंकुरप्ररोहैरिव देहरुहैरुज्जिहानबहुमहिमानम्, अतिदयालुतयेवाङ्गोत्तरङ्गदुरुपतङ्गादिकमप्यनुद्वेजयन्तं गुरुगरिमतुङ्गिमातिवलक्षिमपक्षद्वयद्राघिमदर्शित कैलासप्रातिपक्ष्यम्; पक्षद्वयलभ्यमान विलक्षणलक्ष्मीकतयाऽभिख्याति ख्यातमपि किरणलक्ष्माणमपि क्षामयन्तं लक्ष्मीरमणचरणकिणाङ्कैरुपलक्षितपार्श्वद्वयपक्षीन्द्रमिव सितेतरद्वित्रपत्रातिचित्रित पार्श्वद्वयीदीप्यमानं गुरु विरहविधूयमानतयामुरमथनमुदीक्षितुं साक्षाद् भगवन्तमिव पन्नगाधीशं, नगाधीशमिवान्तः कठिन गुरुसारं, सारस्वतश्रियाभिरामपि

पीनेकी इच्छासे कृष्ण-बलरामके साथ सब गोपबालक यमुना जलमें स्नान करके पशुओंको जल पिलाकर स्वयं भी जल पीकर घूमते विहार करते हुए समीपमें समाधि लगाये हुएकी तरह नेत्र आधे बन्द करके एक चरण ऊपर करके एक चरणसे ही पृथ्वी तलका आश्रय लिये बैठा हुए ध्यानके आनन्दमें वशीभूतकी तरह निश्चेष्ट वैठा हुआ योगाभ्यासको आरम्भ करने वालेकी तरह ऊँची ग्रीवा उठाकर सीधा और स्थिर बैठे हुए को तपके प्रभावसे उत्पन्न वहु सत्व गुणकी तरह बहुत सी धवलियाको धारण करते हुए कलुष नष्ट होनेके कारण प्रत्येक अवयवमें बाहर निकलते हुए तेजके अकुर प्ररोहकी तरह रोमाञ्चोंसे बहुत शोभा प्रकट करते हुए, अति दयालु होनेके कारण अङ्गोंसे उठती हुई तरङ्गसे, पतंगे आदिको भी दुःख न देते हुए गुरु गौरवयुक्त उच्चतासे प्रतीत होनेवाली दोनों पङ्खोंकी दीर्घतासे कैलाशका प्रतिपक्षि भाव प्रदर्शित करते हुए, दोनों पङ्खोंसे प्राप्त हुई विलक्षण शोभाके कारण कान्ति शोभा द्वारा अति सुन्दर होते हुए भी सूर्यको भी कम करते हुए भगवान् विष्णुके चरण-चिह्नोंसे दोनों पार्श्व अङ्कित होनेवाले गरुड़की तरह दो तीन कृष्ण पत्रोंसे चित्रित पार्श्वके दोनों भागोंसे अत्यन्त शोभित, अत्यन्त वियोगसे दुःखी होनेके कारण मुररिपु कृष्णको देखनेके लिये

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परमतपोरूपं रूपं परमिव कृतान्तस्यातिदुर्दान्तं, दान्तमिवमिहिरमयूखातिविधुरमपि हरिमात्मनैवमीक्षमाणं क्षमानद्धपदमपि, दिविष्ठातिकष्टानुष्ठानपरिनिष्ठं निष्ठुरं बकनामानमसुरं मायाकलितब[1]कपक्षिलक्षणं हरन्तमिवेक्षणं समैक्षन्त ।।११४।।

तदवकलनकौतूहलतरलतया तदन्तिक[2] एव विहरत्स्वाभीर किशोरेषु निजसोदराशोकजातवेद सामुपशान्तये जडधियेव मत्स्यावतारोऽप्यस्यैवेति स्वभक्ष्यत्वेनोद्भावयन्निव नवजलधर श्यामधामानमति साहसोपशोभमानं यशोदाकिशोर मेवाग्रसीदुग्रशीलोऽयम् ।।११५।।

[3]स त्रोटिकोटौ स्वकटौ निधाय प्रयातुमुड्डीय विचारयन्तम् ।
बकं बकीप्राणरसोपलम्भाद् विश्वम्भरात्मा श्लथयां बभूव ।।११६

साक्षात् शेषनागकी तरह, अन्दर अति कठोर गुरु होनेके कारण पर्वत राज्यकी तरह सरस्वतीकी जैसी शोभासे सुन्दर होते हुए भी परम तपोरूप यमराजके रूप की तरह, अत्यन्त दुर्दमनीय दमयुक्तकी तरह सूर्य किरणसे दूर रहते हुए भी स्वयं हरिको देखते हुएको पृथ्वीपर पैर रक्खे हुए परन्तु आकाशमें होनेवाले कष्ट भोगनेमें कुशल निष्ठा मायासे वकपक्षीके स्वरूपको धारण किये हुए दृष्टिको चुराते हुए वक नामवाले असुरको देखा [भागवत दशम स्कन्धमें द्वादश अध्यायमें ८ श्लोकोंमें बकासुरवध-कथा वर्णित है] ।।११४।।

अनुवाद—उसको देखनेके उग्र कौतूहलसे उसीके पास गोप बालकोंके भ्रमण करते हुए अपने भाईयोंकी शोकरूप अग्निको शान्त करनेके लिये मानों मूर्ख बुद्धिसे मत्स्यका अवतार इनका ही हुआ था, इसलिये इनको अपना भक्ष्य समझते हुए नव जलधरको तरह श्याम शोभा धारण करनेवाले अत्यन्त साहसवाले यशोदा किशोर श्रीकृष्णको इस उग्र स्वभाववाले वकदैत्यने ग्रस लिया ।।११५

अनुवाद—अपनी चञ्चुकी नोंकमें अपने कर गण्डको छिपाकर उड़कर जानेका विचार करनेवाले उस बकको पूतनाके प्राण हरनेके आनन्दका स्मरण करके हरिने कुछ शिथिल कर दिया ।।११६।।

---

(1) वकासुरवध-कथा भा० १० स्कं० ११ अध्याये ।

(2) समीपे ।

(3) त्रोटिश्चञ्चुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कैटभारिरुदभाद्बकासुरत्रोटिकोटिघटितः क्षणं हठात् ।
चन्द्रचूड शिखरीन्द्र शेखरीभूतनीरधरनीतिभाक् प्रभुः ॥११७॥

अथ कोटिशीतकिरणशीतलाकारमपि दव दहनमिवाननोदरमेव दहन्तं स पुनरचिरादेव देवाधिदेवं हरिमुद्गिरति स्म ॥११८॥

अथाग्रे यः स्वाग्रे सुरनरसमग्रेशमसुरः–
समुद्वीक्ष्योद्ग्रीव प्रकटित कटित्रोटि विकटः ।
व्यधात्तुण्डाघाताद्धरि वपुषि घातानपि मुधा
क्रुधान्धो दम्भोलाविव दलहतारम्भ निवहान् ॥११९॥

निजमुण्डे चण्डाहतिव्यथिततुण्डतया पिण्डीभूतं भूतद्रुहमवधाय माधवस्तमादाय खे लसद्विविषदोभिहर्षयन्खेलितुमैच्छदखेदोऽयम् ॥१२०

अधोन्यञ्चन्मूर्धाकरकमलरुद्धा मलगलः
खलः खेलास्वोद्यन्नरचरमभागोऽसुरबकः !
सुराराते रासीदहह चिरमाशीलितलसन्–
महाकन्दोदञ्चद्विसविशद तुन्दोदज[1] रुचिः ॥१२१॥

अनुवाद—वकासुरकी चोंचकी नोकसे पकड़े हुए कृष्ण भगवान् थोड़ी देर तक शङ्करजी पर्वतके शिखरपर आये हुये बादलकी तरह शोभाको प्राप्त हुये ॥११७॥

अनुवाद—इसके पश्चात् करोड़ों चन्द्रमाके समान शीतल भी, अग्निके समान मुँहके अन्दर जलाते हुए कृष्णको तत्काल ही बकने उगल दिया ॥११८॥

अनुवाद—पहले अपने सम्मुख सुर-नरादि सबके स्वामी कृष्णको देखकर ग्रीवा उठाकर अपनी विकट चोंचकी नोक प्रकटकी थी, अब हरिके शरीरपर उन्हीं चोंचके आघातोंको क्रोधसे अन्धा होकर करने लगा जसे व्रजपर पत्तोंसे कोई निरर्थक प्रहार करे ॥११९॥

अनुवाद—अपने सिरपर प्रबल आघातोंसे व्यथित हुई चोंचवाले, प्राणियोंसे द्रोह करनेवाले उस वकपक्षीको जानकर माधव प्रसन्न होते हुए आकाश में अपने देवताओंमे खेलनेकी इच्छा करने लगे ॥१२०॥

अनुवाद—नीचे झुकी हुई मूर्धावाला तथा हाथसे जिसका निर्मल गला पकड़ा हुआ है और उस दुष्ट बकका खेलमें अन्तिम भाग कुछ उठ गया है, उस

---

(1) उदजः पशुप्रेरणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुञ्चचचञ्चुपुटग्रीवः श्रीवल्लभकराम्बुजे ।
प्रपञ्चं पाञ्चजन्यस्य वञ्चयामास गोभिया ॥१२२॥

ग्रीवादण्डे गृहीतः समसमयचतुः पार्श्वविस्फारपक्षं ।
सान्द्रोदञ्चत्सुधारुग्धवलिमगमनव्यापिश्चाद्विभागः ।
आभीरेन्द्रत्वमाशोभयदपरि वहन्पाण्डरच्छत्र लक्ष्मी-
मक्षीणक्रौञ्चमायाधरत्रिबुधरिपुस्तस्यपक्षीन्द्र केतोः ॥१२३॥

हरिणोद्भ्रामितस्योच्चैः पक्षास्तस्य दिशो दश ।
मयूखा इव पीयूषमयूखस्य जगाहिरे ॥१२४॥

प्रोड्डीय केऽपि तनुतस्तनवो वलक्षाः
पक्षाः क्षणाद्विविशुरेव दिशोन्तरिक्षम् ।
उद्भ्रामितस्य रभसान्मधुसूदनेन
तारा इव प्रबलकाय बकासुरस्य ॥१२५॥

समय देर तक खेलनेके कारण सुन्दर महाकन्दसे निकलती हुई मृणाल दण्ड जैसी सुन्दर गो प्रेरणामें होनेवाली जैसी शोभा कृष्णकी हो रही थी ॥१२१॥

अनुवाद—भगवान् कृष्णके हाथमें उसकी चोंच एवं ग्रीवा संकुचित हो रही थी उस समय गौओंके डरसे पाञ्चजन्य शङ्खके जैसी शोभा बना रहा था ॥

अनुवाद—ग्रीवारूपी दण्डमें पकड़ा हुआ है एक समयमें ही चारों ओर पङ्ख फैल गये हैं, चिकनी उठती हुई सुन्दर शोभा है, धवलिमासे पीछेका सब भाग व्याप्त है ऊपर श्वेत छत्रकी जैसी शोभा हो रही है, उस अक्षीण क्रौंच बक पक्षी-की मायाको धारण करनेवाले देव शत्रु बकने गरुड़ वाहन भगवान्की आभीर राजाकी शोभाको छत्रके द्वारा प्रकट किया है। (इस श्लोकमें कविने बकपक्षीको छत्रकी उपमा दी है) ॥१२३॥

अनुवाद—हरिके द्वारा ऊँचे दसों दिशाओंमें घुमाये हुये उसके पङ्ख चन्द्रमाकी किरणोंकी तरह दूर तक गिरे ॥१२४॥

अनुवाद—कुछ सफेद पङ्ख उसके शरीरसे उड़कर सब दिशाओंमें और आकाशमें घुस गये। श्रीकृष्ण द्वारा वेगसे घुमाए हुए प्रबल शरीरवाले बकासुरके पङ्ख ताराओंकी तरह सब जगह फैल गये ॥१२५॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उड्डीनैर्गरुतां गणैर्बकतनोर्धावल्यधाराघनैः
क्षुभ्यत्क्षीरसमुद्रसान्द्रलहरी स्पर्द्धाधरैर्दुर्द्धरैः ।
नृत्यद्धूर्जटिमूर्द्धनिर्धुतधुनी प्रोत्तुङ्ग भङ्गायितैः
संभारैरिव कैटभारियशसः शुभ्रीकृता रोदसी ।।१२६।।

हरिरपि करिकरभलीलया पटुबहुलकटु चञ्चुपुटविभागकपट-भणितद्विधाकरणक्रमेणैव कोमलकमलमृणालीमिव दक्षिणेतराभ्यामपि कराभ्यामूर्ध्वाधोऽवस्थिते त्रोटी दधदेव त्रुटिलवलघुनैव कालेन द्विफालीचकार मायाबकस्य तनुवल्लीम् ।।१२७।।

सङ्गरप्राङ्गणेऽधावि धारया रक्तपक्षयोः ।
बकदेहाद् बकारातेः कीर्त्येवोद्यत्प्रतापया ।।१२८।।

द्विधाभूय हरेः पाणौ द्वयोरपि च लोकयोः ।
बकोऽभूदबको दूरादधश्चोर्ध्वं च पश्यतोः ।।१२९।।

अनुवाद—धवलताकी घनी धाराओंके समान तथा क्षुभित होते हुए क्षीर-सागरकी चिकनी लहरीकी स्पर्धा करनेवाले दुर्धर एवं नृत्य करते हुए शङ्करजीकी मूर्धापर हिलती हुई गङ्गाजीकी ऊँची भंगिमाके समान उन वकासुरके शरीरसे उड़े हुए पङ्खोंके समूहने श्रीकृष्णके यशसे आकाश और पृथ्वीको श्वेतकर दिया ।।१२६।।

अनुवाद—हरिने भी गज कलभके खेलके समान सुन्दर पटु चोंचके दोनों भागोंको क्रमसे कोमल कमल दण्डके समान दोनों हाथोंसे ऊपर नीचे चोंचके पुटोंको पकड़ते हुए क्षणांशमें ही उस माया वकके शरीरको फाड़कर दो टुकड़े कर दिया ।।१२७।।

अनुवाद—उस प्रांगण भूमिमें रक्त रंजित पङ्खोंकी धारा इस प्रकार वेगसे निकली जैसे वकके शरीरसे विस्तृत प्रतापवाली कृष्णकी कीर्ति निकली हो ।।१२८।।

अनुवाद—हरिके हाथोंमें दो टुकड़े होकर ऊपर नीचे दोनों देखते हुए लोकोंको वह वक उस समय दूरसे अवक अर्थात् वक नहीं प्रतीत होता था ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अराजन्त मुरारातेरुरसोऽन्तर सृक्कणाः[1]।
नवोदितपयोवाहे[2] नवीनार्कच्छटा इव ॥१३०।
अमृतं सा बकी भुङ्क्ते मां विहायेति मत्सरः।
जहौ स्वयमिव प्राणान् परिपाणौ बकासुरः ॥१३१॥
बकासुरवपुः पाण्डुरक्तै रासक्तमन्तरा।
शुभ्रमभ्रमिवादभ्र तडिदभारैरशोभत ॥१३२।
विदीर्णास्यवहद्रङ्कै रारक्तो बकविग्रहः।
गैरिकैरिव नीहारशिखरी समरोचत ॥१३३॥

अम्बरतलमवलम्ब्य देवता निकुरम्बं[3] हरेरुपरिकुसुमकदम्बकं ववर्ष हर्षेण ॥१३४॥

अभयं धाम तद्वीक्ष्य विह्वलानि भियामराः।
अर्पयन्त इवावर्षन्मनांसि सुमनोमिषात् ॥१३५॥

अनुवाद—मुररिपु कृष्णके हृदयके मध्यमें रक्तके कण, ऐसे शोभित होते थे जैसे नवीन बादलपर बाल सूर्यकी किरणें पड़ रहीं हों ॥१३०॥

अनुवाद—वह पूतना मुझे छोड़कर अमृत पानकर रही है, इस मत्सरसे मानों वह वकासुर हरिके हाथोंमें प्राण छोड़कर स्वयं चला गया ॥१३१॥

अनुवाद—पाण्डुवर्णके रक्तसे भरा हुआ वकासुरका शरीर घनो बिजली के भारसे स्वच्छ मेघकी तरह शोभित होता था ।१३२॥

अनुवाद—फैले हुए मुखसे निकले हुए रक्तसे रङ्गा हुआ वकका शरीर गैरिक धातुसे भूषित हिमाच्छादित पर्वतकी तरह शोभा था ॥१३३॥

अनुवाद—आकाशमें आकर देवताओंके समूहने हरिके ऊपर प्रसन्नतासे पुष्पोंकी वर्षाकी ।१३४॥

अनुवाद—अब उस स्थानको भय रहित जानकर पुष्पोंके बहाने मानों डरसे घबराये हुए मनको अर्पण करते हुए फूल बरसाये ॥१३५॥

---

(1) रुधिरकणाः।
(2) मेघे।
(3) वृन्दः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुन्दिलबकरुधिर बिन्दुभिः केवलप्रबालैरिव भूषितस्य कैटभारातेर्वपुरन्तरान्तरामुक्ताभिरिव नन्दनवनदरदलित मल्लिकाभिराभूषयाञ्चक्रे । १३६॥

लोलं कोलाहलेन प्रथममथ बकक्रीडनानीति सद्यो
ध्यायन्संदिग्धमुग्धम् दनुज इति पुनर्दीप्यमुड्डीनमन्तः ।
अन्धः संभावनेऽभून्मुहुरपि पततां धावतां वत्स वत्से-
त्याक्रन्दद्बल्लवानाम् मधुमथनमुखं वीक्ष्य को[1] वदकीदृक् ॥१३७॥

अभ्युत्थानं प्रकुर्वन्नुषसि विरचयन्सर्वतोगोप्रचारं[2]
पद्मानन्दैककन्दः शुचिरुचिरकरा सङ्ग राजद्रथाङ्गः ।
प्रोद्यन्नुच्चैस्तमोहा परमहिमरुचिः स्फीतपीताम्बर श्री
र्यातानन्ताभिसङ्गो हरिरपि च हरिर्भेजतुर्मित्रभावम् ॥१३८॥

अनुवाद—केवल प्रवालकी तरह मोटी-मोटी वकके रुधिरको बूदोंसे भूषित श्रीकृष्णका शरीर बीच-बीच मोतियोंसे शोभित नन्दन वनकी कुछ खिली हुई मल्लिकाओं जैसा शोभित हुआ ॥१३६॥

अनुवाद—प्रथम कोलाहलसे कुछ चंचल, फिर वक जैसी क्रीडा देखकर तत्काल ध्यान करते हुए सदिग्ध जैसा हुआ, यह दैत्य है ऐसा जानकर दीप्त तथा हृदयमें उड़तासा हुआ संभावनामें तथा वत्स! वत्स ! यह चिल्लाते, दौड़ते, गोपोंकी कृष्णके मुखको देखकर, कौन जाने क्या दशा हुई ? ॥१३७॥

अनुवाद—(प्रस्तुत श्लोकमें कविने श्रीकृष्ण व सूर्यका साथ-साथ वर्णन किया है) गमनमें श्रीकृष्णका साथ करते हुए सूर्य तथा कृष्ण दोनों मित्र-भावको प्राप्त हुए । प्रातःकाल दोनों हरि तथा सूर्य अभ्युत्थान करते हुए, फिर दोनों गौओंका तथा किरणोंका प्रचार करते हुए, हरि-लक्ष्मीको आनन्द देनेवाले, सूर्य कमलोंको आनन्दप्रद, हरिके पवित्र हाथोंमें सुदर्शन चक्र शोभित तथा सूर्यके शुचि रुचिर किरणोंके आसङ्गसे रथके अङ्ग शोभित, दोनों उदित होते हुए, तमोगुणको कृष्ण, अन्धकारको सूर्य नाश करनेवाले, अहिम रूचि सूर्य उत्कृष्ट महिमावाले कृष्ण, तथा विस्तृत आकाशमें शोभित सूर्य तथा पीत-वस्त्रधारी कृष्ण दोनों मित्र-भावको प्राप्त हुए ॥१३८॥

(1) वृन्दः ।
(2) गोचारणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शृङ्गध्वानैः प्रबोध्यन्व्रजशिशुमुषसि द्राक्समादाय वत्सा-
न्वात्सल्याद्वत्सलाभिः शुचिघटित—पटुप्रेष्ठभूयिष्ठ-भक्षः ।
शिञ्जन्मञ्जीरमोदद्विगुणितचरणान्दोलकृत्यं प्रनृत्य-
न्सार्धं गोपालबालैर्व्यचरदुपवनं बालगोपालवेषः ।।१३९।।
दैत्यारेः केलिपात्राण्यकृत तरुमृगीभेकडिम्भान्विहङ्ग—
स्वाङ्गच्छाया विभङ्गीप्रतिरवनिवहान्कृत्रिमान् गोतुरङ्गान् ।
क्षिप्तस्योत्क्षेप धाराः परमसुखपदं कस्यचिद्वस्तुनोदः
कैशोराणामसाध्यं तदिह न जगतीमूर्ध्नि किञ्चित्प्रतीमः ।।१४०।।
अहमहमिकयापि शिशुः प्राप न योगी हृदापि बहुयोगैः ।
सुलभः प्रभुरपि सुलभादपि दुर्लभतोऽति दुर्लभः समये ।।१४१।।

अघासुरवधः

[1]अथाघोनामाद्य प्रतिनिधिरमोघप्रतिनिधि-
र्बकानृण्यं वाञ्छन्वलद जगराकार गरिमा ।

अनुवाद—शृङ्गकी ध्वनिसे प्रातःकाल ही व्रज बालकोंको जगाकर, फिर तत्काल बछड़ोंको लेकर, प्रेम करनेवाली गोपियों द्वारा पवित्र बनाया हुआ सुन्दर प्रिय वहुत-सा भोजन लेकर, बजते हुए मञ्जीरोंके मोदसे दोनों चरण हिलाकर, नाचते हुए गोपाल बालकोंके साथ, बालगोपाल वेषधारण किये बगीचेमें भगवान् भ्रमण कर रहे हैं ।।३३९।।

अनुवाद - वृक्ष, मृग, भेक, डिम्भ पक्षी तथा उनकी छायाका अनुकरण तथा उनकी प्रतिध्वनि वनावटी क्रत्रिम गौ - अश्वादि श्रीकृष्णके क्रीड़ा-पात्र थे। ऊपर फैंकी हुई किसी वस्तुकी फैंकनेकी धारा तथा किसी वस्तुका उछालनादि यही उनकी क्रीड़ा थी। बालकोंको इस पृथ्वीपर कोई वस्तु असाध्य नहीं है, यह हम विश्वास करते हैं ।।१४०।।

अनुवाद—जिनको योगी हृदयसे भी तथा बहुत योगोंसे भी प्राप्त नहीं कर सकता उसको पहले मैं, या मैं इस भावनासे गोपबालक प्राप्तकर लेता था, समयपर प्रभु, सुलभसे सुलभ तथा दुर्लभसे भी दुर्लभ हैं ।।१४०।।

अघासुर वध

अनुवाद—फिर एक अघ नामवाला असुर बकके प्रतिशोधकी इच्छा रखता

---

(1) अघासुरकथा भा० १० स्कं० १२ अध्याये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बहुक्रोश व्यापो गिरिरिव च बभौ पीवरवपु-
र्नवं प्राचीनं वा मुनिरपि न बोद्धुं प्रभुरभूत् ॥१४२॥

अघासुर रूपवर्णनम्

रुन्धानः शिरसाब्जबन्धुमधिक व्यात्ताननत्वाद्द्विधा
व्योमोर्वीमपि तामसीमिव हठात्कुर्वन्दिवा रोदसीम् ।
दुर्वारस्फुरदुग्रफूत्कृति – मरुत्क्ष्वेडाम्बु – वर्षोल्वणो
वर्षाकालमकाल एव विदधे घोराघनामोरगः ॥१४३॥

बिभ्राणे भूरि गर्भे विषमतिकठिन व्यग्रजिह्वाग्रभाग-
प्रोद्यद्विद्युद्विलासः प्रकटितरदन व्यूहवेल्लद्बलाकः ।
चक्षुर्निर्घोष घोराशनिरतनु - चलत्सृक्कशक्रायुधोग्रः
कोटिर्निर्वास्य विश्वं घनतमतमसाभास घोराघमेघः ॥१४४॥

वलच्छोकः कोकः स्फुटमलनिलोकश्च किमिति–
प्रमादं प्राङ्मेने दिविषदपि दुद्राव तरतः ।
समाक्रान्तं विश्वम्भरभरणनिःसम्भ्रमवशा–
दघेनाघेनेव व्यथितमिदमासीज्जगदपि ॥१४५॥

हुआ उसका अमोघ प्रतिनिधि हिलते हुए अजगरके आकारवाला, अनेक कोश तक व्याप्त लम्बा, पर्वतकी तरह स्थूल शरीर, शोभित होता था जिसको यह नया है या पुराना यह जाननेको मुनि भी समर्थ नहीं हो सकते थे ॥१४२।

अनुवाद—सिरसे सूर्यको आच्छादित करता हुआ, अधिक मुँह फैला होनेके कारण आकाश और पृथ्वीको मानों अलग-सा करता हुआ, दिनमें हठ-पूर्वक आकाश पृथ्वीपर अन्धेरा-सा करता हुआ, नहीं रोकने योग्य निकलती हुई उग्र फूत्कारकी वायुके मुखबिन्दुसे उग्रजल वर्षा जैसी करता हुआ, अकालमें ही उस घोर अघ नामक सर्पने वर्षाकाल जैसा कर दिया ॥१४३।

अनुवाद—उग्र विष अन्दर रखे होनेपर अति कठिन उग्र जिह्वाके अग्रभागपर बिजली जैसी चमक प्रकट करता हुआ, चमकते हुए दन्तोंको वक पंक्तिकी तरह दिखाता हुआ, चमकते हुए घोर वज्रकी तरह नेत्र चमकाता हुआ, दीर्घ चलती हुई जिह्वाको इन्द्रायुधकी तरह उग्र प्रकट करता हुआ, घार अन्धकार को कोटिसे विश्वको निकालकर वह घोर अघरूप मेघ प्रतीत होता था ॥१४४॥

अनुवाद—कोक शोकपूर्ण होगया, लोकने यह क्या है ? यह कहकर भ्रम माना, आकाशमें रहनेवाले देव भी एक ओरको हट गये, विश्वम्भरकी रक्षा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अकस्मात्पिदधे व्योम ससोमार्कमघासुरः ।
पयोधौ पतनं मेने मनीषीव मनीषयन् ॥१४६॥

अथ तदाकार त्रिभुवनजनितचमत्कार घनफूत्कारवारमारुत प्रसारितविषविषमतरासार सम्भारतया गुरुगरिमगभीरभीमनिः सीमतिमिरगर्भोपगूढ़ व्योमतया दुर्दिनमनुवर्ण्य दुद्रुवद्रुतमेव ग्रामाभिमुखमाभीरकुमाराः । तदाननोदरदरी द्वारं नगरद्वार मिवावगाह्य नगरमिव तदुदरमेवौको जगाहिरे गोवत्सलगोपवत्सगोवत्साः ॥१४७॥

अघासुरोदरेगोपालं गमनम्

हरिरघमवधाय धावतोऽपि धेनुजघनमादाय सुदाम श्रीदामसुबलस्तोककृष्णप्रभृत्याभीरकुमारजविहारपरिषदो धावन्तेवाहंपूर्वमहं पूर्वमित्यहमहमिकयेव तानेव स्पृशन्नपि सपदि जगाहे तदुदरगुहागर्भम् ॥

की आशासे सब सम्भ्रान्त हो गये, अथवा भयके भारके भर जानेसे सम्भ्रान्त होकर सारा विश्व भयाक्रान्त होगया, पापकी तरह इस अघासुरने सम्पूर्ण संसार को व्यथित कर दिया ॥१४५॥

अनुवाद – अघासुरने सूर्यचन्द्रके सहित अकस्मात् ही आकाशको ढक दिया मानों विचार करते हुए बुद्धिमान्की तरह उनका समुद्रमें पतन मान लिया ॥१४६॥

अनुवाद—इसके पश्चात् सर्पमय त्रिभुवनसे होनेवाले चमत्कार तथा उसकी बढ़ी हुई फुफकारसे पैदा हुई तीव्र वायुसे तथा विषम विष फैलानेके तीव्र भारसे तथा बढ़े हुए गुरु गम्भीर भयङ्कर असीम अन्धकारसे भरा हुआ आकाश होनेके कारण दुर्दिनको समझकर तत्काल ग्रामकी ओर आभीर कुमार भाग गये । उसके मुखके मध्यभाग रूपी गुहाके द्वारमें नगर द्वारकी तरह घुसकर नगरकी तरह उसके उदर रूप घरमें गौओंसे प्रेम करनेवाले ग्वालोंके बालक तथा गौयें और बछड़े सब घुस गये ॥१४७॥

कृष्णका उदरमें जाना

अनुवाद—हरि अघासुरको जानकर धेनु चरणोंको लक्ष्य मानकर सुदामा श्रीदामा सुबल स्तोक कृष्णादि गोपकुमारकी गोष्ठीमें दौड़ते हुए मैं पहले, मैं पहले इस अहमहमिकाके द्वारा दौड़ते हुए गोपबालोंको छूते हुए भी तत्काल ही अघासुरके उदर रूप गुहाके गर्भमें घुस गये ॥१४८॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यन्नामाप्यघमर्द्दनं वितनुते किन्नाम चित्रं महत्-
तेनाघो विनिपात्यते परमघस्योच्चैस्तपो वर्ण्यते ।
योगीन्द्रस्य मनोऽप्यणोरणुतरः सङ्गाहते वा न वा
यो गर्भेऽपि निविश्य कैटभरिपुः सोऽभूद्गरीयान्गुरोः ॥१४९॥

अथ प्रख्यापनक्षीणतमाघोऽयमघासुरः ।
तमितीवानुजग्राह स्वयमन्तर्गतो हरिः ॥१५०॥

हरिणान्तर्गतं तस्य तेनाप्यन्तर्गतं हरेः ।
अद्वन्द्वं हि द्वयोरेव समं त्रयमपेक्ष्यते ॥१५१॥

तमः श्रीरप्युच्चैरपचिततमः श्रीः समुदभू-
दघान्तर्मग्नोऽपि प्रभुरनघ एव त्रिभुवने ।
कृताभीरासङ्गोऽप्यविरतमसङ्गः किमपरं
सदा शुद्धो मुक्तस्तदुदरनिरुद्धोऽपि निभृतम् ॥१५२॥

अनुवाद—जिसका नाम भी अघ पापका नाशकर देता है, अगर वह अघका नाशकर दे तो इसमें कोई आश्चर्य नहीं, परन्तु अघका तप बड़ा ऊँचा वर्णन किया जाता है। अणुसे अणुतर तत्व योगीन्द्रके मनमें प्रविष्ट हो सके या नहीं, परन्तु जिन कैटभ रिपु भगवान् कृष्णने उस अघके अन्दर गर्भमें प्रवेश किया वह गुरुसे भी गुरु है ॥१४९॥

अनुवाद—प्रख्यापन कथनसे अघासुरके अघ क्षीण हो गये इसीलिये मानों अन्दर गर्भमें प्रविष्ट होकर हरिने कृपा की ॥१५०॥

अनुवाद—हरि अघासुरके अन्दर चले गये और अघासुर भी हरिके अन्दर चला गया, दोनों सम स्थान न रहना तीन समान वस्तुकी अपेक्षा रखता है ॥१५१॥

अनुवाद - तमकी शोभा भी बढ़ी हुई तमकी कान्तिको नष्ट करनेवाली हुई, कृष्णने अघके अन्दर प्रविष्ट होकर भी अघका नाशकर दिया, फिर अघके अन्दर मग्न होते हुए भी भगवान् त्रिभुवनमें अघरहित 'अनघ' रहे। आभीरोंका आसंग करते हुए भी निरन्तर वह असङ्ग है, अधिक क्या कहेंगे, वह अघके उदरमें निरुद्ध रहते हुए भी सदा शुद्ध मुक्त और निश्चल है ॥१५२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तमस्तन्वन्सुगम्भीरमभ्यसारीदघासुरः ।
कुलटा मोक्षलक्ष्मीस्तं तमस्यस्तंगते दिवा ॥१५३॥

भगवति गरुडध्वजे[1] गतवति निभृतमघासुराज गरोदरं घनतिमिरपरीतदरीविजिहीर्ष येव सपदि भयतः प्रपलाय्यमानैः पञ्चभिरसुभिरपीन्द्रियैः पञ्चभिर्महाभूतैस्सात्म मनोभिरसुरभोगिनो गुरुभोगभित्तिभेदं विधाय बर्हिनिर्यद्‌भिरुपदर्शितवर्त्मना शनैः शनैरजगरजरठकठोरहालाहलज्वालाकुल कवलनविकलतया परेता एव पूर्वं तदनु दनुजारि दर्शन सुधाभिवर्षणैरपि जीविताभूयो वत्सा अपि वत्स पाला अपि स्वेच्छाचार परायणा अशरणबल नारायणानुसरणा गिरिविवरकोटि दरीद्वारवाटतः समुदय गिरिगभीरगह्वर विहरदुडपरिवृढकिरण परम्परा इवगिरि गर्भनिर्भरभ्रमद् भागीरथीझङ्कार मुखरजलवीचय इवान्वधावन्त बहिरध्वानम् ॥१५४॥

अनुवाद—गम्भीर अन्धकारको बढ़ाते हुए अघासुरने अपना स्वरूप प्रकट किया, परन्तु अन्धकार अस्त होनेपर दिन होता है इसलिये अनेक स्थानपर घूमनेवाली लक्ष्मीने अघासुरको नष्ट कराकर प्रकाश कराया ॥१५३॥

अनुवाद—भगवान् कृष्णके अघासुर रूप अजगरके उदरमें घने अन्धकारसे व्याप्त गुहामें विहारकी इच्छासे प्रविष्ट होनेपर तत्काल भयसे ग्वाल-बाल वत्सादिकोंके प्राण इन्द्रियाँ महाभूत चित्त मनादि सबके क्रमसे निकल जानेपर सर्प रूप अघासुरके फनरूप भित्तिको भेदन करके बाहर निकलनेके दिखाये हुये मार्गसे धीरे-धीरे अजगरकी कठोर विष ज्वालासे आकुल होकर पूर्वमें मृत हुए भी सब ग्वाल-बाल-वत्सादि कृष्ण दर्शन रूप अमृत वर्षासे जीवित हो गये। फिर सब वत्स-बाल अपनी इच्छासे विहार करते हुए अशरण शरण नारायणका अनुसरण करते हुए पर्वत कन्दराकी तरह द्वारके मार्गसे निकले हुए उदयाचलकी गंभीर गुहासे निकलकर चन्द्रमाकी किरण परम्पराके समान तथा पर्वतके गर्भसे निकलकर भ्रमण करती गङ्गाकी झङ्कारसे मुखर जल तरङ्गकी तरह बाहर मार्गपर दौड़ने लगे ॥१५४॥

---

(1) श्रीकृष्णे।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अघात्मा सोऽद्य मेदस्वी पलायितुमिवाक्षमः ।
तमालोक्य तमः पुञ्जं तत्रैव समलीयत ॥१५५॥
इति श्रीमन्मित्रमिश्रकृतावानन्दकन्दचम्पू काव्ये
चतुर्थोऽयमुल्लासः ॥४॥

अनुवाद—वह पापी मेदस्वी लम्बा-चौड़ा भागनेमें असमर्थ श्याम वर्ण कृष्णका दर्शनकर वहीं पर विलीन होगया और परलोक सिधार गया ॥१५५॥

इति श्रीवासुदेवकृष्ण चतुर्वेद शास्त्रि बिरचिते
श्रीवरानन्दिनी भाषाटीका सहिते आनन्दकन्द
चम्पूः काव्ये चतुर्थोयमुल्लासः ॥ ४ ॥



CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ पञ्चम उल्लासः

सर्वेषां कालिन्दी तटे गमनम्

अथ पशुप[1]किशोराः परस्परं मुखमीक्षमाणा विस्मयानापुराहुरपि पुरुहूतावरजन्मानमलौकिक कर्म्माणम् । अथ प्रभातसमयावधि बहुधा बहुधावितमनु चटुल पटूद्भट वत्समनूपवनकच्छं क्रीडितमपि बहुधैव, कथमपि शमनमुखादिव विकटसंकटादभिरक्षितैः सम्प्रति विषमबुभुक्षा क्षामैरस्माभिरपेक्ष्यते क्षेमम् । तदितोद्रुतमनुविन्दतु कालिन्दीपुलिन-मलिन्दमिवानिन्द्यं गोविन्दः सह गोवृन्दैरमन्दपरिणाहम् ॥१॥

किमात्मनो वर्णयिष्यामः, क्षामतमं तव वपुरालक्ष्यैव श्यामधामा-भिराममिदमहह वयं सुदूर पराहता एव ॥२॥

यदिदम्--

पदं ते मञ्जीरध्वनिषु तनुते मान्द्यमधुना
हठाद्वाढं बद्धामपि पटुघटीमुज्झति कटी ।
वचो वक्त्रादूर्ध्वं बहिरुदयते नार्द्धमवशं
द्रवत्प्रायः कायः स्फुरति निरपायः क्षुधि हरे ॥ ३ ॥

सभीका यमुना-तटपर जाना

अनुवाद—इसके पश्चात् परस्पर एक दूसरेका मुख देखते हुए आश्चर्य करनेलगे तथा अलौकिक कर्म करनेवाले इन्द्रके कनिष्ठ भ्राता कृष्णसे, कहने लगे। प्रातःकालसे लेकर बहुत दौड़ते हुए चंचल उद्भट बछड़ोंके पीछे बहुत कुछ जल-युक्त किनारेवाले वनोंमें खेलते रहे। यमराजके मुखकी तरह विकट सङ्कटसे रक्षा किये हुए हम सब बड़ी भूखसे कुछ रक्षा चाहते हैं अब यहाँसे यमुना तटके द्वार-तटकी तरह अनिन्दनीय सुन्दर सब गौओंके साथ लम्बे-चौड़े स्थानपर श्रीकृष्णजी चालिये ॥ १ ॥

अनुवाद—हम अपनी क्या कहें, आपके श्याम तेजसे सुन्दर तथा भूखसे विकल शरीरको देखकर हम तो बहुत दुःखी हैं ॥ २ ॥

अनुवाद—जो यह आपका पैर इस समय मंजीरकी ध्वनिमें मन्दता ला

---

(1) गोपबालकाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षुधावर्णनम्

न व्याहारविहारयोर्न शयने नाप्यासने नाञ्चने
नालङ्कारनिकारयोर्न भवने नो वा वने निर्वृतिः ।
सिक्तस्यापि सुधारसेन शतधास्तोत्रस्तुतस्यापि चे-
दुन्मीलत्यवली भवत्तनुधियोधैर्यच्छिदैक क्षुधा ॥ ४ ॥

हरिरभितो विलोक्य त्रैलोक्य मुकुटमणिमिवाम्बरमणिमम्बरमध्यमध्यासीनं भगवन्तमुदीक्ष्य समाचचक्षे कृतोत्प्रेक्षम ॥ ५ ॥

मध्य मण्डित चण्डांशु दृश्येतरमभूदिदम् ।
ज्वलता वीतिहोत्रेण[1] महाकुण्डमिवाम्बरम् ॥ ६ ॥

अथ सकलवत्स-वत्सपालानुकूलं यमुनाकूल एव नवकिसलयकमनीक-स्निग्धच्छायोच्छुरिततरुणतरूत्करमूलं मृदुगतिमहनीयहंस कामिनी

रहा है, कटि भी अच्छी तरह बँधी हुई पेटीको शिथिलकर रही है, भूखके कारण मुहसे आधा वचन भी नहीं निकल रहा है, भूखमें शरीर दुःखी शिथिल क्रिया-शून्य होगया है ॥ ३ ॥

भूखका वर्णन

अनुवाद—न बात करनेमें, न घूमने, न शयन करने, आसन, गमनादिमें अलङ्कार निकट तथा भवन वनादि कहीं पर भी चैन नहीं है। धैर्यनाश करनेवाली एक क्षुधा लगनेके कारण कहीं चैन नहीं, फिर चाहे कोई सैकड़ों स्तोत्रोंसे स्तुति करे या सुधाके रससे सींचे, फिर शरीर और बुद्धि सब निर्बल हो जाती है ॥ ४ ॥

अनुवाद—हरिने सब ओर देखकर तीनों लोकोंके मुकुटमणिकी तरह अम्बरमणि सूर्य भगवान्‌को आकाशके मध्यमें आया हुआ देखकर उत्प्रेक्षा करते हुए कहा ॥ ५ ॥

अनुवाद—मध्यमें शोभित सूर्यसे अन्यकी तरह यह आकाश जलती हुई अग्निसे महाकुण्डके समान हो गया है ॥ ६ ॥

अनुवाद—सब बछड़े व गोपवालोंके अनुकूल यमुना तटपर ही नव किसलय युक्त घनी चिकनी छाया युक्त नये वृक्षों पत्रादिसे शोभित मूलवाला,

---

(1) अग्नि—अग्निर्वैश्वानरोवह्निर्वीतिहोत्रो धनञ्जयः (अ० को० १।१।५३)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कलरव कोलाहल लोभनीय परिपार्श्वं कृत मधुरतराडम्बर कारण्डवाकीर्णं समुदितमुदितमितर चक्रवाक-रचित चक्रवालं [1]दात्यूहव्यूहविहित वहलकलकलित बहुकौतुहलाभोगं मदकलकलविङ्क निरातङ्क झङ्कार मुखर महीरुहशिखरं सरस कोमल विमलतमाति स्वच्छवालुका विसरं क्वचिदुपचितनवनीरवाह खण्डमण्डितं क्वचिदपि चाखण्डोदयदुडुनिकर निकामवलयितमम्बरवलयमिवाविशदविशद कोकनदच्छविनिविडं सरोजराजिराजितं सर इव बहुविधलक्ष्मलक्ष्मी विलक्षणीभूत मनोभूफलकमिव सुविपुल पुलिन पदं मूर्तिमतीं मुदमिवालुलोके, सत्वरमुपगत्येदमाचचक्षे च ॥ ७ ॥

यमुनावर्णनम्

कालिन्दीचन्द्रहासं च पुलिनाभेद्य चर्म्म च ।
जित्वा जघदघं धर्म्मो द्वयमेव जहाविव ॥ ८ ॥

कोमल गतिसे सुन्दर हंस कामिनीके शब्दके कोलाहलसे सुन्दर स्थानवाला, मधुर आडम्बर करनेवाले कारण्डव पक्षियोंसे व्याप्त सब प्रकारसे सुन्दर, चकवा-चकवी के समूहसे शोभित, दाव्यूह पक्षियोंके बहुत कल-कलसे कौतूहल उत्पन्न करनेवाला, मदवाले कलविङ्क पक्षियोंके आतङ्क शून्य झङ्कारसे वृक्षोंके शिखरको गुञ्जित करनेवाला, सरस कोमल और निर्मल अत्यन्त स्वच्छ बालुका युक्त, कहीं उठे हुए नव जलद खण्डसे शोभित और कहीं पर अखण्ड उदित होते हुए नक्षत्र समूहसे अत्यन्त घिरा हुआ, आकाश वलयकी तरह, विशद कोकनद कमलकी शोभासे सुन्दर, कमल पंक्तिसे शोभित तालाबकी तरह, अनेक प्रकारकी चिह्नयुक्त शोभासे विलक्षण, विस्तृत रेतीला स्थान मूर्तिमती प्रसन्नताकी तरह देखा, तत्क्षण वहाँ जाकर कहने लगे ॥ ७ ॥

यमुना-वर्णन

अनुवाद—कालिन्दी रूपी तलवार है और पुलिन रेतोला स्थान जिसका अभेद्य चर्म म्यान है, इस म्यानयुक्त तलवारसे धर्मने संसारके पापको जीतकर दोनोंको यहाँ छोड़ दिया है। पुलिन शब्दका अर्थ धर्मके कवच रूपमें भी घटता है ॥ ८ ॥

---

(1) 'दात्यूहः कलकण्ठकः" जलकाकः (अ० को० २।५।२१)।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

खलश्रेणीकोलाहलकलित काञ्चीकलकलो
मिलद्वीचीभासोल्लसितसितवासो वलयितः ।
पदाङ्कैः कोकानां प्रिय नरवर लेखोपखचितो
नितम्बः कालिन्द्याः पुलिनमिदमिन्दीवरदृशः ॥ ९ ॥

क्वचित्कूर्म्ममुखोन्मेषमुखरीभूतबुद्‌बुदम् ।
क्वचिन्मत्स्योच्छलत्पुच्छं भात्युच्छं यमुनापयः । १०॥

हिण्डीरस्फुट पुण्डरीक पटली पाण्डुः क्वचित्कुत्रचि-
न्माद्यन्मुग्धमरालमण्डलपटुप्रारब्ध कोलाहला ।
धावद्धीवरभीरु पीवरदुली[1]वाचालवीचीकुला
कुत्रापि क्वचिदप्युदेति यमुना पाठीन झंपाकुला ॥११॥

अथ भोक्तुमनाः करिवरकरभ इवाति कूतूहलोपुलिनवरमध्य-
मध्युवास वासुदेवः पशुपकिशोरैरलंकृतः परितः ॥१२॥

अनुवाद—कमलके समान नेत्रवाली यमुनाका यह पुलिन भाग नितम्व स्थल है, दुष्टोंका कोलाहल ही काञ्चीकी ध्वनि है, तथा उठती हुई तरङ्गोंके श्वेत वस्त्रसे वलयित है, कोकके चरण चिह्न ही प्रियके नख अङ्कोंके शोभा स्थान हैं ॥ ९ ॥

अनुवाद—यमुनाका जल कहीं-कहीं कछुएके मुखसे निकला हुआ बुद्-बुद् शब्द करनेवाला है, कहीं मछलीकी पूँछसे उछलता हुआ सुन्दर शोभा देता है ॥१०॥

अनुवाद—कहीं जल बुद्‌बुद्से युक्त कमल समूहसे श्वेत, कहीं मतवाले भोले हंस समूहके सुन्दर कोलाहलवाली तथा कहीं दौड़ते हुए धीवरोंसे भयभीत कच्छपीसे उठी हुई वाचाल लहरोंवाली और कहीं-कहीं 'यमुना' बड़ी-बड़ी मछलियोंसे आकुल होकर उठ-सी रही है । ११ ।

अनुवाद इसके पश्चात् गज कलभकी तरह अति कुतूहलसे भरे हुए भोजनकी इच्छासे चारों ओर बैठे गोपबालोंसे शोभित वासुदेव रेतीले मैदानमें बैठे ॥१२॥

---

(1) दुली कमठी । "कमठी दुलि" दोलतीति दुलिः । (अ० को० १।१०।२४)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सालवाल इव कल्प पलाशो केशवः सपरिवेष शशीव ।
अन्तरे व्रजकिशोर गरीयोमण्डलस्य विनिविश्य बभासे ।।१३।।
आवृत्योल्लसितं विराजदलकैर्गोपालकैर्बालकैः ।
कालिन्दीपुलिने कलिन्दतनया कल्लोल कल्पंमहः ।
भूवक्षः पदकाख्यभूषण इवान्तर्भाति नीलोपलं-
रत्नैर्द्वैपमिवाद्रिमैक्य रुचिरै रम्भोभिरम्भोनिधेः ।।१४।।
मध्योद्यन्माधवाकारमाभीर शिशु मण्डलम् ।
अपश्यदमरश्रेणो पूर्णचन्द्रमिवापरम् ।।१५।।
हरिपरिमण्डितमध्यं मण्डलमाभीरजैर्बद्धम् ।
ज्योतिश्चक्रमिवासीन्मेढ़भूतध्रुवं वियति ।।१६।।
वत्सपैर्मण्डलीभूय मण्डितो यदुनन्दनः ।
द्वीपशैल इवाशीलि केसराचलमण्डलैः ।।१७।।

अनुवाद—आलवाल युक्त कल्पवृक्षकी तरह, परिवेष सहित चन्द्रमाकी तरह ब्रजगोपोंको गरिमासे युक्त मण्डलके मध्यमें बैठकर केशव अति शोभित हुए ।।१३।।

अनुवाद—शोभित अलकोंवाले गोपाल, बालकोंसे घिरे हुए बैठे तथा यमुनाके पुलिनमें यमुना जलके कल्लोल करते हुए तेजके समान तथा पृथ्वीके वक्षःस्थलपर पदक नामके भूषणमें अन्दर चमकते हुए नील उपलके समान तथा समुद्रके सुन्दर मिले हुए जलसे रत्नोंके द्वारा द्वीपगत पर्वतके समान, हरिकी शोभा थी ।।१४।।

अनुवाद—मध्यमें शोभित हुए माधवको तथा सब ओर बैठे गोपबालक मण्डलको देवताओंने दूसरे पूर्ण चन्द्रकी तरह देखा ।।१५।।

अनुवाद—हरि जिसके मध्य बैठे हैं ऐसे गोप बालकों द्वारा बाँधे मण्डलको, ध्रुव जिसके मेढीभूत अर्थात् मध्यमें हो ऐसे ज्योतिश्चक्रकी तरह आकाशको देखा ।।१६।

अनुवाद—गोपाल बालकोंके द्वारा मण्डल बनाकर बैठे हुए यदुनन्दन, केसरके पर्वत मण्डल द्वारा द्वीप मध्य पर्वतकी तरह शोभित हुए ।।१७।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिष्टान्न - रोटि - पूरिवर्णनम्

मात्रा दत्ते प्रयत्नादमृत इव दधिक्षीरहैयङ्गवीने
खण्डापीने नवीने यदपि च लुचिवीरोटि पूर्य्यैक चौर्य्यः।
आभीराणां शिशुभ्यो विदितरुचि ददे सस्वदे वासुदेवो
यन्माधुर्य्यादिवान्धः क्व नु पशुभिरितं तेषु ते कोऽपिवेद ।।१८।।

कचौरिवर्णनम्

उदञ्चति कचोरिका मधुरिका मनश्चोरिका-
सुधारसपुरी पुरी न लुचिवी समोर्वीतले।
हरेर्हरिण चोलना हरिणहीन चन्द्रानन
त्रपोषित सुधानिधिः सुमधुवाटिका रोटिका ।।१९।।
तमोरुचिधुरन्धरे हरिकरे बिगाढान्तरे-
विधुप्रतिनिधिर्दधि द्रुतमभाणि गोपार्भकैः।
अघासुरविघातनोद्भटवनान्तरोद् भावनां
श्रमच्छिदिर माधवोऽरमत दधिनधुन्वञ्छिरः ।।२०।।

मिष्ठान्न-रोटी-पूड़ी वर्णन

अनुवाद—माताके द्वारा बड़े यत्नसे अमृतकी तरह दधि, दूध, मक्खन आदि दिये हुए थे। खण्ड (खाँड़) से पूर्ण नये नये थे, यद्यपि कृष्ण लुचिवी, रोटी पूरी आदिके चोर हैं, फिर भी गोप बालकोंको रुचिपूर्वक दिया और स्वयं खाया जिसकी मधुरतामें अन्धे होकर हमारे पशु कहां चले गये यह कोई नहीं जान पाया ।।१८।।

कचौड़ी-वर्णन

अनुवाद—कचौड़ी बड़ी अच्छी है, मधुरिका मनको चुरानेवाली है, पूरी अमृतरससे पूर्ण है, लुचिवीके समान पृथ्वी तलपर कुछ नहीं है। तथा हरि की सुन्दर चोलना वस्त्र तथा कालिमासे हीन चन्द्रके समान मुखवाली स्त्रीकी त्रपा लज्जासे युक्त अमृत समुद्रके समान मधुर वाटी तथा रोटी है ।।१९।।

अनुवाद—श्याम शोभासे सुन्दर घने चिकने मध्यवाले सुन्दर हरिके हाथमें चन्द्रके प्रतिनिधि अर्थात् चन्द्र सदृश दही गोप-बालकोंने देनेको कहा, अघासुरके विनाशकी दूसरे वनमें होनेवाली विचार धाराको श्रम दूर करनेवाले

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिष्टं मिष्टमिदं गृहाण न मुदं भेजे मनस्त्वा विना–
भोक्तुं बल्लवबाल बल्लभवहन्नेवं वचो वैभवम् ।
तस्यार्धं विततार वत्सपगणस्त्रैलोक्यमुत्कम्पयन्
न म्लालेन मुखेन पाणिकमले जग्राह नारायणः ।।२१।।

हासवर्णनम्

माधवेन पुरतः प्रसारिते हन्त दक्षिणकरे तदर्थनैः ।
हासयन्त उपहास कौशलैः केऽपि केऽपिशतधाप्यवञ्चयन् ।।२२।।
[1]कुत्राघोपरमः क्व भोजनविधिस्स्तोकैः समं प्राकृतै-
रित्यादिश्य विधिर्विरुद्धहृदयो बोद्धुं व्यतानीद्धियम् ।
तादृङ् मण्डलमध्यमण्डितममुं सा धीस्त्व साधीयसी-
स्तम्भालीवृतमन्वभून्नहठतो वैकुण्ठकण्ठीरवम् ।।२३।।

माधवने दहीके लिये सिर हिलाते हुए वहला दिया दहीको देखकर प्रसन्न हो गये, अघासुर-वधका श्रम दूर हो गया ।।२०।।

अनुवाद—यह मीठा-मीठा तुम ले लो, हे वल्लववालवल्लभ ! गोपबालकोंसे प्रेम करनेवाले तुम्हारे बिना खानेको मन नहीं होता इस प्रकार मीठी वाणीको कहते हुए उसका आधा गोपबालोंने उनको दिया, तीनों लोकोंको कंपाते हुए अर्थात् सिर हिलाते हुए म्लान मुखसे नारायणने उसको अपने हाथपर नहीं लिया ।।२१।।

हास-वर्णन

अनुवाद—उन गोपवालोंके कथनसे सामने माधवके द्वारा दाहिना हाथ फैलानेपर हास चातुर्यसे हँसते हुए कुछ बालकोंने बहुत बार हाथ रखकर झूठ ही धोखा दे दिया अर्थात् दिया नहीं देनेका बहानाकर दिया ।।२२।

अनुवाद—कहाँ तो अघासुरका मारना, और कहाँ कुछ गोपबालोंके साथ भोजन, यह देखकर विरुद्ध विचार बनाये हुये ब्रह्माने भगवान्‌की परीक्षा लेनेका विचार किया । ऐसे गोप मण्डलके मध्यमें शोभित उनकी परीक्षाकी यह बुरी बुद्धि बनाली, जैसे खम्भोंके मध्य बैठे शेरको कोई नहीं समझ पाता वैसे ही गोपोंके मध्य बैठे हुए वैकुण्ठके सिंह कृष्णको ब्रह्मा नहीं पहचान पाये ।।२३।।

---

(1) विधिकृत वत्सापहरणं भा० १० स्कं० १३ अध्याये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तां मायामतनोप्प्रभातुमुदधौ जालैकफालीमिव
भ्रातः साहस कौशलं हतविधेः कस्मै किमाचक्ष्महे ।
तद्वत्सानहरद्धठेन कपटी तुच्छोऽपि सन्स्वेच्छया
वत्साघातिशयोच्छलन्मदमहामायेन्द्र मायाच्छिदः ॥२४॥

ब्रह्म व्यामोहः

भूमावेकं निधाय द्विगुण घनमिलद्भुग्नजं घोरुजानु
प्रोद्दाम्यापि द्वितीयं पदमवनितलाद्बद्ध वीराधिवासः ।
वेत्रं वेणुं विषाणं तनपटपुटितं पृष्टपार्श्वद्वयान्त-
र्बिभ्राणो वामपाणि प्रणिहित कवलं दक्षहस्तेन भुङ्क्ते ॥२५॥

वत्सापहरणम्

वेत्रं वेणुमथो विषाणसदधत्पृष्टे च पार्श्वद्वये
क्षुत्सेनामभिजेतुमायुधमिव त्रेधाक्रुधा माधवः ।
तद्यालीढयतेः क्षणं यदुपतेर्लब्ध्वान्तरं प्राग्विधि-
र्यद्वत्सानहरन्स गोपतिरिति ख्यातस्त्रिलोक्यामभूत् ॥२६॥

अनुवाद—जैसे कोई समुद्रमें जालकी एक फाली उसे जाँच करनेके लिये डाले तो समुद्रकी गहराई आदि का पता नहीं लगता, इसी प्रकार कृष्णकी परीक्षा करनेके लिये ऐसी माया ब्रह्माने की, हे भ्राता उस हतविधिके साहस और चतुरताको हम किससे और क्या कहें, उनके बछड़ोंको हठपूर्वक कपटी और तुच्छ ब्रह्माने चुरा लिया । वत्सासुर और अघासुरके अत्यन्त उठते हुए मदवाले तथा महामायावियोंकी मायाको भी नष्ट करनेवालेकी 'ब्रह्मा' परीक्षा लेना चाहता है ॥

ब्रह्म-मोहन

अनुवाद—दोहरी करके घनी टेढ़ो मिलती हुईं हैं जङ्घा-घुटने और जानु जिसमें ऐसा एक पैर पृथ्वीपर मिलाकर रखते हुए तथा दूसरे पैरको पृथ्वीसे उठाये हुये वीरासन बाँधे बेंत वेणु और श्रङ्गको शरीरके वस्त्रोंमें पीठ और दोनों पार्श्व भागमें खुरसते हुए, बाँये हाथमें ग्रास पकड़े हुए, दाहिने हाथसे खा रहे हैं ॥

वत्स-अपहरण

अनुवाद वेंत, वेणु और श्रङ्गको पीठ और दोनों ओर पार्श्वमें क्षुधाकी सेनाको तीन प्रकारसे जीतनेके लिये माधवने क्रोधसे धारण किया । श्रीकृष्णके

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनालोचितगोवत्सा वत्सपाः कच्छपा इव।
कण्ठमाकुण्ठयामासुश्चण्ड - दण्डहता इव ॥२७॥

अहो वत्सा न लप्स्यन्त मोक्ष्यन्ते किन्तु मद्विधाः।
एहि कृष्ण ! विधास्यन्ते गवामेव गवेषणम् ।.२८॥

कृष्णस्यान्वेषणम्

यदि वत्सा न लप्स्यन्ते नोत्पत्स्यन्ते किमाधयः।
पुरः किमभिधेयं वा तदाम्बा तातयोरपि ॥२९॥
अशनं मुञ्चतो वीक्ष्य किशोरानाशु केशवः।
दयार्द्रो वारयामास मया गतमिति ब्रुवन् ॥३०॥
निवार्य तानार्यतमः समस्तान्, हस्तारविन्दे कवलं दधानः।
तथैव वामे स यथा गृहीतं, जगाम गामेव गवेषमाणः ॥३१॥

भोजनमें ध्यान देनेसे पूर्व ब्रह्मा अवसर पाकर बछड़ोंको नहीं चुरा सका, इसीलिये श्रीकृष्णको सब लोग गोपति नामसे प्रसिद्ध करते हैं ॥२६॥

अनुवाद—गौ और बछड़ोंको न देखकर ग्वाल-वाल कच्छपकी तरह संकुचित हो गये। दण्डोंसे तेज पीटे जाते हुए की तरह शोर मचाकर कण्ठ-को कुण्ठितकर लिया ॥२७॥

अनुवाद—अहो बछड़े नहीं प्राप्त होंगे, हम जैसे अब किस प्रकार छूटेंगे, हे कृष्ण ! आओ अब ये सब गौओंका अन्वेषण करेंगे ॥२८॥

कृष्णका ढूढने जाना

अनुवाद—यदि बछड़े प्राप्त नहीं होंगे तब क्या मनकी चिन्तायें नहीं होंगी ? अवश्य होंगी। माता और पिताके सामने जाकर हम क्या कहेंगे ॥२९॥

अनुवाद--ग्वाल-बालोंको खाना छोड़ते हुये देखकर, केशवने तत्काल दयालु होकर मैं ढूँढ़ने जाऊँगा, ऐसा कहते हुए भोजन छोड़नेसे रोक दिया ॥३०॥

अनुवाद—श्रेष्ठतम श्रीकृष्णने उन सबको रोककर, हाथमें ग्रास धारण कर और उसी प्रकार बाँए हाथमें भी ग्रास लिया और गौओंको ढूँढ़ते हुए चल दिये ॥३१॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्वासीद्रोटी क्ववेत्रं क्व नुवत कवलः क्वावतंसः क्ववंशी
कुत्रांसादुत्तरीयांशुकमशनरसः कुत्र वा कुत्र हासः ।
अक्षिभ्यां नैक्षि नाबोधि च बत वपुषा चेतसा लक्षि नो वा
धन्यानां धेनुजार्थे प्रतिधरणिरुहं धावतो माधवस्य ॥३२॥

कृष्णस्यश्रमवर्णनम्

प्रत्यम्भो धामतीरं प्रतिगिरिकुहरं प्रत्यटव्यन्तरालं
प्रत्यध्व प्रत्यनध्व प्रतितरुनिकटं प्रत्यटद्धामकुञ्जम् ।
प्रत्याशं प्रत्यनाशं प्रतिनददुटजं प्रत्यनासन्नदेशं
प्रत्यासन्नप्रदेशं व्यचिनुत भगवान्प्रत्यगारं च वत्सान् ॥३३॥

द्विगुणमरुणिमानं दर्भगर्भाकुरोधैः
क्षत चरणमसृग्भिश्चक्षुरर्कांशुभारैः ।
अलभत वपुरभ्रश्यामलं श्यामधाम
श्रमबहलजलार्द्रां भ्राम्यतः कैटभारेः ॥३४॥

श्रमोदझरमेदुरं मिहिरभानुतुष्यं वपुः
स वीजयति पाणिना चलघटीकटीं नाटयन् ।

अनुवाद—गोपवालोंके बछड़ोंको ढूँढ़नेके लिये दौड़ते हुए माधवने प्रत्येक वृक्षके नीचे ढूँढ़ा, कहीं पर भी आँखोंने न देखा, न जाना, शरीरसे चित्तसे किसी प्रकार भी न जान पाये, कहां रोटी गई, कहाँ बेंत गया, ग्रास, भूषण, वंशी कहाँ गई, कन्धेसे दुपट्टा भी कहीं का कहीं गया, न भोजनका आनन्द रहा न हँसी रही ॥३२॥

कृष्णका श्रम-वर्णन

अनुवाद—प्रत्येक तालावके किनारे, प्रति पर्वत गुफामें, प्रत्येक वन मध्यमें प्रत्येक मार्ग तथा मार्ग शून्य स्थानमें, प्रत्येक वृक्षके निकट, प्रत्येक समीपके प्रदेशमें तथा दूर देशमें प्रत्येक भवनमें, भगवान्ने बछड़ोंको ढूँढा ॥३३॥

अनुवाद—घूमते हुए कृष्णके कुशोंके अन्दरके अकुरोंसे दूनी लालिमा होगई, रक्तसे पैर घायल होगये, सूर्यकी किरणोंसे आँखें लाल होगईं, घन सदृश श्याम शरीर काला तथा पसीनेके जलसे भींग गया ॥३४॥

अनुवाद—पसीना निकलता रहा, सूर्यकी किरणोंसे शरीर तप गया, चञ्चल घटी युक्तकी तरह कमर हिलाते हुए हाथसे हवा करते थे, मस्तकपर

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ललाटतटविस्फुटत्करसरोजमुद्वीक्षते
दिशो दश गवेषतेऽप्यहह गा विवेशो हरिः ॥३५॥

कार्यार्थी यदि जायते विधिवशात्कः प्राकृतः कः प्रभु
र्व्यामोहाननु विन्दते वितनुते व्यापारभारानपि ।
हंसालीषु बकावलीषु हरिणश्रेणीषु वत्सभ्रमाद-
बभ्राम प्रचुरं जगाम पुलिनं मोघः स मेघच्छविः ॥३६॥

तस्करापहृतहारमिवोरः क्षोणि[1]खञ्जनदृशोगतशोभम् ।
हीनमम्बरमिवोडुकदम्बैर्बाल शून्य पुलिनं हरिणैक्षि ॥३७॥

हरिरिदमवधाय दुर्विधातुः
कपट कुतूहलमात्मनो विभूतेः ।
अघटित कटुदृष्टिरेव सृष्टिः
पशुपशुपालकयोः स्वयं बभूव ॥३८॥

इदमवधाय माधवानुसेवी भृशमनुरक्तिभक्तिव्यक्तीकृतभयजजल

हाथ रखकर दूर तक देखते थे, चारों दिशाओंमें ढूँढ़ते हैं, पृथ्वीपर सब ओर प्रवेश करते हैं ॥३५॥

अनुवाद—चाहे प्रभु हों, अथवा साधारण हो, दैवयोगसे कार्य सबको ही उपस्थित हो जाता है, आज प्रभु भ्रम प्राप्तकर रहे हैं अनेक व्यापार भार उठा रहे हैं, हंसोंमें, बगुलोंमें, हिरनोंमें, बछड़ोंके भ्रमसे खूब घूम रहे हैं, घनश्याम रेतीले प्रदेशमें गये, परन्तु सब बेकार रहा ॥३६॥

अनुवाद—तस्करसे चुराये हारसे शून्य हृदयकी तरह, खजन सदृश सुन्दर नेत्रवाले न शोभाहोन पृथ्वीकी तरह, तारागणसे हीन आकाशकी तरह, (हरिने) सब स्थानोंको बछड़ोंसे शून्य ही देखा । ३७॥

अनुवाद—भगवान्‌ने अपनी विभूति अपनेसे उत्पन्न दुष्ट विधाताका यह कपट कुतूहल समझा और स्वयं कटु दृष्टिसे शून्य बछड़ा और ग्वाल-बालकी सृष्टि स्वयं ही बन गये ॥३८॥

अनुवाद—यह जानकर इसको सहन न करता हुआ माधवका भक्त

---

(1) धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः "क्षौतीति क्षोणी" ।
(अ० को० २।१।२) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धारम्, तदसहमान इव ब्रह्मणि जातमत्सर इव कोऽपि च सुकृती[1] व्याजहार किमपीदम् ॥३९॥

चौर्याचार्य पदाय सम्प्रतिगवां चातुर्यमाचर्यतां
दुश्चर्यैक चतुर्मुखे न करवै किं वैरमस्मिन्नहम् ।
स्वच्छो हि प्रभुरेव तात इव नो गृह्णातु भृत्यानयं
यद्भ्राम वने सदर्भकठिने मध्येऽह्नि दूयेततः ॥४०॥

गोपरूपधारणम्

प्रत्येकं भिन्नभिन्नाभरण गुणवयो वेषलावण्य लक्ष्मी-
नीलाशीलांगभङ्गीमुखनखनयन भ्रूललाटाशनादीन् ।
द्वेधात्मानं किशोरान्कनकमिव तुलाकोटिकोटीरकाञ्ची-
केयूरादीन्प्रकुर्वन्निजमिव स नभौ दर्शयन्ब्रह्मभावम् ॥४१॥

अत्यन्त अनुराग और भक्तिके द्वारा आँखोंमें अश्रु धारण किये हुए, ब्रह्मामें द्वेषको करता हुआ कोई पुण्यवान् यह कहने लगा ॥३९॥

अनुवाद--हे चौराचार्य ! इस समय गौओंकी प्राप्तिके लिये कुछ चतुरता कीजिये । दुश्चर्यामें चतुर इस ब्रह्मामें मैं अब वैर क्यों करूँ । आप प्रभु हैं स्वच्छ हैं । पिताकी तरह इस भृत्य ब्रह्माकी अनीति आप स्वीकार करें । परन्तु कुशोंसे इस कठोर वनमें मध्याह्न कालमें जो आपका भ्रमण हो रहा है इसका मुझे बड़ा दुःख है ॥४०॥

गोपरूप-धारण

अनुवाद--प्रत्येकको जैसी वस्तुकी जैसी शोभा थी वैसी ही भिन्न-भिन्न आभरण, गुण, अवस्था, वेष, सौन्दर्य शोभा, स्वभाव, अङ्ग भङ्गी, मुख, नख, नयन, भ्रू ललाटादि वाले ग्वाल-वालोंको तथा स्वर्णकी तरह सुन्दर तुलाकोटि-मञ्जीर-कोटि-काञ्ची - रसना - केयूरादिको तदनुकूल बनाते हुए अपना ब्रह्मभावसर्व व्यापकता प्रकटकर दी ॥४१॥

---

(1) सुकृती पुण्यवान्धन्यो महेच्छस्तु महाशयः । सुकृतमस्यास्तीति 'अत इनठनाविति' इनिः सुकृती । (अ० को० ३।१।३) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वत्सरूपधारणम्

तावत्ताद्दगशेषवेषवसनालङ्कार शोभागुणा
व्याहारव्यवसाय विग्रह पयोव्यापार - भोगादिकम् ।
रूपं वत्सपवत्सयोरपि हरिः स्वीकृत्य सायं ययौ
ध्वानैर्वेणु - विषाणयोस्तरलयन् गोगोपवामभ्रुवः ॥४२॥

गोगोपीनांदशावर्णनम्

अघध्वंसिवंशीरसीरावचित्रं समाकर्ण्यकर्णेपुराकर्णनेत्राः ।
बहिर्निःसरन्त्यो मुहुर्निष्पतन्त्यो दधु क्षीब[1] भावं परिक्षीणधैर्याः ॥४३
श्रवोभाजिवेणोः स्वने नन्दसूनोर्गवां गोपवामभ्रुवामेकदेव ।
क्षरत्क्षीरधाराभिरासीदसीमस्तनाली घनालीढ पाथोधरश्रीः ॥४४

क्वणत्किङ्किणीनां झणत्कारधारा
रणत्कार राजीरुवन्नूपुराणाम् ।
हरेर्वत्सहम्भारवः शृङ्गवंशी
निनादो जगाहे जगन्त्येव सायम् ॥४५॥

बछड़ारूप-धारण

अनुवाद—गोप बालकोंका जैसा वेष-वस्त्र-अलङ्कार-शोभा गुण बोल-चाल व्यवसाय विग्रह, दूधादिका कार्य बछड़े और ग्वालोंका जैसा रूप था वैसा ही बनाकर वंशी और विषाणको ध्वनिसे गौ और गोपियोंको चञ्चल करते हुए शामको पहुँचे ॥४२।

गोपियोंकी दशा-वर्णन

अनुवाद—अघासुर नाशक कृष्णकी सुन्दर ध्वनिको कानसे सुनकर आँख-कान लगाये हुये, धैर्य खोये हुए बाहर निकलती गिरती पड़ती गोपियाँ किं-कर्त्तव्य विहीन हो ग्ई ॥४३॥

अनुवाद—कान तक पहुँची कृष्णकी वंशीके रवमें गौओंका, गोपियोंका एक साथ ही बहते हुए दूधकी धारासे, असीम स्तनोंसे बहते दूधकी घने बादलोंसे बरसते जलकी जैसी विचित्र शोभा थी ॥४४॥

अनुवाद—बजती हुई किंकिणियोंकी झणत्कारकी धारा, नूपुरोंकी रण-

---

(1) क्षीब—"मत्ते शौण्डोत्कटक्षीबाः" मत्तः (अ० को० ३।१।२३) ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्वचिद् वत्सपालैः क्वचिद् वत्सजालै-
र्बलद्वन्द्वमालैः क्वचिन्नन्दबालैः ।
परब्रह्मभिः पूर्णमेवास तूर्णम्
पुरं गोपुरं चत्वरं मन्दिरं च ॥४६॥

बलत्पुच्छवत्सोच्छलद्धूलिधारा
धुनीमग्नमानन्दसिन्धूरमग्नाः ।
समादाय दोर्भिस्तमादाय वक्षः
स्वनन्दन्यशोदादयो घोषयोषाः ॥४७॥

श्रमजलपशुकुलबहल धूलि धोरणीभिरभिसंकुलतया पंकिलकाय-कन्दलीकं प्रथमत एव कीलाल धाराभिरभिकुसुमसमूहादिभिः सुरभी-कृतस्नैहैः स्नेहैरिवाभ्यञ्जयत ॥४८॥

बालप्रेमनिरूपणम्

तदनु च विमलतरेण श्रीयमुनाजलपूरेण स्नपयित्वा, तदनु च वस-

त्कारकी शोभा, हरिके बछड़ोंका हम्भा-हम्भा शब्द श्रृंग और वंशीका शब्द सायं संसारमें सब जगह व्याप्त होगया ॥४५॥

अनुवाद—कहीं गोपबालोंके रूपमें, कहीं बछड़ोंके समूहमें, कहीं नन्द-बाबाके बालकोंके रूपमें, नगर, गोपुर चबूतरादि मन्दिर सब परब्रह्मसे व्याप्त होगये ॥४६॥

विशेष—स्वयमात्मात्म गोवत्सान् प्रतिवार्यात्मवत्सपैः ।
क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद् व्रजम् ॥भा०११।१३।२०

अनुवाद—घूमती हुई पूँछवाले, बछड़ोंके उछलनेसे, उठी हुई धूलकी धारामें मग्न श्रीकृष्णको आनन्द सागरमें मग्न यशोदादि गोपोंकी स्त्रियाँ भुजाओंसे आलिङ्गन करके हृदयमें प्रसन्न हुईं ।४७॥

अनुवाद—पसीना तथा पशुओंके द्वारा उठी हुई धूलि धारासे सने होनेके कारण मैले शरीरवाले कृष्णको सबसे प्रथम जलसे फिर पुष्पोंसे वासित स्नेहकी तरह तैलसे अभ्यक्त किया, स्नान कराके तैल लगा दिया ॥४८॥

बाल प्रेम निरुपण

अनुवाद—तदनन्तर फिर विमल यमुना जलसे नहलाकर फिर सुन्दर वस्त्रसे पोंछकर कुसुमके समान सुकुमार छोटे-छोटे बाल अवयवोंको ठीक करके

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेन स्वेन सम्मार्ज्यावयवं कुसुमसुकुमारस्पर्शतया सूक्ष्मतया चाति समीचीने कौशेय वाससी[1] परिधाय्य, पुनरपि मञ्जीर प्रमुख चरणालङ्कार किङ्किणी प्रभृति कटिभूषणारुण नख रुचिर ग्रैवेयकादिक ग्रीवाभरणमुद्रिका वलय[2] केयूरकुण्डलादिभिरभिमण्ड्य, गोरोचनाभिरति ललितललाटपट्टकोपरि पटुतरतिलकमुल्लिख्य नयनमनुरञ्ज्यापि मञ्जुभिरञ्जनैरलिकतलमिलदलकमालिकामलि - किशोरमालिकामिव सम्प्रसाध्य, क्षणमभिलषितमन्नादिकमनुभोजयन्त्यः, क्षणमुरसि निवेश्य, गुह्यमितीव गाढमुपगुह्य, भुजवल्लीभ्यामामीलितनयनमनुभवन्त्यः किमपि सुखभरं, क्षणमपि करचरणोदर चिबुक मुखकपोलपालिभालमौलि स्थलमनुचुम्बन्त्यः, क्षणमपिजनितदरान्दोल हिन्दोलिकाया मान्दोल्य, जगदानन्दनमपिनन्दनमानन्दयन्त्यः, क्षणमपि च निजाङ्कपल्यङ्क एव निधाय स्फुरदधर बन्धुजीवान्तरे स्तनमाधाय स्तन्यमधुर सुधारसं पाययन्त्यः, क्षणमपि निखिल बिलक्षण मुदित क्षणमाख्याय साक्षादेव हरेः कलिकलुषकलाप यापन क्षणं चरितमकृत्रिम माधुरी

स्वच्छ रेशमी वस्त्र पहनाकर फिर मञ्जीरादि चरण भूषण किंकिणी आदि कटिभूषण सुन्दर नख ग्रैवेयकादि (ग्रीवाके आभरण) अगूठी, कंकण, केयूर, कुण्डलादिसे शोभित करके गोरोचनसे सुन्दर ललाट पट्टपर शुभ तिलक लगाकर, आँखोंमें सुन्दर काजल लगाकर, भ्रमर मालाकी तरह मस्तक तक आये केशोंको कन्धेसे ठीक करके फिर अभीष्ट अन्नादि कुछ भोजन कराती हुई गोपियाँ क्षणभर हृदयसे लगाकर, छिपाती हुई की तरह, भुजाओंसे गाढ़ आलिङ्गन करके, कुछ आंख बन्दकर अपूर्व सुखका अनुभव करती हुई, कुछ क्षण हाथ, पैर, उदर, ठोड़ी, मुख, कपोलस्थल, मस्तक भागको चुम्बन करती हुई, छोटेसे हिंडोलेमें थोड़ी देर झुलाकर, जगत्‌को आनन्द देनेवाले यशोदानन्दनको आनन्दित करती हुई थोड़ीदेर गोदरूपी शय्यापर बिठाकर, स्फुरित हुए बन्धुजीव कुसुमके समान ओष्ठमें स्तन लगाकर सुधाके समान, मधुर दूध पिलाती हुई थोड़ी देर कलियुगके पाप समूहको नष्ट करनेवाले निखिल विलक्षण सबको प्रसन्न करनेवाले साक्षात् हरिके चरितको कहकर, गानकर, स्वाभाविक माधुर्यसे शोभित अपने घरके आँगनमें ही धीरे-धीरे

---

(1) वस्त्रं । (2) कङ्कणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धाम निजधाम प्राङ्गण एव लघुतटमनुद्रावं द्रावं निद्रापयन्त्यः कर्मान्तरमेव न विदुरखिलाश्चर्य चातुर्यैक भुवोऽपि गोपनार्यः ॥४९॥

आहूय हुङ्काररवेण दूराद्दुर्धावतस्तानभिधातुकामान् ।
[1]गोगोपबालानहरत्स मूढो, भेजे परब्रह्म शिशूभवत्ता[2] ॥५०॥

स वत्स वत्सपीभूय विहरन् गृहगोष्ठयोः ।
दर्शयामास योगीन्द्रमात्मारामत्वमात्मनः ॥५१॥

दधति न मनो घासग्रासे न वारिणि वारिता
अपि च विपिने गोपैः कोपैः स्थितिं न हि कुर्वते ।
गिरिबिल तनूनुल्लङ्घन्ते समीक्षितुमुज्झित—
प्रतिनवसुना वत्सीभूते मुरद्विषि धेनवः ॥५२॥
कलितमुरलीध्वानाः प्राणान्मनाक् क्व न मेनिरे
व्रजमृगदृशः के पन्थानः स्फुटत्कटुकण्टकाः ।

घूमकर सुलाती हुई, सभी आश्चर्य और चतुरताको उत्पन्न करनेवाली गोपियाँ कोई अन्य दूसरा कार्य ही इसके अतिरिक्त नहीं जानतीं थीं ॥४९॥

अनुवाद—दूरसे हुङ्कार शब्दसे बुरी तरह दौड़ती हुई गौओंको तथा कहनेके इच्छुक गोपाल-बालोंकों बुलाकर मूढ ब्रह्मा हरले गया फिर शिशु बनते हुए परब्रह्म गो गोपाल दोनोंके रूपमें प्रतीत होने लगे ॥५०॥

अनुवाद—बछड़ा और गोपाल बनकर घर और गोष्ठमें विहार करते हुए भगवान्‌ने अपने आपको योगीन्द्र और आत्माराम दोनों ही भावमें प्रकट कर दिया ॥५१॥

अनुवाद—अब ब्रह्मरूप गो-गोप वेषधारी कृष्ण, घासके कवलमें तथा जलमें जल बुद्धिसे मन नहीं लगा रहे हैं, वनमें गोपोंके साथ कोपसे ठहरना नहीं चाहते। बछड़े बने हुए मुररिपु कृष्णके देखनेको गौयें, छोटे बछड़ोंको छोड़कर पर्वत वृक्षोंको लाँघकर जा रहीं हैं ॥५२॥

अनुवाद—मुरलीकी ध्वनि सुनकर प्राणोंकी तनिक भी परवा नहीं होती, नकलते हुए बड़े-बड़े कटु काँटोंवाले कौनसे मार्ग गोपियोंके हैं यह भी नहीं देखते,

(1) "मन्ये मनोज्ञ प्रचुराशयेषु तपांसि वृन्दावन गोप गोषु" इति पाठः पार्श्वभागे केनापि लिखितः ॥
(2) शिशूभवत्परब्रह्म ता गा भेजे" इत्यन्वयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न बत पतनं श्वभ्रे स्वासामिवालयकर्म्मण-
स्तनुभुवि हरौ गोवद्गोवर्द्ध नाद्रिपिपासवः ॥५३॥

वृन्दावनदूर्वादल महिमा

वृन्दावनैक दूर्वासमतां पूर्वाधिपोऽपि नाश्रयते।
आस स्वर्देशदेवो वत्सीभूयापि यामभितः ॥५४॥

ब्रह्मभ्रान्ति

गाहन्तां गहनान्तरणि शतधा मुग्धा हि तन्मातरो
मच्चेतोऽपि हरन्ति हन्त हरिवद्वत्साश्च ते वत्सपाः।
आः किं तन्न मयाप्यबोधि यदहो रामोऽपि नामेदृशो
भ्रान्तिर्यत्र विधौ कियानिह[1] सरोजन्माप्तजन्मा विधिः ॥५५॥

विषय-मदमहिम्नामेव भूम्ना स मेने
क्षणलवलघुकालं वत्सरं मत्सरात्मा।

हमारी तरह घरमें काम करने वालोंका भी कहीं गड्ढेमें पतन न हो जाय, गोवर्धन पर्वतपर पिपासु गोप-गोपियाँ-गौकी तरह रूप धारण करते हुए कृष्णमें इस प्रकार भावनाकर रहे थे ॥५३॥

वृन्दावन दूर्वादल-महिमा

अनुवाद--पूर्वाधिष्ट पूर्व दिशाका स्वामी इन्द्र भी वृन्दावनकी एक दूर्वाकी समता भी नहीं कर सकता, जिस वृन्दाटवीके चारों ओर बछड़ा बने हुए कृष्ण घूम रहे हैं ॥५४॥

ब्रह्माजीकी-भ्रान्ति

अनुवाद—भोली-भाली गौयें सैकड़ों तरह गम्भीर वनमें घूमती रहें, हरिकी तरह यह बछड़े और ग्वाल-बाल मेरे मनको प्रसन्न करते रहें, अहो हम भी अब तक नहीं जान सके कि बलराम भी ऐसे ही हमारी तरह हैं, वह भगवान् के रूपको नहीं समझ पाये, ब्रह्माको तो ऐसी भ्रान्ति हुई क्योंकि जड़ जलसे उत्पन्न कमलका पुत्र है उसकी भ्रान्ति स्वाभाविक है ॥५५॥

अनुवाद—विषयोंके मदकी अधिकतासे उस मत्सर करनेवाले ब्रह्माने अपने अर्थात् ब्रह्माके क्षणांशके थोड़े कालके बराबर मनुष्योंके वर्षभर समय; क्या

---

(1) ब्रह्मा।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परमजनि किमित्याशङ्कया स स्वयम्भू-
र्मुरमथन विनोदं द्रष्टुकामो जगाम ॥५६॥

ब्रह्मव्यामोह

तावन्तोऽपि तथैव तेन हरिणा तत्रैव तादृग्महत्-
क्रीड़ाकौशलमावहन्ति शिशवो गच्छन्ति वत्सा वनम् ।
इत्यालोच्य विविच्य चेतसि चिरं क्रीडानमत्कन्धरः
श्रीबन्धोरवधाय धाम निपतद् धूलीषु सोऽलीयत ॥५७॥

दौरात्म्यं निजमनुचिन्त्य कैटभारे-
रुद्भाव्य भ्रमितधियो हृदि प्रभावम् ।
आमीलन्नयन मखण्डजाड्य दण्डं
द्राग्दण्डं वपुरपि वेधसोऽनु चक्रे ॥५८॥

चण्डकर्म चरतो हि गुरूणां दण्डवत्पतनमेव न दण्डः ।
पद्मभूरिति विभुप्रिय वृन्दारण्यधाम शरणं स जगाम ॥५९॥

कर्म्माणि स्मरतो निजानि विदलन्मर्म्माणि शर्म्माण्यगु-
र्द्राग्दूरेषु सहाक्षपाटवगणैर्भङ्गं च भेजे स्वरम् ।

होगया इस शङ्कासे ब्रह्मा मुररिपुके विनोदको देखनेकी इच्छासे गया ॥५६॥

ब्रह्माजीका मोह

अनुवाद—उतने ही वैसेही उन्हीं हरिके साथ वहींपर वैसेही आनन्दसे क्रीड़ा-कर रहे हैं, वैसेही छोटे-छोटे बछड़े वनको जाते हैं। यह देखकर चित्तमें बहुत देर-तक सोचकर और अपनी गर्दन झुकाकर श्रीबन्धु-कृष्णका प्रताप समझकर गिरतो हुई धूलिमें लोट गया ॥५७॥

अनुवाद—श्रीकृष्णके साथ अपनी दुष्टताको विचारकर भ्रान्त बुद्धियुक्त हृदयमें प्रभावको सोचकर आँखें बन्द करते हुए अखण्ड जड़ताका दण्ड अत्यन्त मूर्खताका दण्ड भोगनेको अपना शरीर ब्रह्माने तैयार किया ॥५८।

अनुवाद—गुरुओंके साथ अनुचित कर्म करनेका दण्ड केवल दण्डके समान गिर पड़ना ही नहीं है यह सोचकर कृष्णके प्रिय वृन्दावन धाममें ब्रह्मा शरण प्राप्त करनेके लिये गया। "पृथ्व्यां वपुः कनक दण्डमिवाभिपात्य" भागवत १०।१३ ६२ ॥५९॥

अनुवाद—मर्म स्थलको विदीर्ण करनेवाले अपने कर्मोंको स्मरण करते

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संभ्रान्त्या शवनिर्विशेष - वपुषो दुर्मेधसो वेधसो
भूपृष्ठे पतितस्य तस्य न ययुः प्राणा बहिर्व्रीडया ॥६०॥

अथ कंटभरिपुर्बन्धाय धातुरवस्था मास्थाय किमपि निजरूपमनिरूपणीयलावण्य-वयोवेषविशेषप्रतिरूपमपहाय निखिलसुरासुरानवगाह्यमागाधमायाप्रपञ्चममृताविशेषहास - लेशेन तरलतरापाङ्गेन सुधातरङ्गेणेवाभिषिञ्चन्ननतिदूर एव तरुण कदम्बतरुमवलम्बमानोऽमृत संजीविनोमिवामृतवर्षिणीमिव विद्यामनवद्यां मुरलीमुरलीकृत्य जीवयन्निव प्रबोधयामास धातारम् । स खलु ससंभ्रमचकितमुदीक्ष्य दिक्षु पुरो लक्षयति स्म पुण्डरीकाक्षम् ॥६१॥

ब्रह्मस्तुतिः

त्रिभङ्गीमदङ्गं भ्रमद्भ्रूभुजङ्गं,
कृपा सङ्गरङ्गावलद्रक्तरङ्गम् ।
चतुःपार्श्वपुञ्जी भवन्मञ्जुगुञ्जा,
वली चारुचूडा वलद् बर्हखण्डम् ॥६२॥

हुए ब्रह्माकी शक्ति नष्ट होगई । तत्काल दूर तक सब इन्द्रियोंकी शक्ति नष्ट हो गई साथ ही स्वर भङ्ग होगया । भ्रान्तिसे मृतकके समान शरीर होगया, पृथ्वीपर गिरे हुए मूर्ख ब्रह्माके प्राण लज्जासे बाहर नहीं निकले ॥६०॥

अनुवाद—इसके पश्चात् कंटभरिपु कृष्ण बन्धनकी तरह ब्रह्माकी अवस्थाको जानकर नहीं जानने योग्य लावण्यवय वेशादि विशेष स्वरूप रहित सुर-असुरादिसे नहीं जानने योग्य अगाध माया प्रपञ्चवाले अपने रूपको छोड़कर अमृत सदृश हासयुक्त तरलतर नेत्रयुक्त अमृत लहरीकी तरह सिंचन करते हुए समीपमें ही तरुण कदम्ब वृक्षका सहारा लेते हुए, अमृत सञ्जीवनीकी तरह अमृत वरसानेवाली शुद्ध विद्याका मुरलीके समान आश्रय लेकर जीवन देते हुएकी तरह ब्रह्माको समझाने लगे । वह ब्रह्मा भ्रमके साथ चकित होकर चारों ओर दिशाओंको देखकर श्रीकृष्णको देख रहा था ॥६१॥

ब्रह्म-स्तुति

अनुवाद—अङ्गोंको त्रिभङ्गके समान तथा सर्पके समान काली-काली भ्रूकुटिको चलाते हुए कृपाकी आसक्तिसे शोभित हो रही है लाल आभा जिनकी,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सपत्रैकनीपं स्फुरद्वामकर्णं,
तमालाभ्रमालाशिलाश्याम वर्णम् ।
स्फुरद्रोचना चन्द्रचञ्चल्ललाटं,
लसद्द्वारलक्ष्मीकवक्षः कपाटम् ॥६३॥
कटीनद्धचञ्चद् घटीशुद्धवेशं,
कृता - खण्डपौगण्डशोभाविशेषम् ।
घनस्निग्धनीपाचलच्छायमूले,
स्थितं चण्डभानोः[1] सुतायाश्च कूले ॥६४॥
हृताशेषवाम्यं महायोगिकाम्यं,
श्रुतीनामगम्यं प्रसादाति रम्यम् ।
विषाणं च वेणुं च वेत्रं च विभ्र-
त्परं ब्रह्म साक्षात्स्वयम्भूः समीक्षे ? ॥६५॥
न्युब्जानां पुनरब्जानां श्रियमाप मुरद्विषि ।
प्रसन्नेऽपि त्रपान्यञ्चतुर्मुख चतुर्मुखी ॥६६॥

चारों ओर एकत्र हुई सुन्दर गुन्जाकी पंक्तिसे शोभित चोटीमें मयूरकी पूँछ जिनके लगी हुई है । "गुञ्जावतंस परिपिच्छलसन्मुखाय" । भा० १०।१४।१ ॥६२॥

अनुवाद—पत्रयुक्त एक कदम्ब पुष्पसे शोभित वाम कर्ण चमक रहा है, तमाल, वर्षाकी मेघमाला तथा श्याम शिलाके समान श्याम वर्णवाले हैं, चमकती रोचनासे अर्द्ध चन्द्र सदृश तिलकसे ललाट शोभित है तथा सन्मुख द्वारपर लक्ष्मीसे भूषित वक्षस्थल है ॥६३॥

अनुवाद—कटिभागमें घंटीसे चमकता हुआ शुद्ध वेष है, अखण्ड सम्पूर्ण कुमार अवस्थासे सम्पूर्ण शोभा है, घनी और चिकनी कदम्ब वृक्षकी छायामें यमुनाके तटपर स्थित हैं ॥६४॥

अनुवाद—सब प्रतिकूल वर्गको नष्ट करनेवाले बड़े-बड़े योगियोंसे अभिलषित श्रुतिसे अगम्य प्रसन्नतासे अति सुन्दर विषाण वेणु और वेत्रको धारण किये साक्षात् परब्रह्मको ब्रह्माने देखा ॥६५॥

अनुवाद—श्रीकृष्णके प्रसन्न होते हुए भी लज्जाके कारण झुके हुए ब्रह्माके चारों मुखोंने झुके हुए कमलोंकी शोभाको प्राप्त किया ॥६६॥

---

(1) विधिकृता स्तुतिः भा० १० स्कन्धे १४ अध्याये ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

हिमीकर्तुकामा हृदेवास्य वामा
हिमानीव हेमाभवासो वसानम् ।
हरिं हारिणं हारिता राजधानी
प्रमाष्टुं प्रियागः प्रतुष्टाव वाणी ॥६७॥

परस्मै परस्माच्च कस्मैचिदस्मै
नमस्ते समस्तेश यस्त्वेष भासि ।
इतो वत्सपा[1] लीमितो वत्सपालान्–
विचिन्वन्वनेऽस्मिन्वितन्वन् रहस्यम् ॥६८॥

[2]तुलाकोटिमङ्घ्रो कटौ क्षुद्रघण्टां
हृदि स्फारहारं श्रुतौ कर्णिकारम् ।
करे वेणुवेत्रे मुखे स्मेरनेत्रे
दधानाय चित्रे नमो विश्वनेत्रे ॥६९॥

अनङ्गीव रङ्गी भवान्वेत्रमंसे,
ऽप्यजन्मापि जन्माददे गोपवंशे ।

अनुवाद—अत्यन्त शीतल महत हिमकी तरह इस ब्रह्माकी वामा पत्नी सरस्वती ठण्डा करनेकी इच्छासे क्रोध दूर करनेकी अभिलाषासे हृदयसे प्रिय ब्रह्माके आग=अपराधको दूर करनेको प्रसन्न चित्त हरिको राजाओं स्थिर करनेवाली वाणी स्तुति करने लगी ॥६७॥

अनुवाद–हे समस्त जगत्‌के स्वामी ! परसे पर किसी एक विशिष्ट स्वरूप आपके लिये मैं नमस्कार करता हूँ जो आप सर्वत्र प्रकाशित हैं, इधर बछड़ोंको और गोपोंको ढूढ़ते हुए अपने रहस्यको फैला रहे हैं । ६८॥

अनुवाद—चरणोंमें नूपुर कमरमें घुँघरू क्षुद्र छोटी घण्टा हृदयपर सुन्दर हार कानोंमें कन्नेरके फूल ["कर्णयोः कर्णिकारम्" भा० १०।२१।५] हाथ वेणु और बेंत मुखमें प्रसन्न नेत्र धारण करते हुए विश्वके चितेरे नेताको नमस्कार करता हूँ ॥६९॥

अनुवाद–अङ्गहीन होते हुए भी अङ्गी बनकर खेल करनेवाले अजन्मा होते हुए भी गोप वंशमें जन्म लेनेवाले, अकर्मा होते हुए भी कर्मजन्य, पापका

---

(1) "पाली पंक्तिः" । (2) तुलाकोटिर्नूपुरम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अकर्म्मापि कर्म्माघहन्पाशुपाल्यं,
किमेतन्नचित्रं पुराणोऽपि बाल्यम् ।।७०

न वै वास्य गावो न च व्यासगावो,
विदुर्धाम देवोचितं ते कथञ्चित् ।
त्वमीदृक् त्वमीदृक्पथे कुर्वते त्वा,
मभूदित्ययं मत्सरो वत्सरोत्या ।।७१।।

न वाचं यमानन्दमाधीनचेतो,
रमेश क्षणं चक्षमे स्प्रष्टुमेव ।
वनान्तर्निगूढं दधाना भवन्त,
बलाद्वत्सचारी न किं मत्सराय ।।७२

महानस्तु दण्डो वरं देव चण्डो,
विनोदं व्यतानीन्ममागस्त्वगण्डम् ।
श्रुतं रूपमेकं पुराधानुभूतं घना-
नन्द वृन्दावने वृन्दभूतम् ।।७३।।

जगत्सेवितच्छायपादोऽपि
यत्त्वं तनू .... ।

नाश करते हुए पशु-पालन करनेवाले, पुराने होते हुए भी बालक, क्या यह आपके आश्चर्य जनक कार्य नहीं हैं ? यहाँ विरोधाभास अलङ्कार है '।७०।।

अनुवाद—आपके स्वरूपको न इस ब्रह्माकी, और न व्यासकी वाणी प्राप्तकर सकती है, आप ऐसे हैं इस रूपका ये योगी दृष्टि-मार्गमें लाते हैं, वत्स पालन रीतिसे आप नर-लीला कर रहे हैं ।।७१।।

अनुवाद—हे रमेश ! हमारा यह पराधीन चित्त योगियोंके आनन्दको क्षणभर भी स्पर्श नहीं कर सकता है वनके मध्य छिपे हुए आपको अन्य लोग कैसे जान सकते हैं, क्या वत्स चारण आपकी नर-लीला नहीं है ? ।।७२।।

अनुवाद—हे देव ! यह मेरा महान् दण्ड योग्य अपराध है, आपके विनोदमें मैंने अखण्ड अपराध किया । घन आनन्द रूप वृन्दावनमें एकत्र हुआ जो रूप मैंने पहले सुना था वह रूप मैंने पाप नाशके लिये अनुभव किया ।।७३।।

अनुवाद—आपके चरणोंकी छायाका संसार सेवन करता है । (.... श्लोकका एक चरण अप्राप्य है ।) श्रुति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रुतिर्नेति नेति क्रमादन्व धावच्
छ्रामादप्यविन्दत्पदं ते न हन्त ।
असत्स्वागसोऽपि प्रसह्यापराधं
क्षमाशील साक्षाद्भूस्त्वं नमस्ते ।।७४।।

नरीनर्त्ति नाथत्रयी जातहर्षा, महावारिवर्षागमे बर्हिणीव ।
जपन्त्येकमेवाद्वयं ब्रह्म किञ्चिन्न, नानेति जाते भवत्य द्वितीये ।।७५।।
यदानन्दमाहुः परब्रह्मरूपं, तथा तच्चमुक्तिस्फुरद्वक्ति वेदः ।
विघूर्णन्नघोऽपि त्रिलोकीमलोऽपि, त्वयि क्षेमभागीक्षितो मोक्षलक्ष्म्या ।७६
अथास्यातिमृत्योस्त्रयी त्रासमापत्तमोभूःक्वरक्षःप्रभाभूः क्वमोक्षः ।
'विदित्वातिमृत्युं तमेव प्रयाती' त्य, थासीदृशी मोदयन्मोदराशिः ।।७७
न तप्यं च तेपुर्न जप्यं च जेपुः, परं धाम भेजुस्त्वयायुज्य रेजुः ।
अघौघैरवद्याश्च घोरैरघाद्याः, कृपावृष्टिधन्या प्रभोः सृष्टिरन्या ।।७८।।

नेति-नेति कहकर दौड़ती है परन्तु आपके पदको श्रम करके भी प्राप्त नहीं कर पाती, दुष्टोंके अपराधोंको सहन करके आप कृपा करते हैं, मैं आपको प्रणाम करता हूं ।।७४।।

अनुवाद—हे नाथ ! अति वर्षा कालमें मयूरीकी तरह वेदत्रयी प्रसन्न होकर नृत्य करती है । अद्वितीय अखण्ड ब्रह्म आपकी सत्ता अद्वय एक आपका ही जप करते हैं, नाना नहीं एक आप ही अखण्ड रूप हैं [पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः भा० १०।१४।२३] ।।७५।।

अनुवाद—परब्रह्म रूप एक ही आनन्द है, मुक्तिमें स्फुरित हुए उसको ही वेद बताता है । त्रिलोकीका घूर्णित पाप भी मोक्ष लक्ष्मीसे नष्ट होकर आपके ही पास कल्याण प्राप्त करता है ।।७६।।

अनुवाद—मृत्युसे पर आपसे त्रयी भी डरती है, फिर तमसे उत्पन्न राक्षस व प्रकाशसे उत्पन्न मोक्ष कुछ नहीं उसको जानकर मृत्युको पार करता है, यही श्रुति प्रसन्नता देती है [भा० १०।१४।१७] ।।७७।।

अनुवाद—न कोई तप न कोई जप है उस पर तेजका आश्रय लेकर सायुज्य प्राप्त हो जाता है । घोर पापोंसे दूषित पापी भी आपकी कृपा दृष्टिसे धन्य होगये, आपकी सृष्टि दूसरी है ।।७८।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अहो पूतना सा जगद्भूतनाशा, व्यधात्कर्मजात्या विभो[1]यातुधानी ।
किशोरीभवन्तं भवन्तं प्रतार्यामृतं मातृकूटा ददे कालकूटैः ॥७९॥
स्मरन्सूक्ष्ममंशं जडीभूय भूमन्न वाचं च वाचंयमः कर्त्तुमीशे ।
भवन्तं भवन्तं पुरस्तादनन्तं कथं वीक्ष्य मूढा वयं वर्णयामः ॥८०॥
त्वया वञ्चनापञ्च पञ्चाननेन त्रिलोकीप्रपञ्चो विरिञ्चीकृतोऽयम् ।
समं वत्सपालैरभून्नैव वृन्दावने वत्सवृन्दावने सङ्गभागी ॥८१॥
न वैकुण्ठवाटी नवाम्भोजबन्धुर्नगोलोकलक्ष्मीर्न च क्षीरसिन्धुः ।
घनश्यामवृन्दाटवी पाटवी स्यात्तनुव्यूहभाजा त्वयाभाजि भो या ॥८२॥
त्वमेकोऽपि नानासि हेमेव भूमंस्तुलाकोटि कोटीरकेयूर काञ्चयः ।
वदन्त्येवमेके विरुन्धन्त्यनेके यतः स्याद्धतो भृत्यभर्त्रादिभावः ॥८३॥

अनुवाद—अहो संसारके प्राणियोंका नाश करनेवाली यातुधानी पूतनाने जातिके अनुसार कार्य किया । बालरूप आपकी छलमयी माता बनकर कालकूट विषसे छिपाकर दुग्ध दिया ॥७९॥

अनुवाद—हे भूमन् ! आपके सूक्ष्म अंशका स्मरण करके मितभाषी योगी भी जड़ होकर बोल नहीं सकते । अनन्त आपको सम्मुख देखकर हम मूढ़ क्या वर्णन कर सकते हैं ? ॥८०॥

अनुवाद—पञ्चभूतके द्वारा जगत् रूप वंचनाके पञ्चानन सिंह रूप आपने तीनों लोकोंका प्रपञ्च ब्रह्माके द्वारा विस्तृतकर दिया है, किन्तु वत्सपाल गोपोंके साथ वत्स वृन्दके अवन रक्षणमें वृन्दावनमें आप सङ्ग भागी नहीं हुए अर्थात् रक्षा नहीं कर सके ॥८१॥

अनुवाद—नवकमल सदृश सुन्दर वैकुण्ठका उद्यान गोलोककी शोभा तथा क्षीरसागर यह सब आपको सुन्दर नहीं प्रतीत हुई परन्तु हे घनश्याम यह वृन्दावन बड़ा रमणीय है जो नर शरीर धारण करके आप इसका सेवन कर रहे हैं ॥८२॥

अनुवाद—आप एक होते हुए भी अनेक हैं जैसे सोना एक होते हुए भी तुलकोटी, कोटीर, केयूर, कांची आदि भूषणोंके रूपमें अनेक होता है ऐसा लोग कहते हैं, कोई इसका विरोध भी करते हैं जिससे सेवक-स्वामीकी भावना नष्ट न हो सके ॥८३॥

---

(1) यातुधानी=राक्षसी ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पयोदर्पणानां प्रभेदेषु नाना
बलाद् बिम्बशाली यथा भानुमाली ।
प्रकृत्येककृत्ये जगत्येवमेको-
जगद्भासयन्भासि नानेव नूनम् ॥८४॥

तनूभूतमंशं दधद्योगभागी
भवत्सुप्रभावैर्भवानेव भावी ।
हुताशैकलेशं महाकाष्ठकूट-
क्रमाद्वह्निकूटो यथा कैटभारे ॥८५॥

न [1]शक्रादिदेवा न वा तीर्थ सेवा
न पीयूष भोगा न वा भूरियोगाः ।
समग्रैकबन्धुः समग्रैकवैरी
भवोद्दाम दावे भवानेव दावः ॥८६॥

ध्यायन्तु ध्यान धन्या धरणि धरतटे जाग्रतों ज्योतिरग्र्यं
निर्व्यग्रं ते समग्राः कमपि च पुरुषं यायजूका यजन्ताम् ।
नेदं नेदं च वेदा विदधतु बहुधास्माकमास्तां पुरस्ता
दुन्मीलन्नीलधारा धररुचिरुचिरः कोऽपि गोपीकिशोरः ॥८७॥

अनुवाद—जल दर्पणादिके भेदसे सूर्यकी तरह आपके अनेक प्रकारसे प्रतिबिम्ब हैं। प्रकृतिके एक कृत्य इस जगत्में आप अकेले इस जगत्को भासित करते हुए भासित हो रहे हैं ॥८४॥

अनुवाद—स्वल्प अंशको धारण करनेवाला योगी अपने आपमें तदाकार होकर प्रभावशाली हो जाता है, जिस प्रकार हे कैटभारे ! अग्निका एक स्फुलिंग महाकाष्ठके योगसे वह्नि समूह हो जाता है ॥८५॥

अनुवाद—न इन्द्रादि देव हैं, न तीर्थ सेवा, और न बहुतसे भोग, और न बहुत योग्य हैं, इस संसाररूपी उत्कट अग्नि पुञ्जमें सबके एक बन्धु और सबके बैरी बस आप ही हैं ॥८६॥

अनुवाद—ध्यानमें मग्न होकर योगी पर्वत, शिखरपर जागते हुए उस अग्र ज्योतिका ध्यान करें। व्यग्रता छोड़कर सब याज्ञिक किसी पुरुषका यज्ञ करें। वेद भी यह नहीं, यह नहीं, कहकर अनेक प्रकारसे हमारे सामने विधान करें, सब

---

(1) इन्द्र ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यागानां विप्रयोगः सुचिरमुदयतामास्तु योगप्रयोगो
हे भक्ते मातरुक्तेरविषय हृदयागोचरे त्वं प्रसीद ।
व्यक्तोचक्रे हि चक्री[1] तवमहिमचयं गोपिकाद्वारिबद्धो
नैकैरागत्य गोपैर्दधिहरणरुषा गर्जितैस्तर्जितोऽपि ।।८८।।
न न्यूनो नातिरिक्तस्तदवयवचयो वेषभूषादिकानां
तादृक्तावद्विधातुं प्रभुरपि यदभूः कोटिधा कैटभारे।
तन्मन्ये सर्वभावं रस सरस गुणासीम सौभाग्यवृन्द-
स्वच्छन्दानन्द वृन्दावनमनुभवितुं नो विधेर्मोहनाय ।।८९।।
दाम्ना बद्धोऽपि मध्ये प्रकुपितजननी भीतिरुद्धोन्तरेऽपि
प्रोद्यद् भक्तर्षि हर्षावह धरणिरुहोद्धार लीलावलीढः ।
क्षिप्त्वा क्षिप्त्वाक्षि दिक्षु क्वणितकटितटीक्षुद्रघण्टाघटाद्य-
स्तद्वाचंद्रागकार्षीस्त्वमिव किमु विभोकोऽपि भक्तानुकम्पी ।।९०

कुछ रहें, परन्तु निकलती हुई नीलधारोंको धारण करनेवाले मेघको शोभावाला कोई गोपीका किशोर हमारे सामने रहता है ।।८७।।

अनुवाद—यज्ञोंका विप्रयोग (विशेषेण प्रयोग) अथवा वियोग बहुत समय तक होता रहे । योगोंका प्रयोग भी चलता रहे । हे भक्ति माता ! तुम मुझपर प्रसन्न हो जाओ तुमको वाणीसे नहीं कहा जा सकता, हृदयमें भी तुम्हारा प्रत्यक्ष नहीं होता, गोपिकाओंके द्वारपर बन्धनको प्राप्त करनेवाले इस चक्रधारी कृष्णने तुम्हारी महिमा प्रत्यक्ष करदी है । अनेकों गोपोंने दधि चुरानेसे क्रोधमें भरकर गरजते हुए इसे डराया भी है ।।८८।।

अनुवाद—वेष भूषादिके द्वारा वत्स और गोप सब, न कम न अधिक जैसे गोप बछड़े थे वैसे ही आप बन गये हैं कैटभारे ! आप सबको वैसा ही और उतना ही कर सकते थे पर स्वयं अनेक रूपमें बने, मैं मानता हूं कि रसयुक्त गुणोंमें असीम सौभाग्य तथा स्वच्छन्द आनन्दवाले वृन्दावनमें रमण करनेके लिए ही आपने यह किया, विधिको मोहमें डालनेको नहीं ।।८९।।

अनुवाद–आप रस्सीसे बँधे कुपित माताके डरसे हृदयमें डरते हुए भक्त व ऋषियोंको प्रसन्न करते हुए यमलार्जुनके उद्धारकी लीलासे मग्न दिशाओंमें

---

(1) कृष्णः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एतादृक्कोटिकोटि प्रकटितनु तपः पूरिताशेष कामा
मेघश्यामाभिरामा गुरुगरिम चतुर्बाहवः पूर्णबोधाः ।
विद्यन्तेऽद्यापि तेऽमी मम हृदि करुणापाङ्गभङ्गीतरङ्गैः
सिञ्चन्तोदः प्रपञ्चं मधुमथनविधिः कोऽयमेको वराकः ।।९१।।
सृष्टावेकोऽस्मि स्त्रष्टा विरतिरिति मदस्यास्तुमोहो महीया-
नप्यास्तामप्सुरस्तात्रिजगति कुयशः किन्तु तेनैष धन्यः ।
यत्ते प्रत्येकमेकं निजमपि निकटेऽपश्यदास्यैश्चतुर्भिः
स्तोत्रं कुर्वाणमुर्वी[1] विलुठित मुकुटं कंटभारे स्वयम्भू ।।९२।।
पानायं पाणिपात्रः क्वचिदपि तृषया निष्पिवन् क्षुद्भिरश्न-
न्पत्रं कुत्रापि दैवाच्युतममृतमिव क्षीणकौपीनवासाः ।
कर्त्तव्यैषानुकम्पा मधुमथन - दृशोर्वाहयन्बाष्पधारां
गायन्नारायणोऽसौ व्यपनयतु वयः क्वापि कुञ्जेविरञ्चिः ।।९३।।

दृष्टि डाल·डालकर कटिभागमें बजती हुई छोटी घण्टियोंसे सुन्दर लगनेवाले आपके समान किसीने भी हे विभो! भक्तपर कृपा करके ऐसी वाणी बोली है ।।९०

अनुवाद—ऐसे करोड़ों भक्तोंने अल्पतपसे ही अपनी इच्छाओंको पूर्ण किया है मेघकी तरह श्याम आभावाले गम्भीर गौरव वाली चार भुजाओंवाले तथा पूर्ण बोधयुक्त करुणा जनक अपांग भागकी भङ्गिमासे इस प्रपंचको सोंचते हुए हे मधु-मथन! ऐसे अनेक हैं जो मेरे हृदयमें हैं, मैं जानता हूँ इस विचारे एक ब्रह्माकी क्या बात है ।।९१।।

अनुवाद—सृष्टिमें एक मैं ही स्त्रष्टा ब्रह्मा हूँ, मेरे मदकी समाप्ति हो जाय मोह बढ़गया है, तीनों लोकोंमें अपयश होगा,(वह रहे) मैं इससे प्रसन्न हूं जो यह पृथ्वीपर मुकुटोंके लोटते हुए चारों मुखोंसे स्तुति करते हुए यह ब्रह्मा इन सबको देख रहा है यह आपकी महिमा है ।।९२।।

अनुवाद—प्यास लगनेपर हाथोंसे ही कहीं जल पीता हुआ तथा भूँख लगनेपर दैवसे गिरे पत्तोंको अमृतकी तरह खाता हुआ केवल क्षीण कोपीन धारण किये आँखोंसे वाष्पधारा बहाते हुए नारायण गान करते हुए यह ब्रह्मा किसी कुञ्जमें अपनी अवस्था व्यतीत करदे, बस ऐसी कृपा कीजिये ।।९३।।

(1 पृथ्वी ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

चतुर्वेदाभ्यासव्यथित चतुरास्यैरलमलं
तदेतच्चैतन्यैरुदयतु तवैवोरुजडिमा ।
विधिर्यैर्मञ्जीर त्वमिव हरिसंचारसमये
पदाम्भोजालक्ष्मीर्न शुभनुतिझङ्कारमकरोत् ॥९४॥

पदाम्भोजं पायात्परमपददायादसुविदां
हृदां हार्दानीहं बलवदनुरागं वहदिव ।
अधः शोणं शोचिर्दधदनल रोचिर्जय चिरं
घनस्निग्धच्छाया शयितमिव सायास मिहिरम् ॥९५॥

उपासे कौशेयं वसनमति पीत द्युतिभरैः
परीतं त्वत्प्रीति प्रसरदनुरागैरिव बहिः ।
त्रिलोकीमाच्छाद्य त्रिगुणपटमत्साद्य जयत-
स्तव स्वच्छं स्वेच्छामयवपुरपिच्छादयति यत् ॥९६॥

अनुवाद—चारों वेदोंके अभ्याससे दुःखी चार मुखोंकी आवश्यकता अब नहीं, इन चैतन्य मुखोंसे जड़ता उत्पन्न हुई है वह तुम्हारे पास ही रहे। हे मंजीर जिस हरिके भ्रमण कालमें तुम झङ्कार करते हो उसी प्रकार यह ब्रह्मा शुभ स्तुति पाठकी झङ्कार करता रहे, चरणकमल रूप अपने कमल निवासपर विराजमान लक्ष्मी नहीं बल्कि ब्रह्मा स्तुतिको झङ्कार करता रहे, यही इच्छा है ॥९३॥

अनुवाद—भगवान्‌का चरणकमल हमारी रक्षा करे, जो अधिकारीके परम पदके भाग अथवा प्राप्तव्य अंश पहचाननेवाले हृदयकी अन्य विषयक अनिच्छा तथा उत्कट अनुराग प्रेमको धारण करता है उस चरणका तलभाग लाल लाल अग्निकी दीप्तिको धारण किये हुएकी तरह घनी चिकनी छायामें सोते हुए, आराम करते हुये, थके हुए सूर्यको तरह है, मानों सूर्य थककर घनी छायामें सो रहा हो ॥९५॥

अनुवाद—हे भगवान् ! आपके प्रेमसे बाहर फैलते हुए अनुरागकी तरह अत्यन्त पीली कान्तिके भारसे युक्त रेशमी वस्त्रकी मैं उपासना करता हूँ। जो त्रिलोकीको ढके हुए सत्व, रजः, तमोगुण पटको हटाकर विजय करनेवाले आपके स्वच्छ स्वेच्छामय शरीरको भी ढक रहा है ॥९६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अशून्ये वा सेवे समुदयति देवेश रसना
सरागैरप्येतैः कठिनिमसमेतैरपि भृशम् ।
अभूदेभी रत्नैर्जलधिरपि रत्नाकर इति
स्वपूर्वेषां स्वेषां महदनुगृहीतो हि यशसे ।।९७।।

नमस्तुभ्यं क्षुभ्यत्तरुण तरणे कौस्तुभमणे
[1]++ स्ति प्राशस्त्यं तवहि हृदि हार्दो हरिरधात् ।
सदा त्वं सागर्भ्यान्मिलितमिव शुभ्रांशुमदधः
स्मितज्योत्स्नालास्यं प्रतिफलितमास्यं मुरभिदः ।।९८।।

गुणामुक्ते मुक्तावलि वलिनि युक्तासि हृदये
दयेद्धः (?) स्नाहार्दे निभृतमभितः कैटभरिपोः[2] ।
नमस्ते व्यस्तारि स्वयमशमथा धीनपरिधी-
भवव्योमोद्दाम द्युमणि तुलना कौस्तुभ मणे ।।९९।।

अनुवाद—हे देवेश ! मैं इस कटि भूषण रसनाकी प्रत्यक्ष ही स्तुति करता हूं यह सर्व सम्मुख प्रदीप्त हो रही है, इसमें कठिनिमा द्रढिमासे युक्त लगे हुये रत्नोंसे ही समुद्र रत्नाकर कहलाता है और अपनेसे पूर्व अपने ही जनों द्वारा इसी कारण यशस्वी बना है ।।९७।।

अनुवाद—अपनी कान्तिसे तरुण सूर्यको क्षुभित करनेवाले हे कौस्तुभ-मणि ! मैं तुमको नमस्कार करता हूँ । हरिने अपने हृदयमें तुम्हारी शोभाको धारणकर रक्खा है । तुम और चन्द्रमा दोनों समुद्रसे उत्पन्न हुए हो, इसलिये चन्द्रमाकी किरणोंका सौन्दर्य भी तुम्हारे साथ है, मुररिपु कृष्णका मुस्काना चन्द्रमाकी चांदनीसे मिलकर लास्यकी शोभाकर देता है ।।९८।।

अनुवाद—हे गुणोंसे अमुक्त ! अर्थात् युक्त मुक्तावलि तू कृष्णके बलयूक्त तथा स्नेहसे आर्द्र हृदयपर ठीक निवास करती है, कृष्ण तेरे ऊपर दया करें । व्यस्त दुःखी शत्रुके अशमथ अर्थात् अशान्त घिरे हुए आकाशमें प्रदीप्त सूर्यकी तुलना करनेवाली कौस्तुभमणिसे तू युक्त है, तेरी बड़ी शोभा है मैं तेरी स्तुति करता हूँ ।।९९।।

---

(1) चकास्ति ।   (2) कृष्णस्य ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

कदा वा कीदृग्वा कियदहह हृद्वागविषयं
शिखण्डी प्राचण्ड्यं तपसि किमखण्डं व्यतनुत।
वदामः किं कस्मै त्रिभुवन गुरोर्दैवन शिरो-
मणेश्चूडादण्डः शिखरित शिखण्डो विजयते ॥१००॥
श्रुतौ लग्ना त्वं च प्रभवितुरयं च स्फुटमयं
भवाशङ्कापङ्कावलिवलन रङ्कायित मतिः।
मुखेन्दुस्वच्छन्द द्युतिलहरिवंशीरव सुधा
तरङ्गैरुत्तुङ्गैः स्नपित वपुरुत्तंस वलसे ॥१०१॥
नमस्ते कस्तूरि त्रिदशतिलकेनासि तिलकी-
कृता त्वं सौरभ्यच्छविनिवह साग्येऽपि वपुषि।
अतः स्थाने गोरोचन कनकगौरोदितकणा-
नुरागैः सन्नद्धाधिकललितमध्या विजयसे ॥१०२॥
ददे केयूराभ्यां मुरहर जडाभ्यामपि भवा
न्भुजस्तम्भालम्बं शिशुपशुकदम्बं मृगयसे।

अनुवाद—जहाँपर हृदय और वाणी नहीं पहुँच पाती ऐसे शिखण्डी मोरने कब और कैसी कितनी अखण्ड और उग्र तपस्याकी है यह हम किससे क्या कहें। तीनों लोकोंके गुरु देवताओंके शिरोमणि श्रीकृष्णका चूड़ादण्ड अर्थात् चोटी जिस मोरकी पूँछसे शिखरित है, शिखरकी तरह मोरकी पूँछ चोटीपर शोभित है ॥१००॥

अनुवाद—तुम प्रभुके कानमें लगी हो और यह जन प्रत्यक्ष ही संसारके दुःख समूहसे पीड़ित बुद्धिवाला है, मुखरूपी चन्द्रमाकी स्वच्छन्द तथा शोभित लहरीसे युक्त वंशीकी अमृत सदृश ऊँची तरङ्गोंसे अपने शरीर सजानेवाले भूषण-के समान शोभित हो रही हो। यह स्तुति वंशीकी है, वंशी अधरपर रक्खी हुई कान तक पहुँच सकती है ॥१०१॥

अनुवाद—हे कस्तूरी मैं तुझे नमस्कार करता हूं, देवताओंके श्रेष्ठ कृष्णने तुझे अपना तिलक बनाया है, वे कस्तूरीका तिलक लगाते हैं, गन्धयुक्त शोभा समूहसे समान अपने शरीरमें तेरा तिलक शोभा देता है, गोरोचन तथा सुवर्णके समान गौर और सुन्दर अनुरागसे मध्यभाग अधिक शोभित तथा सुन्दर बन जाता है ॥१०२॥

अनुवाद—हे मुरहर कृष्ण! तुम जड़ अपने केयूरके लिये अपने भुज-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मनो मे सोत्साहं परिशमितदाहं समुदभू
त्समोदञ्चदृष्टिः प्रभुरखिलसृष्टिष्वपि यतः ॥१०३॥

सरःस्थं सिन्धुस्थं सुखयति हि सूरः सरसिजं
पुरस्थं पृष्ठस्थं कुमुदममृतांशुर्मदयते ।
अदूरस्थं दूरस्थितमपि समं पश्यति यमी
भवानेव स्वामी जगदवति[1] वामीयतु न तु ॥१०४॥

पयोजं संभूय स्वजनकमतिक्रामति पयः
पयस्त्वेतन्नैव व्यथयतिपरं वर्द्धयति च ।
पिता भर्त्ता बन्धुः सकलगुणसिन्धुस्त्रिजगतां
भवानव्याद् भूमन्सगुणमगुणं वा कमलजम् ॥१०५॥

कुम्भीरग्रस्त कुम्भीश्वरवचसि हरे नाथ रक्षेति वृत्ते
निर्वर्त्मा वर्त्मभेदग्रहलवमटत स्त्रायतां नस्स्वरातेः ।

रूप स्तम्भका सहारा देते हो और बछड़े तथा ग्वाल-बालको ढूँढ रहे हो मेरा मन उत्साहसे भरगया है, उसकी जलन शान्त होगई है, सम्पूर्ण सृष्टिमें तुम अपनी दृष्टिको प्रसारित करते हो इससे मेरे मनको उत्साह प्राप्त हुआ है ॥१०३॥

अनुवाद—सूर्य तालाबमें और सिन्धुमें रहनेवाले सब कमलोंको सुख देता है और चन्द्रमा आगे तथा पीछे रहनेवाले सभी कुमुदोंको मत्त बना देता है। दूर तथा समीप सब जगह रहनेवालेको यमी योगी एक साथ बराबर देख लेता है, आप स्वामी हैं संसारको रक्षा करते हैं. किसीके प्रतिकूल नहीं हैं ॥१०४॥

अनुवाद—जल कमलको उत्पन्न करता है तथा अपने पिता अग्निका उल्लंघन करता है अर्थात् शान्त करता है, बुझा देता है परन्तु जल कमलको दुःख नहीं देता किन्तु बढ़ाता है। परन्तु आप तीनों जगत्के पिता भर्त्ता तथा भाई और सम्पूर्ण गुणोंके समुद्र है, हे भूमन् ! आप कमलसे उत्पन्न ब्रह्माकी चाहे वह गुणवान् है या गुणहीन है, रक्षा ही करें ॥१०५॥

अनुवाद—ग्राहसे ग्रस्त गजेन्द्रने जिस समय यह कहकर पुकारा कि हे नाथ ! हे हरे ! मेरी रक्षा करो। मार्ग भेदसे मुझको खींचते हुए शत्रुसे बचाओ, आपके सब मार्ग हैं प्रत्येकसे आकते हो यह शब्द सुनते हो गरुडकी ओर आपने

---

(1) रक्षयति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पक्षीन्द्रे नाक्षिपातः क्षणमजनि यतस्तत्क्षणोपस्थितायां
नो लक्ष्म्यां पक्षपातः पतति न वसने पूर्णबोधस्य बोधः ।।१०६।।
चूङ्कारैश्छोटिकाभिः करतलकलितैर्नर्तयन् कोऽपि तालै-
रत्र त्वां दारु पुत्रीमिव नववयसि प्रेरयन्कोऽपि गोपः ।
आनिन्ये मृद्भिरद्भिः सुलभवनभवैः पल्लवैर्वश्यभावा-
नाः किं कुर्मो वयं तु भ्रमविधुरधियोनेति नेति भ्रमामः ।।१०७।।
एतद् विद्यानवद्या श्रुतिरधिकरणाधीनसिद्धौ च सृष्टौ
दृष्ट्वैनं मुग्धमिष्टा धरणिरुदनिधेर्लीलयैवोदधारि ।
निर्व्यूढं तत्तु सर्वं परमिदमधुना पादयो प्रार्थयेत्वां
हे विश्वोद्धार धीरोद्धर विधुरमितो मोह पाथोधिमध्यात् ।।१०८
इतिस्तुत्वा नत्वा जनुरपि च मत्वा सफलितं
विरेमे वाग्बद्धाञ्जलिपुटकमग्रे प्रभवितुः ।

दृष्टि नहीं डाली उस समय उपस्थित हुई न लक्ष्मीपर न गिरते हुए वस्त्रपर आपकी दृष्टि गई, पूर्ण बोधवाले आपको सब ज्ञान है [कविने मुरली, मयूरपङ्ख, कौस्तुभमणि आदि सभी वस्तुओंकी स्तुति प्रस्तुतकी है। ऐसा वणन भागवत-पुराणमें भी नहीं है] ।।१०६।

अनुवाद—कोई गोप अपने करतलसे चुटकी बजाकर चूँ-चू करते हुए तालसे नचाता है और कोई नई उमरमें आपको कठपुतलोकी तरह प्रेरणा करके नचाता है, और कोई मिट्टीसे जलसे तथा वनमें हानेवाले पत्तोंसे वशमें कर लेता है, आह हम क्या करें हम तो नेति-नेति इस भ्रममें पड़कर ही चक्कर काटते रहे ।।१०७।

अनुवाद—श्रुति इस श्रेष्ठ विद्याको बताती है कि सृष्टि अधिकरणके आधीन है बिना स्थानके कैसे हो, इस प्रकार इस मुग्ध-भावको देखकर अपनी इष्ट पृथ्वीको खेलमें ही आप समुद्रसे निकाल लाए, और सर्व कार्य पूर्णकर दिया परन्तु इस समय मैं आपके चरणोंमें प्रार्थना करता हूँ कि हे विश्वके और धीर जनके उद्धार करनेवाले इस दुःखीको भी मोह सागरसे पार करदो ।।१०८।।

अनुवाद—इस प्रकार स्तुति करके और प्रणाम करके और अपने जन्म-को सफल मानकर अञ्जलि पुट बाँधकर प्रभुके आगे ब्रह्मा मौन होगया, और

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रभुं दृष्ट्वा तुष्टं तदनु मुदितोऽष्टा[1]पदगिरौ
स्वयम्भूः स्वं धामाभजत हरिनामादृतमुखः ॥१०६॥
इति श्रीमन्मित्रमिश्रकृतावानन्दकन्दचम्पूः
काव्ये पञ्चमोऽयमुल्लासः ॥ ५ ॥

प्रभुको प्रसन्न जानकर फिर स्वयं भी प्रसन्न होकर मुखसे हरिनामका उच्चारण करते हुए सुमेरु पर्वतपर अपने स्थानको चले गये ॥१०६॥

इति श्रीपण्डित डा० वासुदेवकृष्णचतुर्वेद शास्त्रि विरचिते श्री "श्रीवरानन्दिनी" भाषा टीका सहिते आनन्दकन्दचम्पूकाव्ये ब्रह्मस्तुति वर्णनं नाम पञ्चम उल्लासः ॥ ५ ॥

---

(1) अष्टापदगिरौ सुवर्णपर्वते मेरावित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ षष्ठ उल्लासः

गोपबालैः सहभोजनवर्णनम्

हरिरपि परिवृत्य पुरोवर्त्तमानानेव तान् वत्सानादाय नादयन्मधुरमुरलीमागच्छन्नेव लीलयानुशीलयामास पुरेव बहिरन्त वत्सपालपरिवारमपि पुलिन परिसर एव यमुनायाः ॥ १ ॥

अथ हरिमवलोक्य वत्सपालाः प्राहुरागतोऽयं हरिरागतोऽयं हरिरहो, अरे, इहोप स्थित, इहोपस्थितोऽसि, नचिरेण कालेन अस्माभिरेकोऽपि नास्वादितः कवलः, साधुसाधु तदिदमवधीयतां सकलमविकलमेव द्राक्षाफलामिक्षादिकमस्ति, साक्षादेव किमाख्यामि सहोप भोक्ष्यामि, बुभुक्षातिक्षामो भवानिव मद्विधोऽप्येषः ॥ २ ॥

विधाय विधिनार्धित क्षुधित वत्सपालैः समं
स भोजनमधो दधे भवनमेव गन्तुं मनः ।
विषाणमुरली रवैर्बहल वत्स कोलाहलै-
र्जगौ जय जय ध्वनि सपदि भूर्भुवः स्वस्त्रयी ॥३॥

गोप-बालकोंके साथ भोजन

अनुवाद—हरिने घूमकर आगे आते हुए उन बछड़ोंको लेकर, मधुर वंशी बजाते हुए पहलेकी तरह बाहर, सब गोप समूहको यमुनाके रेतीले मैदानमें आते हुए सबको सन्तुष्ट किया ॥ १ ॥

अनुवाद—तब सब ग्वाल-बालोंने हरिको देखकर कहा कि अरे, हरि आगये, अरे ! हरि तो यहीं उपस्थित हैं, अभी आये हैं । हमने अभी एक भी ग्रास नहीं खाया है, यह देखो, द्राक्षाफल आमिक्षादि सब वैसाका वैसा ही रक्खा है, सामने ही क्या कहूँ साथ ही खायेंगे, आपकी तरह ये सब भी भूखसे बहुत दुःखी हैं ॥ २ ॥

अनुवाद - दैवसे दुःखी और भूँखे ग्वाल-बालोंके साथ भोजन करके भगवान्ने अपने घर जानेका विचार किया । श्रङ्ग मुरलीके शब्दसे तथा बछड़ोंके बहुतसे कोलाहलके साथ भूर्भुवः स्वः तीनों लोक जय जयकारकी ध्वनि करने लगे ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रातः प्रातः प्रतिदिनमपि प्रीतचेतावसानः
पीतं वासो मुखरमुरली चेतिताहूत सार्थः ।
यातावातैर्भवनवनयोरङ्गभङ्गीविनोदै—
श्चेतोमोदैः पिहितमकरोद् गोपगोपी गणस्य ।। ४ ।।

पार्श्वे पार्श्वे शिखरशिखरे कन्दरे कन्दरेऽद्रे—
स्तीरे तीरे [1]तपनदुहितुर्निर्झरे निर्झरे च ।
वत्सान्धेनूरपि धवलितो धूलिभिर्धीर धीरं
धावं धावं व्यहरदभितो वारयंश्चारयंश्च ।। ५ ।।

कृष्णस्य नाना क्रीडावर्णनम्

पौगण्डैकपदं शिखण्डिनिमुदं बिभ्रच्छिखण्डं दध-
च्चूडाग्रे तदखण्ड ताण्डवकला संजात कौतूहलः ।
नृत्यं क्वापि कदापि तैःसह वलन्मंजीर शिञ्जाकरी-
घञ्चत्किङ्किणि कारणत्कृति चमत्कारैर्बभौ चक्रवत् ।। ६ ।।

अनुवाद—सवेरे-सवेरे प्रतिदिन प्रसन्न चित्त होकर पीले वस्त्र पहिने मुरली बजाते साथियोंको सबको बुलाकर और साथमें लेकर भङ्गोंकी भङ्गिमाके साथ विनोद करते हुए कभी घर और कभी जाते आते सब ग्वाल-बालोंके चित्त-को प्रसन्नतासे भर देते थे ।। ४ ।।

अनुवाद—पास-पासमें शिखर-शिखरपर, पर्वतको कन्दरा-कन्दरापर, यमुनाके किनारे-किनारे, झरने-झरनेपर धूलसे सने हुए बछड़ोंको और गौओंको धीरे-धीरे चराते हुए और कभी बचाते हुए सब ओर विहार करते थे ।। ५ ।।

कृष्णकी विविध क्रीड़ाओंका वर्णन

अनुवाद—एक पैर उठाये मयूरोंको प्रसन्न करते मयूर पिच्छको चोटो-के ऊपर धारण करते हुए, अखण्ड ताण्डव नृत्यकी कलाओंसे सबको कौतूहल उत्पन्न करत कभी गोपोंके साथ नाचते तथा बजते हुए मञ्जीरके शब्दसे कटि-भागमें शोभित हुई किंकिणीके रणत्कारके चमत्कारोंसे चक्रकी तरह घूमते हुए शोभित होते थे ।। ६ ।।

---

(1) यमुनायाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पाणिभ्यामवरुद्ध्य मध्यममवनेः पादौ च पक्षाविव
व्यातत्य भ्रमिभाजिविभ्रमवशाद् भ्राम्यच्छिखण्डीयति ।
ग्रीवा चिक्कण चारुचा[1]ङ्गिमलसच्चूडं नटच्चन्द्रकं
धावन्तिस्म तमेव बर्हिवनिताश्चित्रायितं बर्हिभिः ॥ ७ ॥

उन्मीलत्कलकौशलैर्मदकलाः शिष्यीकृताः कोकिलाः
गीताम्भोधिजलभ्रमाभगमकारम्भैर्जिताः षट्पदाः ।
आपूर्य्याधर पल्लवे मुरलिकामुद्गायता नृत्यता
ग्रावाणोऽपि जलीकृता जलमपि ग्रावीकृतं सर्वतः ॥ ८ ॥

गीतं [1]कीरमयूर कोकिलगणैरेणैरहो वीक्षितं
गुञ्जद्भृङ्गमृदङ्ग गुङ्गमरवैरारम्भि गम्भीरता ।
सन्तुष्टैरव गन्ध पुष्ट कुसुमं वृष्टं च भूमीरुहैः
प्रेष्ठे महामहोत्सवविधौ दैत्यद्विषः कानने ॥ ९ ॥

अनुवाद--दोनों हाथोंसे पृथ्वीके मध्यभागको पकड़कर तथा पैरोंको पङ्खोंकी तरह पीछे फैलाकर घूमनेके कारण नाचते हुए मोरकी तरह प्रतीत होते हैं, ग्रीवाकी चिकनी सुन्दर शाभासे चोटीकी कान्ति बढ़ाते हुए, चोटीपर चंदोवे जैसे बनाये मोरके जैसा नाच दिखाते दौड़ते थे और चित्रित बने हुए उनके पीछे मोरोंके साथ मोरनी भी दौड़ रही हैं ॥ ७ ॥

अनुवाद—उन्मत्त बना देनेवाले सुन्दर कौशलसे मदवाली कोयलें मानों उनकी शिष्य बन गईं, समुद्र जलके घूमनेकी तरह गुंकार जैसे गानके शब्द से मानों भ्रमरोंको जीत लिया, अधर पल्लवपर वंशीको रखकर गायन करते तथा नृत्य करते कृष्णने मानों पत्थरोंको पिघलाकर पानी बना दिया और पानी भी जमकर स्तब्ध होकर पत्थर बनगया ॥ ८ ॥

अनुवाद–तोता, मोर, कोयल तथा हिरनोंने गानेको देखा सुना गूँजते हुए भौंरे मृदङ्गकी गुङ्कारके समान शब्दसे गंभीरता प्रकट करते थे, सन्तुष्ट होकर वृक्षोंने भीनी-भीनी गन्धसे युक्त पुष्पोंकी वर्षाकी, अत्यन्त प्रिय कृष्णके उस वनमें गोष्ठके महा उत्सवके समयपर बड़ा आनन्द था ॥ ९ ॥

---

(1) "चाङ्गस्तु शोभने दक्षे" इति मेदिनी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कच्छानुस्फुरदच्छ निर्झर शिलातल्पे शयानं भजन्
श्रान्ति भ्रान्तिभरेण मन्द पवनो दाक्षिण्यभागी बभौ ।
तादृक्कोकिलकाकली – तदनिलप्रारब्धनिद्राविधे-
र्लक्ष्मीलालितपादपल्लवमहो गोपेन संवाह्यते ॥१०॥

तालवन वर्णनम्

वनोपवन दुर्वनीगिरिगभीरगर्वावनी
निरूढनवकन्दलीग्रहिलवत्समुत्साहयन् ।
भ्रमान्विविधविभ्रमैरथ सहोपलभेऽर्भकैः
समीरण समाहृतं सुरभिताल गन्धं हरिः ॥११॥

अयि वद कोऽयमकस्मादस्मद्विधानामपि चेतांसि विस्मापयन् मधुरमकरन्दमन्दिरा मन्दरारविन्दमान्दोलयन्नपि मैलिन्दमतिमन्थरयन्नपि निजगुरुभारैरिव गन्धवाहमुवाह सुरभितवनकन्दरो मनोहरो गन्धः, इति वचनमभिनन्द्य नन्दनन्दन श्रीदाम सुबलमुखाः सुखावहाः सखायः सकलमविकलमेव निवेदयाञ्चक्रिरे गोपाः ॥१२॥

अनुवाद—तटपर बहते हुए स्वच्छ झरनेके जलयुक्त शिलाकी शय्यापर शयन करते हुए कृष्णको थका हुआ-सा जानकर मन्द-मन्द पवन दक्षिण दिशासे आकर सेवा कर रहा था। ऐसी कोयलकी कूक तथा शीतल मन्द सुगन्ध वायुसे कुछ निद्रावश हुए कृष्णके, श्रीलक्ष्मी द्वारा लालित चरणोंको गोप दबारहे थे ॥१०

ताल-वर्णन

अनुवाद—वन उपवन, दुर्वनी, पर्वतीय गम्भीर भूमिमें उत्पन्न नव कदली कलिकाके उत्सुक बछड़ोंको उत्साह देते हुए तरह-तरहके खेल करनेवाले ग्वाल-बालोंके साथ घूमते हुए कृष्णने पवनके द्वारा आई सुगन्धित ताल वृक्षोंकी गन्धको प्राप्त किया। ११॥

अनुवाद—अरे ! कहो, यह कहाँसे अकस्मात् ही हम जैसेके चित्तको भी विस्मित करती हुई, मधुर मकरन्द उत्पन्न करनेवाले कमलोंको भुला देनेवाली तथा भ्रमर समूहको आन्दोलित करती हुई, अपने गुरु भारसे वायुको भी अत्यन्त मन्द गतिवाली करती हुई, मनोहर गंध कहाँसे आरही है ? इस वचनका अभिनन्दन करते हुये नन्दनन्दन श्रीकृष्णके श्रीदाम, सुबलादि सुख देनेवाले मित्र-गोप सब अविकल रूप आदि अन्तसे निवेदन करने लगे ॥१२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अहो अवधीयतामव धीयतामस्माभिः। आवेदनीयं स्वयमेव बालावनीरुहो महासहायीकृत गन्धद्वारेव दुरात्म दनुज मदनानुभाव भगवत्पदारविन्देषु निवेदयति स्म धेनुकाभिधेय दनुजनिधन महोत्सवारम्भम्। व्रजकुल शरण समीप एव देवता मुनि मनुजमनोरथातिरूढं गूढममृतमिव सुपरिणतफलजालमावहन्ति प्रचुरतरताल[1] वनानि विद्यन्ते। भिद्यन्ते खलु यत्र त्रिभुवननिधन धुरंधरदुर्धराचार धेनुकासुर समबलबहल बन्धुपरम्पराणामारा[2]वैर्निर्घातघोषैरिवनिखिल हृदयानि दूरतोऽपि दुर्वारैः ॥१३॥

तथाहि

निद्रां विद्रावयन्ति स्फुटममरभुवः कुर्वते दिग्विभागं
प्रोद्भेदं भूरिखेदं श्रवणबहुतया भोगिभर्त्तुर्दिशन्ति।
गर्जत्पर्जन्य पर्याकुलितमिव महीभामुरद्भावयन्ति
द्रागदृप्यद्रासभानां ध्वन दशनिमदोद्घाटिनोघोरघोषाः ॥१४॥

अनुवाद—अहो यह सब हमसे सुनिये, इस आवेदन करने योग्य वृत्तको स्वयम् बालवृक्ष मानों इस कृत्य में सहायक गन्धके द्वारा, उस दुष्टात्मा दनुजके मदयुक्त भावको जाननेवाले आपके चरणकमलोंमें, धेनुक नामक दैत्यके निधनके महोत्सवारम्भका निवेदनकर रहे हैं। व्रजकुलको शरण देनेवाले आपके पासही देवता-मुनि और मनुष्योंका मनोरथ भी जहाँ नहीं जा सकता, ऐसे मनसे अगम्य-गूढ अमृतकी तरह पके हुए फल समूहको धारण करनेवाले ताल-वृक्षोंके वन हैं। तीनों लोकोंके नाश करने योग्य, बल धारण करनेवाला, दुष्ट आचारवाला ऐसे धेनुकासुरके समान बलवाले, बहुतसे उसके बन्धुओंके नहीं रोकने योग्य वज्र-घोष-के समान तीव्र शब्दके दूरसे ही सुननेसे सबके हृदय फट जाते हैं [इतोऽविदूरे सुमहद् वनं तालालिसंकुलम्" भा० १०।१५।२१] ॥१३॥

अनुवाद—जैसाकि उनके तीव्र शब्द घोष देवताओंकी निद्रा नष्टकर देते हैं, दिशाओंमें गुञ्जारके द्वारा फटना जैसा उत्पन्नकर देते हैं, शेषनागके बहुत कान होनेके कारण बहुत दुःख उत्पन्न करते हैं। गरजते हुए मेघके जैसे शब्दसे सब पृथ्वीपर बड़ा उत्पात-सा उत्पन्नकर देते हैं। अभिमानी रासभ गधों-

---

(1) तालवन प्रवेश कथा भा० स्कं० १५ अध्याये।
(2) शब्दैः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ तेषामाकर्ण्य वर्णितानि कर्णयोरवगाह्यासत्त्व भूयाँरावैरिव-[1]रासभानामुत्थापितौ तान्यपि च द्रष्टुकामौ चेलतुरभिरामो घन-श्यामो दामोदरोऽपि श्रीदामादिभिरभिवेष्टितौ परितः । हरिर-वलोक्य तानेक्यभावापन्नानासन्नानेव विषणानिव मालिन्यातिशय सम्पन्नाननापन्नानतुलतरताल तरून्नाम, तमाह बलरामम् अहो अवधी-यतामवधीयताम् ।।१५।।

मूलादामौलिनीलावयव सुवलितः किञ्चिदूर्ध्वाभिवञ्च-
त्पत्रालीचित्रमूर्धा समुदयमयते तालभूमीरुहो न ।
त्वं धर्त्तानन्तभर्त्ता धरणिरितिदधे सावधाना धुनानं
ध्वान्तारेर्धाम धन्या धवलमणिमयाखण्डदण्डात[2]पत्रम् ।।१६।।
उर्वी दूर्वाद्य पूर्वासित रुचिरुचिरा त्वामनन्तेऽत्यनन्तं
दृष्ट्वासौ स्पष्टबद्धाञ्जलिपुट फलका कोटि कोटी बभूव ।

का आकार धारण करनेवाले इन दैत्योंके ध्वनित होते हुए वज्रके समान बढ़ते हुये ये इनके भयङ्कर शब्दघोष बड़ा उत्पात करते हैं ।।१४।।

अनुवाद—इसके बाद उनके इस वर्णनको सुनकर रासभोंके अनिष्ट उग्र शब्दसे कानोंमें खिचे हुएकी तरह रासभोंको तथा उनकी वर्णनानुकूल क्रियाओं को देखनेकी इच्छासे उठाये हुए घनके समान श्याम, श्रीकृष्ण और बलराम, श्रीदामादि अपने सखाओंसे युक्त होकर चले । श्रीकृष्णने समीपमें ही दुःखी अथवा डरकर मानों सब एक जगह इकट्ठे हुएकी तरह अति मलीन जैसे रक्षासे शून्य अतुलतर ताल वृक्षोंको देखकर बलरामसे कहा—अहो, देखो देखो सावधान सावधान ।।१५।।

अनुवाद—मूलसे शिखर तक नीले-नीले अवयवोंसे शोभित, कुछ ऊपर सब ओर चमकती हुई पत्रावलीसे चित्रित मस्तकवाले यह तालवृक्ष उदयको प्राप्त नहीं हो रहे हैं । आप धारण करनेवाले अनन्त तथा रक्षक हैं, इसलिये यह पृथ्वी सावधान होकर अपनेको धन्य करती हुई सूर्यके तेजयुक्त तथा हिलते हुये धवल मणिमय अखण्ड दण्डसे युक्त मानों आतपत्र अर्थात् आपके ऊपर छत्र धारणकर रही है ।।१६।।

अनुवाद—दूर्वादि अपूर्व हरी-हरी शोभासे रुचिर यह पृथ्वी अनन्ता

---

(1) गदभानाम् । (2) छत्रम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नोत्तालामेघकालाः कवलित ककुभस्तुङ्गभावैर्दलानां
नीलानां पुञ्जकारैः पृथुल फलफलैर्नद्धमूर्धान एते ॥१७॥
रुद्ध्वा मूर्धानमूर्ध्वं सुविपुलफलकैर्योद्धुमुद्दाम धाम्ना
मार्त्तण्डेन प्रकाण्डा मरकतविततस्तम्भ सम्भावनाभूः ।
दुर्दान्ताध्वान्तसेनादल जटिल शिरस्तालसम्भारदम्भाद्-
भूयः सम्भूय वृन्दावन घनघनिमोज्जृम्भणादुज्जिहीते ॥१८॥

वृन्दावने कलित गोपकिशोरसङ्ग-
मङ्गीकरिष्यति मही भरभङ्गरङ्गम् ।
तालध्वजेति विदधे सविधिस्त्रिलोकि-
जैत्रध्वजं विपुल तालतरुच्छलेन ॥१९॥

अदभ्रै रेवाभ्रैः सहमिहिरजोत्तुङ्गलहरी
विगाहं स्वर्गंगासलिलमुदभूदम्बरचरी ।

नामवाली तथा आप भी अनन्त नामसे शोभित हैं. यह देखकर स्पष्ट अंजलि-पुट बाँधकर अर्थात् हाथ जोड़कर कोटि-कोटि अर्थात् अत्यन्त प्रसन्न हुई हैं, अत्यन्त नहीं उठे हुए मेघ जैसे काले पत्तोंके अति उच्च होनेके कारण दिशाओंके ढके हुए नीले समुदाय द्वारा तथा बड़े-बड़े मोटे फलोंसे सिर बाँधे हुएसे यह ताल वृक्ष प्रतीत होते हैं ॥१७॥

अनुवाद—सुविपुल बड़े-बड़े फलोंसे ऊपर सिरको ढककर उत्कट तेजसे प्रकाण्ड तेजस्विनी मरकतमणिके स्तम्भ जैसी प्रतीत होनेवाली यह पृथ्वी दमन न करने योग्य अन्धकारकी सेना साथ लेकर पत्रोंसे जटिल सिरवाले तालवृक्षोंके समूहके आडम्बरसे मानों सूर्यसे युद्ध करनेको सत्रसे मिलकर वृन्दावनकी अत्यन्त घनी उठी हुई विकसित शोभामें उठान भरती हुई तैयार हो रही है ॥१८॥

अनुवाद—वृन्दावनमें श्रीकृष्ण गोप किशोरोंको साथ लेकर पृथ्वीके भारको दूर करनेके लिये रङ्ग स्थल स्वीकार करेंगे। यह जानकर ब्रह्माने बड़े-बड़े तालवृक्षोंके बहाने तीनों लोकोंको जीतनेकी ध्वजा-रूप यह ताल-ध्वज बनाया है ॥१९॥

अनुवाद—यमुनाकी उच्च लहरी बड़े-बड़े बादलोंके साथ आकाशमें संचरण करती हुई स्वर्गङ्गाके जलमें स्नान करनेको उठी यह दीखनेवाली ताल-वृक्षोंकी पंक्ति नहीं है किन्तु यह आकाशमें मोटे-मोटे खम्भोंकी पंक्ति है अथवा कालीका शरीर हैं ॥२०॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नभस्स्थूलस्थूणावलिरिव घनालीव फणिनां
न पाली तालानां समुदयति कालीतनुरिव ॥२०॥

तालवृक्षकम्पनम्

गृहाणैकं पाणौ रजतगिरि सानौ तम इवा-
र्भकस्तालाङ्क त्वामनुभवतु तालाङ्कमभितः ।
इतीशे गोपानामभिलपति कोपादिव बली
[1]हली लोलीचक्रे तदुरुतरचक्रं भुजबलैः ॥२१॥
तरूनान्दोलयामास हलो तान्कर लीलया ।
गम्भीरमदकुम्भीन्द्रो मृदुरम्भावलीमिव ॥२२॥

अथ बल विपुल भुजाभिघात जात कम्पानां तालपरम्पराणां फलपरम्परासम्पाता धारा सम्पाता इव निःशम्पाततवारिधराणामचिरेणोदपद्यन्त ॥२३॥

विशेष—यहाँ कवि ने बड़ा सुन्दर अपन्हुति अलङ्कार दिखाया है "प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपन्हुतिः ॥२०॥

तालवृक्ष हिलाबा

अनुवाद—एक वृक्षको हाथमें पकड़ो रजतगिरि अर्थात् कैलाशपर अन्धकारके समान तुम्हारी शोभा होगी, हे तालांक=बलराम! अर्भक, बालक उस समय तालके चिह्नवाले तुमको सचमुच सत्य नामवाला तालांक समझेगा, क्योंकि बलरामका नाम तालांक भी है, [तालांको मुसली हली (अ० को०)]। इस प्रकार गोपेश्वरके कहनेपर क्रोधसे मानो बली-बलरामने अपनी भुजाओंके बलसे उस महान् ताल-वृक्षोंके समूहको हिला दिया ॥२१॥

अनुवाद—जिस प्रकार कोई गम्भीर मदवाला गजराज कोमल केलेके वृक्षोंको हाथसे हिला दे ऐसे वृक्षोंको हिला दिया ["बलः प्रविश्य बाहुभ्यां तालान् सम्परिकम्पन्' भा० १०।१५।८] ॥२२॥

अनुवाद—इसके अनन्तर बलरामजीकी विपुल भुजाओं के अभिघातसे कम्पित होते हुए उन तालवृक्षोंके बहुतसे फल शीघ्र ही ऐसे गिरने लगे जैसे बिजलीके बिना आकाशमें छाये बादलोंकी जल-धारायें वेगसे गिरतीं हैं ॥२३॥

1—बलराम।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भुजाघातेन ते शीर्णास्तूर्णं चूर्णीचिकीर्षवे ।
[1]तालाङ्काय ददुस्तालास्तालं कायरिरक्षया ॥२४॥

अत्युच्चैः पतितानि तानि परितस्तालानि तालद्रुमा-
त्कालानि स्फुटितानि कान्यपि रसैः सिक्तानि रक्तान्यपि ।
व्यक्तानीव शिरांशि मांसलगुरु ग्रीवाटवीतो दश
ग्रीवस्यानुबभूव कैटभरिपुर्भूयोऽपि वृन्दावने ॥२५॥

अविरलपतदुरुताल फलानामवार ध्वनि धोरणीमवधाय क्रोडाध्मात धेनुकाभिधदनुजाधीश प्रमुख खराकार प्रखर मुखराः सुराः सर्वे तमभिययुर्वेलाभिलङ्घनरंहसोऽपि घोरोर्मय इव कल्पकालीना नाल्पजगदाप्लावन संकल्प शालिनो महाजलधेः ॥२६॥

धेनुकासुरवधः

क्षुरक्षुण्णक्षोणी स्खलितपवनोच्चालितरजः–
समूहैः संमोहं कृतजलधिरोधः फलभुजाम् ।

अनुवाद—भुजा के आघातसे टूटे हुए ताल-वृक्षोंने तोड़नेवाले तालांक अर्थात् बलरामके लिये मानों अपनी शरीर रक्षाके लिये बहुतसे ताल-फलोंको दिया ॥२४॥

अनुवाद—वे तालके फल बहुत ऊँचे वृक्षसे गिरे इसलिये कुछ फट गये, रससे भीगकर लालहो गये । ऐसा प्रतीत होता था मानों वृन्दावनमें भी फिर एक बार भगवान्‌ने बड़ी दश ग्रीवाओंसे युक्त रावणके दश सिरोंको अनुभव किया हो, लङ्काकी तरह वृन्दावनमें भी रावणके सिर फिर आ गये हों ॥२५॥

अनुवाद--निरन्तर गिरते हुए तालके फलोंकी उत्कट ध्वनिको सुनकर वक्षस्थल फुलाये धेनुक नामके दनुजपति आदि रासभ आकारवाले घोर शब्द करते हुए सब असुर चारों ओरसे इस प्रकार आगये जैसे प्रलयकालमें होनेवाली सम्पूर्ण जगत्‌को डुबानेके सङ्कल्पवाली तथा किनारेको तोड़नेवाली महासमुद्रकी घोर लहरें चारों ओरसे आतीं है, इस प्रकार रासभ शरीर धारण किये सब दैत्य आगये ॥२६॥

धेनुकासुर वधः

अनुवाद--खुरोंसे पिसी हुई भूमिसे उठी हुई और वायुके द्वारा उड़ायी हुई धूलिके समूहसे मानों समुद्रको रोकते हुएकी तरह प्रतीत होनेवाले उस दैत्यने

1—तालाङ्को मुसली हली (अ० को०) ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

विधाय व्याधूयोपरि परिवलद्बालधिमसौ
जघान व्याघोषी चरम चरणाभ्यां बलहृदि ॥२७॥
घूर्णद्घर्घरघोरघोषमुखरब्रह्माण्डभाण्डोदरं
क्रोधेन क्षितिमुल्लिखन् पुनरपि प्रैषन् खुराग्रैः खरः ।
अभ्रूभङ्गमनक्षि रङ्गिमचलद्भङ्गिस्मितं बालधौ
ताक्ष्येणेव फणी बलेनरुरुधे धावन्क्रुधा [1]धेनुकः ॥२८॥
लाङ्गूलाग्रे गृहीत्वा शशकमिव मुहुर्भ्रामयित्वा समन्ता-
द्वान्त्रा सृग्धोरणी स्रग्गगन वनहरिद्धेनुकं सावहेलः ।
दिग्दाहारण्य दाहारुणघनघटनारक्तवृष्टोर निष्ठा-
स्तालाङ्कस्त्यक्त शङ्कस्त्रिभुवनमचिरान्मानयामास मानी ॥२९॥
लगुडेनेव तालानि विशालानि हलायुधः ।
तेनैव पातयामास निक्षेपक्षपितायुषा ॥ ३०॥

फलकी इच्छावालोंको कुछ भ्रान्तिसे उत्पन्न करके उसने पूँछको ऊपर घुमाते हुये तथा भयङ्कर शब्द करते हुये पिछले दो चरणोंसे बलरामके हृदयपर बड़े वेगसे प्रहार किया ॥२७॥

अनुवाद--घूमते हुए तथा घर्घरके भयङ्कर शब्दसे ब्रह्माण्डके मध्य भागोंको गुञ्जित करते हुए क्रोधसे पृथ्वीको खोदते हुये और खुरोंके अग्रभागसे खुदी हुई धूलिको ऊपर उछालते हुए भ्रूभङ्ग एवं नेत्र संचालनके बिना ही मुस्कराते हुए, पेंतरे जैसे बदलते हुए, पूँछको हिलाते हुए उस रासभाकार धेनुक दैत्यको, ताक्ष्य जैसे सर्पको रोकता है उसी प्रकार रोक लिया ॥२८॥

अनुवाद--शशककी तरह उस रासभको पूँछमें पकड़कर चारों ओर खूब घुमाकर तथा जब रक्त वमन करने लगा उस समय भी आकाशमें वनमें तथा दिशाओंमें झटकेके साथ घुमाया, [भ्रामयित्वैक पाणिना (भा० १०।१५।३२)] जब दिग्दाह जैसा, अरण्यदाह जैसा तथा लाल-लाल बादलों जैसा जब बुरी तरह रक्त वमन करने लगा तब मानों तालांक बलरामजीने निश्शङ्क होकर त्रिभुवन-को दुःख देनेवाले उस दुष्ट दैत्यको मरणासन्नकर दिया ॥२९॥

अनुवाद—जैसे लाठीके द्वारा बड़े-बड़े तालके फल तोड़े जाते हैं उसी

---

(1) धेनुकासुरवध कथा भा० १० स्कंध १५ अध्याये ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धेनुकासुनिधने प्रधने ये क्रोधबाधित धियो दधुरोजः ।
ताल पातनकृते हलिनस्ते क्षेपणीय पदवीं ययुराशु ॥३१॥
किं ब्रूमस्ताल मूल्यं दधति हृदिसधा नामतो यस्यरीढां
प्रोढाहङ्कारिणस्ते सपदि विदधिरे यत्कृते प्राणदानम् ।
धन्यास्ते धेनुकाद्याध्रुवमिति तु वयं ब्रूमहे यत्तनुभ्यो
दत्त्वा प्राणान्परेभ्यः फलमतुल सुदुः सङ्गरश्रान्तिशान्त्यै ॥३२॥
मुख पंकेरुहे तालं तालाङ्कोऽधत्त लीलया ।
अशङ्कत परं को न [1]शशाङ्कोपहत तमः ॥३३॥
विघटितकटुकण्टककोटिकोटीरमिव कैटभारातिरटवीनां तद्वनं विधाय तालध्वज महनीयतया क्षणमुररीकृतमुरलीक एव क्षणमङ्गी-

---

प्रकार बलरामजीने आयुको नष्ट करनेवाले उस भ्रमणसे घुमाकर दैत्यको पटक दिया और मार दिया ॥३०।

विशेष—भ्रामणत्यक्त जीवितम् भा० १०।१५।३२ ॥३०॥

अनुवाद—इस युद्धमें धेनुकके प्राण नष्ट होनेपर क्रोधान्ध होकर बलरामके सखाओंने ताल फलोंको तोड़नेके लिये क्षेपणीय (फेंकनेको) अर्थात् फल तोड़नेका वेग प्रकटकर दिया ॥३१॥

अनुवाद—हम तालके फलोंका क्या मूल्य बतायें, जिनके नामसे अमृत भी लज्जा धारण करता है, बड़े-बड़े अहङ्कारियोंने जिनके लिये तत्काल ही अपने प्राणोंका दान कर दिया। वे धेनुक आदि निश्चय ही धन्य हैं, हम क्या कहें जिन्होंने अपने शरीरसे प्राण देकर दूसरेको अर्थात् अपने शत्रुओंके लिये युद्धकी थकावट की शान्तिके लिये अतुल फल प्रदानकर दिया ॥३२॥

अनुवाद—तालांक बलरामजीका नाम है, बलरामजीने लीलापूर्वक ताल फलको अपने मुख-कमलमें रक्खा, उस समय चन्द्रमाने अन्धकारको दूर कर दिया यह शङ्का किसने नहीं की ॥३३॥

अनुवाद—बड़े तीव्र कटु-कण्टकोंको समूल नष्ट किये हुए की तरह उस गम्भीर वनको श्रीकृष्णने स्वच्छ करके तालध्वजकी तरह सुन्दर लगनेवाली मुरलीको क्षणभर मुखपर शोभित करके क्षणभर गाना गाते हुए, क्षणभर मुख

---

(1) शशाङ्कः—चन्द्रः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत सङ्गीत एव मुत्तुङ्गमुखरित शृङ्ग एव क्षणमाह्वयन्नेव धेनूरभि धाय नाम धेयानि क्षणमति चंचलवत्सतर धावन्त मनुधावन्नेव दिन-परिणामरमणीयतया क्षणमनु कूजन्तं कोकिल मनुकूजन्नेव, क्षणमपि स्वेच्छा विहारतया पुरोवलक्षित पक्षिच्छाया मच्छादयन्नेव, क्षणमपि स्वच्छाययैव स्वमाययेव विहरन्, क्षणमपि पशुपाललीलया लगुडयष्टि मालोडयन्नेव, क्षणमपि पदकटकपटूत्कटनादमोद मेदुरो नृत्यन्नेव, दिशि दिशि च मयूरपरम्परा मुन्मुखमनुपश्यन्ती मनुपश्यन्नेव, दिक्सु-न्दरीणां दृगिन्दीवरसन्दीपिनी मञ्जन शलाकामिव कामपि वनमालि-कामालोकमान एवाटवीह रिदवलीढशिखराधिरूढनवपल्लव रागपर-म्परामिव, सन्ध्यारुचिमभि संदधान एव सकलदिन धेनुधूली धारा कवलनभानुमालिभानुमालानिमज्जन धूसरी भव दल कक्कुलबद्ध चारु-चूडाग्र चचन्द्रक चन्द्रमुख चन्द्रालिक तिलक चन्द्रकर चरण नख-चन्द्रमा वृन्दावनचन्द्रमा मन्दं मन्दं वृन्दावन जनमनः कुमुदवनमुद्-बोधयामास निजपाद पातैः ॥३४॥

ऊँचा करके श्रङ्गको बजाकर, गौओंको नाम ले लेकर बुलाते हुये थोड़ी देर चंचल दौड़ते हुए बछड़ों के पीछे दौड़ते हुए दिन ढल जानेपर सुन्दर ढङ्गसे बोलती हुई कोयलोंके पीछे स्वर मिलाकर कूंजन करते हुए क्षणभर इच्छानुकूल विहार करने-के कारण सामने दीखती हुई पक्षियोंकी छायाको ढकते हुए क्षणभर अपनी छाया-से ही अपनी मायाकी तरह विहार करते हुए क्षणभर गोपालोंकी तरह लगुडको घुमाते हुए क्षणभर पैरोंमें कटकके सुन्दर बजनेके शब्दसे प्रसन्न होकर नाचते हुए क्षणभर दिशाओं-दिशाओंमें ऊपर देखती हुई मयूर पंक्तिको देखते हुए दिशा रूपी स्त्रियोंके नेत्रकमलको शोभित करनेवाली अञ्जन शलाकाकी तरह वनमालाको देखते हुए ही वन और दिशाओंमें व्याप्त शिखरोंके ऊपर नव पल्लवकी लालिमा समूहकी तरह सायंकालकी शोभाको देखते हुए ही सम्पूण दिन गौओंकी धूलि धाराके पड़नेसे तथा सूर्यकी किरणोंसे व्याप्त होनेसे धूलिसे धूसरित केशोंकी चोटीमें बँध हुए मयूर पिच्छ ["बर्हापीडं नटवर वपुः" । भा० १०।२१।५] से शोभित मुखचन्द्रके मस्तकपर करचरणके नखके समान टेढ़े आकारवाला तिलक धारण किये वृन्दावनके चन्द्रमा श्रीकृष्णजीने धीरे-धीरे अपने चरण पात ['वृन्दा-रण्यं स्वपदरमणम्" । भा० १०।२१।५] से वृन्दावनके लोगोंके मनरूपी कुमुदको विकसित कर दिया ॥३४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृष्णशोभावर्णनम्

आचूडं पशुधूलिधूसरमभूदाभालमुद्यद्घन-
स्वेद ग्रन्थिलमा कपोल मधुरस्मेराननं तद्वपुः ।
वासोलङ्करणैरपेतकिरणैर्धेनोश्च रेणोर्गणैः
शोभा तु द्विगुणो बभूव सुतरा माभीर चूडामणेः ॥३५॥

सुखमुषित निशावसानसमयसमुचित समेतसाधुकृत्यो निवर्त्योदय दुडुपरिवृढाभिरामं रामं यथाकामं विहितविलास वेषभूषैरभिभूषितो व्रजकिशोरैरनुससार वन भ्रमर शिरोमणिराभीर शिरोमणीभूय । अतिरङ्गेण तरलमन स्तयोत्तुङ्ग कुरङ्गोत्तरङ्गितैः सह तरङ्गितानि तन्वन्तश्चटुल वत्सरैः सह दण्डमनु वञ्चन्तो विहरन्तोऽपि परिश्रान्ताः कान्तारे तृषाविषान्तकारण तयेव विषान्तरमनुसन्दधानाः कालियहृद-विषमेव महाविषमाययु राभीर शावकाः सर्वे ॥३६ ।

श्रीकृष्ण-शोभा

अनुवाद—चोटीसे लेकर मस्तक तक उनका शरीर पशुओंकी धूलिसे भरा था तथा पसीनेसे लथपथ था, कुछ मन्द मुसकान सुन्दर कपोल वाला मुख था जिसमे शरीरकी शोभा सुन्दर थी, गौओंकी धूलि पड़नेसे वस्त्र अलङ्कार शोभाहीन जैसे पड़ गये थे फिर भी आभीर चूड़ामणि श्रीकृष्णकी शोभा दूनी हो गई थी ॥३५॥

अनुवाद—सुख-पूर्वक रात्रि बिताकर ["संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे" । भा० १०।१५।४६] तब निशाकी समाप्तिके समय सब कृत्य समाप्त करके उदित होते हुए (उडु परिवृढ) चक्रके समान सुन्दर रामको लौटाकर इच्छानुसार सुन्दर वेशभूषा बनाये व्रजबालकोंके साथ देव शिरोमणि कृष्ण आभीर बालकोंके शिरोमणि बनकर वनको गये । बड़े आनन्दसे चंचल मन होनेके कारण ऊँचा कूदते हुए हिरनोंके तरह तरंगें भरते हुए चंचल बछड़ोंके साथ दण्डको फेंकते हुए विहार करते हुए वनमें घूमते थके हुए भी तृषारूप विषका अन्त करने के लिये तृषा विनाशक जलका अन्वेषण करते कालिय हृदय रूप महा विषके पास वे सब व्रज-बालक आगये ॥३६॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ भगवदवलोकनानुभावलावित महाविषानुभावा गतजीवा अपि जीवन्ति स्म विस्मयमावहन्तिस्म मिथो बहुकालम् । अनन्तरं तु मनसि विचिन्त्य तमन्तकमिवानन्त जन्तूनां त्रिभुवन जनित चमत्कार विषोद्धारकारिणं गरुडानवगाह्यहृदे निर्वाह्य निखिलासह्यमधिवासमति भासमानमसुरनरकिन्नरयक्षरक्षो गणगन्धर्वगर्वचर्वणा दुर्वारं कालिय[1] दर्वीकरं दमयिस्यन्नुद्दामके सरिकिशोर इव शिखरिशिखरं हरिरग्रवर्त्तिनमधिरुरोह कदम्बमविलम्बम् ॥३७॥

कदम्बालग्रीवश्रुतिततिकदम्बैक कलिकः[2]
कदम्ब प्रत्यग्रांकुर रुचिरचूडाग्रमधुरः ।
कदम्बेभ्योऽर्भाणाम् प्रतिनव कदम्बानि वितरन्
कदम्बव्यालंबी स्फुटकुसुमचुम्बी स रुरुचे ॥३८॥

अनुवाद– इसके पश्चात् भगवान्‌की दृष्टि मात्रके प्रभावसे महाविषके प्रभावको नष्ट करके प्राणहीन ["ईक्षयामृत वर्षिण्या स्वनाथान् समजीवयत्" भा० १०।१५।५० भी बहुतसे जीवित हो गये थे तथा बहुत देर तक आश्चर्य करते रहते थे । इसके अनन्तर अनन्त प्राणियोंको यमको तरह नष्ट करनेवाला तीनों लोकोंको चमत्कृत करनेवाले भयङ्कर विषको वमन करनेवाला, गरुडसे अवगाहन न करने योग्य हृदयमें निवासके कारण अत्यन्त असह्य अति कठोर दीप्त असुर नर किन्नर यक्ष राक्षस गण गन्धर्वादि से भी अगम्य कालिय नागका दमन करनेकी इच्छावाले अदम्य शिशु सिंहकी तरह आगे आये हुए पर्वत शिखरकी तरह उच्च कदम्ब वृक्ष ['कृष्णः कदम्बमधिरुह्य" । भा० १०।१६।६] पर कृष्ण भगवान् शीघ्र ही चढ़ गये ॥३७॥

अनुवाद—सुन्दर कान, कण्ठादि सब कदम्ब वृक्षकी कलीके समान सुन्दर प्रतीत होते थे तथा कदम्बके नवीन अंकुरोंके समान कृष्णकी चूड़ाका अग्रभाग शोभित था, बालकोंके समूहको कदम्बकी नव कलिका फलादि वितरण कर रहे थे, कदम्बका आश्रय लिये हुये वे कृष्ण उस समय विकसित पुष्पोंका आनन्द लेते हुए शोभित हो रहे थे ॥३८॥

---

(1) कालिय दमन कथा भा० १० स्कं० १५-१७ अध्यायेषु वर्त्तते ।
(2) शिखरिणीच्छन्दः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जहौ नो मञ्जीरं न च कटितटीघर्घर घटीं
न हारं नो हीरावलिवलित केयूर वलयान् ।
भुजस्तम्भास्फोटस्फुटितफणिदृग्वाट महिरा-
द्यदेतस्मिञ्झम्पं हरिरकृत कम्पं जगदधात् ॥३९॥

तिमिरैरिव दुर्निवारसारैर्विषभारैरिव विश्व नाशकारैः ।
जलदैरिव बद्धभीमनादैः सलिलैरुत्थित मच्छलद्भिरुच्चैः ॥४०॥

उन्मज्जन्भूरिमज्जन्बहुतरलहरीर्वर्द्धयन्दोः पदाद्या-
स्फालै कालः करालैः कलभ इव नवाडम्बरारम्भभीमः ।
पादाम्भोजन्महस्ताम्बुजवदनसरोजन्मदृक पुण्डरीकैः
साटोपं कैटिभारिर्भुजगपतिहृदं[1] भूषयामास भूयः ॥४१॥

करे कलभलीलयाकृत चकार चिक्षेप च
स्मितामृततरङ्गिणि स्ववदनेऽपि दिक् प्राङ्गणे ।
निरञ्जन गुणोञ्जन द्युतिमुदे तदोयं जलं
भ्रमद्भ्रमरविभ्रमं तदुरु बिभ्रदभ्राजत ॥४२॥

अनुवाद—उस समय उन्होंने न मंजीरको छोड़ा और न कटि तटपर रहनेवाले घटी सदृश बजने वाले भूषणको छोड़ा और न हारको और न हीराओं से जड़े हुए केयूर तथा वलयको छोड़ा भुज स्तम्भके आस्फोटनसे नीचे शेष नाग- की दृष्टि फट जैसी गई तथा विशेष कम्पशून्य संसारको हरिने एक विशेष झटका सा दिया ॥३९॥

अनुवाद—उस समय नहीं रोकने योग्य अन्धकारकी तरह विश्वका नाश करनेवाले विषभारकी तरह तथा भयङ्कर गर्जन करनेवाले बादलोंकी तरह वेगसे छलकते हुए जल उठ रहा था ["श्वसिताम्बुराशिः" भा० १०।१६।७ ।

अनुवाद—डुबकी लगाते हुए, डूबते उछलते हुये, हाथ पैरोंके आस्फा- लनसे पटकनेसे बहुत लहरियोंको उछालते हुये, काले गज शिशुकी तरह शोभित होते हुए, नया आडम्बर उत्पन्न करनेसे भयङ्कर चरणकमल, हस्तकमल, मुख- कमल एवं नेत्रकमलोंसे श्रीकृष्णने उस कालिय हृदयको भूषित कर दिया ॥४१॥

अनुवाद—गज शिशुकी जैसी लीलासे हाथमें तथा मन्द हासरूपी अमृत

---

(1) कालिय ह्रदः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अम्भोगम्भीरभङ्गोत्तरलगुरुफणामण्डलत्वेन जाग्र-
त्पाथो निर्भेदिनिर्यद्द्युतिनयनकुलं ज्वालयन् जालमग्नेः ।
स्फूर्जत्फूत्कारगर्जद्गुरुगरलगलं सृक्विणो लेलिहानः
कालः कालात्करालः फणिपतिरुदगात् कालियः कालतोयात्[1] ।।४३

फणाभिः स्फाराभिर्दशशतमिताभिर्द्विनयने[2]
गताभिः प्रत्येकं प्रवरमणिमेकं द्विरसने ।
पुरस्तादुत्तस्थौ मुरविजयिनः[3] कालियफणी
बभौ नार्कोनाग्निर्न मणिचपले नाशनिशनी ।।४४।।

क्रोधान्धः संदधानः सुखमय शयनस्वापस्वाप भङ्गैक हेतुं
साक्षात्पक्षीन्द्र केतुं तमहि पतिरसौ नापि पश्यन्नपश्यत् ।
छायादानात्स माया कलितनरतनोर्वर्द्धयन्वारिलीलां
विस्फाराभिः फणाभिः प्रभुशिरसि शतच्छत्रवाही बभूव ।।४५।।

लहरीमें अपने मुखपर तथा दिशाओंमें सुन्दर श्यामवर्णके शोभावाले रूपपर उस समय वह जल घूमते हुये भ्रमरका तरह शोभा प्राप्तकर रहा था ।।४२।।

अनुवाद—जलके अत्यन्त उफननेसे अत्यन्त चञ्चल तथा भयङ्कर फणा-मण्डल करके तथा उग्र गम्भीर जलको भेदन करके निकलती हुई दृष्टिकी तीव्र द्युति करता हुआ, अग्नि समूहको जलाते हुयेकी तरह गरजती हुई भयङ्कर फुस-कारसे उग्र विषको उगलते हुये जिह्वाको चाटते हुये कालसे भी भयङ्कर वह फणिपति कालियनाग कालरूप जलसे निकला ["चक्षुःश्रवा समसरत्तदमृष्यमाणः" भा० १०।१६।८] ।।४३।।

अनुवाद—बहुत फैले हुये हजार फनोंसे दोनों आँखों तक गये हुए तथा दोनों जीभोंमें प्रत्येक फनपर आई हुई मणियोंसे वह श्रीकृष्णके सामने कालियनाग उठा । उस समय न सूर्यकी, न अग्निकी तथा मणियोंपे चञ्चल वज्र शनि आदि किसीकी शोभा नहीं थी ।।४४।

अनुवाद - क्रोधसे अन्धा होकर अपने सुखमय शयनको भङ्ग करनेका यही एक कारण मानते हुए उस अहिपति कालिय नागने गरुडध्वज श्रीकृष्णको देखते हुए भी नहीं देखा, मायासे नर शरीर धारण करनेवाले प्रभुकी जललीलाको

---

(1) स्रग्धराच्छन्दः । (2) शिखरिणी । (3) श्रीकृष्णस्य ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लक्ष्मीर्यत्र विचित्रितैव नियतं यत्राबभौ कौस्तुभः
श्री वत्सेन यदञ्चितं यदुपदेर्लब्ध्वा तदुच्चैरुदः ।
दन्तेषु त्रुटितेषु तेषु गरलस्योच्चेषु मोघेष्वथो
भोगेनैनमवेष्ट यद्गजमिवालानैः फणी भीषणः[1] ।।४६।।
नावासो गणितः श्रियोऽपि नु मता न स्वीकृतापि त्रपा[2]
श्वभ्रं वारि वनं च कण्टकघनं वर्त्मापि न प्रेक्षितम् ।
अश्यत्केशवदुकूलभूषणमुपालक्ष्येति दुर्लक्षणै-
रुड्डीयेव विनिर्गतं व्रजभुवामाबालवृद्धैर्द्रुतम् ।।४७।।
धावं धावमरण्यधोरणि सरोधारानिकुञ्जावली-
ष्वद्रेरूर्ध्वमधो दरीषु यमुनारोधस्सु बाधाकुलैः ।
गत्वा कालियधाम वीक्ष्य तमहि क्रोडावगूढं भुवि
भ्रष्टानामुदबोधि कौरट इवा क्रन्दस्य कोलाहलः ।।४८।।

बढ़ाते हुये बड़े-बड़े फनोंसे प्रभुके ऊपर छाया डालनेसे सौ छत्र धारण करनेवाले-की तरह होगया ।।४५।।

अनुवाद—जिसकी विचित्र ही शोभा थी श्रीवत्स चिह्नसे भूषित यदुपतिके उस हृदयको प्राप्त करके कौस्तुभमणि शोभित होरही थी, बड़े-बड़े निष्फल विषदन्तोंके टूट जानेपर उस भीषण सर्पने लौह श्रृंखलासे हाथीकी तरह अपने फनसे इनको लपेट लिया ।।४६।।

अनुवाद—किसीने घर देखा न लक्ष्मीका स्थान देखा, न लज्जाका ध्यान रखा, गढ्ढा, पानी, वन कंटकमय मार्ग कुछ नहीं देखा। कृष्णका समाचार जानकर बुरे लक्षणोंसे युक्त ब्रजके सब बालक जवान वृद्ध मानों उड़कर पहुँच गये हों उसकी तरह सभी बड़े वेगसे वहाँ पहुँच गये ।।४७।।

अनुवाद—वनोंमें तालाबोंके पास निकुञ्जोंमें पर्वतोंके ऊपर नीचे गुफाओंमें यमुनाके किनारे दुःखी होते हुए सब कालिय धाममें जाकर सर्पकी क्रोडमें फँसे हुए श्रीकृष्णको देखकर पृथ्वीपर लौटने लगे और कुरर पक्षीकी तरह रुदन करने ["रुदत्य इव तस्थिरे" (भा० १०।१६।११)] का कोलाहल होने लगा ।।४८।।

---

(1) शार्दूलविक्रीडितम् । (2) त्रपा=लज्जा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोपी गोप गवामबाधित शुचां बाष्पाम्बु धारामुचां
हारावैः सह यास्यतो बहिरसू[1] नालक्ष्य लक्ष्मीपतिः ।
आस्फालस्फुर दङ्गभङ्ग बलवज्झङ्कार भूषागणं
द्रागिभन्दन्फणि भोगबन्धमुदगात्कुम्भीव कुम्भीलताम् ।।४६।।

गलद्गरल[2] भीषणं ज्वलद दभ्रतीव्रेक्षणम्
घन श्वसनगर्जनैः प्रलयमारुतारम्भिणम् ।
अनेक सरसीरुहोद्भटमिवैक नालं हठाद्
घटायित फलावलिं हरिरधात्करे कालियम् ।।५०।।

[3]जहाति च दधाति च स्फुटमनेकधा माधवः
पलायन परायणे भ्रमति भोगिनि भ्राम्यति ।
विवर्त्तयति सर्वतः करगृहीतलांगूलकम्
किशोर इव कौतुकी कलित केलि गण्डूपदम् ।।५१।।

अनुवाद - आँखोंसे अश्रुधारा छोड़ते हुए और निरन्तर शोक करते हुये गोपी-गोप और गौओंके हाय-हाय शब्दसे उनके प्राणोंको बाहर निकलते हुये देखकर लक्ष्मीपति कृष्ण आस्फालनसे ताड़नसे अङ्गोंके भङ्ग जैसी चञ्चलतासे भूषणोंकी झङ्कारके साथ सर्पके फनका बन्धन तोड़ते हुए हाथी जैसे नक्रका बन्धन तोड़ देता है उसी तरह तोड़कर उठ बैठे ।।४६।।

अनुवाद—भयङ्कर विषको उगलनेवाले अधिक जलते हुये तीव्र नेत्रवाले अति गर्जन सा करती हुई तीव्र श्वासोंमे प्रलयकाल जैसी वायुको छोड़नेवाले एक नालवाले तथा अनेक कमल समूहकी तरह घटाओंकी तरह छाई हुई फणावली-वाले कालिय सर्पको हरिने हाथमें पकड़ लिया ।।५०।।

अनुवाद—माधव अनेक प्रकारसे प्रत्यक्ष ही कभी छोड़ते हैं तो कभी पकड़ते हैं, भागनेमें तैयार उस सर्पको कभी घुमाते हैं, कभी स्वयं घूमते हैं, उसकी पूँछ पकड़कर सब ओर घुमाते हैं, किशोरकी तरह खेल करनेवाले भगवान् केंचुएकी तरह उससे खेल करते हैं। "क्रीडन्नमुं परिससार यथाखगेन्द्रः" भागवत १०।१६।२५] ।।५१।।

---

(1) प्राणान् । (2) विषः । (3) त्यजति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

जलमनु हरिः कारं कारं विहारमनेकधा
भुजग पतिना सार्द्धं श्रद्धां वहन्बहु नत्तितुम् ।
नटवरवपु स्तन्मूर्धानं हठादधिरूढवान्
शिखरि शिखरी रंहः संघादिवोन्मदकेसरो ॥५२॥

फणां फणातः फणिनोऽधिरुह्य फणाप्रधानं हरिरारुरोह ।
सोपान बन्धस्य शिलां शिलातः सुतुङ्गसौधाग्रमिवक्रमेण ॥५३॥

कालियमस्तकेनृत्यः

पादाग्रे नूपुराभ्याम् कटितटनिकटे क्षुद्रघण्टाघटाभि-
र्बाह्वोरग्रेऽपि चञ्चन्मणि मदवयवैर्नाट्यमारम्भिसद्यः ।
हारेणोरस्युदारे नभसि पटतटेनालकेनालिकान्ते
कान्ते तत्तफणान्तर्नटति सुनटितं गण्डयोः कुण्डलाभ्याम् ॥५४॥

सूयन्ते स्मापदान्त प्रभृतिरुचिभराखण्डचूडाशिखण्डै-
स्ते भावास्ते च हावाः प्रतितनुजपदं भिन्नभिन्नास्तदङ्गैः ।
यान्दृष्ट्वा देवगोष्ठी विगत धृति जगौ गर्ज दम्भोधिजैत्रं
वादित्रं वादयन्ती सतुरगवदन व्यूहविद्या धराद्या[1] ॥५५॥

अनुवाद—हरि जलमें अनेक प्रकार से उस सर्पके साथ विहार करके उसको नचानेकी इच्छासे नटवर जैसा शरीर धारण करके मतवाला हाथी जैसे बड़े वेगसे पर्वतके शिखर-शिखरपर चढ़ जाता है उसी प्रकार भगवान् उसके सिरपर चढ़ गये ॥५२॥

अनुवाद—हरि उस साँपके एक फनसे दूसरे फनपर होते हुए प्रधान फनपर चढ़ गये, जैसे सीढ़ियोंकी तरह एक शिलासे दूसरी शिलापर होते हुए क्रमसे ऊँचे महलपर चढ़ जाते हैं ॥५३॥

कालियके मस्तकपर नाचना

अनुवाद—पैरोंके अग्रभागमें घुंघरुओंसे कटितटके पास छोटी-छोटी घण्टियोंसे भुजाओंके आगे चमकती हुई मणिवाले अवयवोंसे तत्काल नाट्य आरम्भ हो गया, हृदयपर सुन्दर हारसे आकाशमें वस्त्रोंके द्वारा मस्तकपर केशपाश द्वारा कपोलपर कुण्डलके द्वारा प्रत्येक फनपर अच्छा तरह भगवान् नृत्यकर रहे हैं ॥५४

अनुवाद—पैरोंसे चोटी तक अपूर्व शोभायुक्त ऐसे हाव भाव प्रत्येक

---

(1) स्रग्धराछन्दः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यङ्गं प्रतिबिम्बिताः फणिफणा श्रेणी मणीनां गणा
नृत्याकल्पमनल्पमेव विदधुर्दूरादपि श्रीपतेः ।
एवं च प्रतिबिंबशालि न मधु स्वान्तः समन्तादमी
साधीयस्तदहो महोरगपतिर्यत्ता न धान्मूर्धभिः ॥५६॥
रत्नान्तः प्रतिबिम्बितेन शतधा स्वेन स्वयं माधवः
स्वात्मारामपदं प्रदर्श्य विदधे नृत्योत्सवं कोटिधा ।
हस्तोत्क्षेपघनाङ्गभङ्गिचटुलभ्रूदृक्त रङ्गोत्कटं
पादाग्रेण नखेन पार्ष्णितलतो गुल्फेन झम्पैश्चरन् ॥५७॥
गन्धर्वाणां च यूथं कुलमपि यमिनां देवतानां च वीथी
दिक्पालानां च माला कुलकुवलयकं दिक्षु संवीक्ष्यतेस्म ।
विभ्राम्यन्विभ्रमेणा विदित तनु भिदा लेशमारभ्य रंहो-
नंहोभिः स्तूयमानः क्षणमकृत हरिस्ताण्डवाडम्बराणि ॥५८॥

पदपर अङ्गोंसे भिन्न-भिन्न उत्पन्न होते थे जिनको देखकर देव गोष्ठीने धैर्य छोड़ दिया और गरजते हुए बादलसे भी सुन्दर बाजे बजाते हुए किन्नर समूह तथा विद्याधरादि सब चकित थे ।।५५।।

अनुवाद—श्रीकृष्णके दूरसे ही प्रत्येक अङ्गपर प्रतिबिम्बित होनेवाली सर्पके फणोंकी मणियोंने अत्यन्त नृत्यका ऐसा चमत्कार किया. इस प्रकार उसका मध्यभाग वैसा सुन्दर नहीं था जैसा कि प्रतिबिम्बित मणियाँ शोभित थी महोरग पति कालिय नागने अपनी मूर्धाओंसे उनको अच्छे प्रकार धारण कर रक्खा था अपूर्व शोभा थी । ५६।।

अनुवाद—रत्नोंके मध्य सैकड़ों प्रकारके प्रतिबिम्बसे भगवान्ने स्वयं आत्मामें रमण करनेका अपना पद दिखाकर अनेक प्रकारसे नृत्यका उत्सव किया, हाथोंको उठाकर तथा अङ्गोंके सचालनसे चंचल भृकुटिसे दृष्टिकी तरङ्गोंमे उत्कट तथा पैरोंके अग्रभाग नख द्वारा पैरोंके तल भागसे गुल्फोंके चलानेकी विचित्र शोभा थी ।।५७।।

अनुवाद—गन्धर्वों, संयमी योगियों तथा देवताओंका समूह एवं सब दिक्पाल दिशाओंमें नील कुवलय जैसी श्याम शोभा देख रहे थे। शरीर परिवर्त के अलक्षित क्रम द्वारा विभ्रमसे घूमते हुए वेगके कारण जाना नहीं जा सकता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्वा नृत्यति कैटभारिरनतं मूर्धानमूर्ध्वादधो-
नासादृग्वदनात्त्रिधा च हृदसृग्धाराकुलं कालियम् ।
पत्युः प्राण परीप्सया फणिपतेरन्तः पुरादन्तरा
विद्युद्दाम परम्परा इवपुरः पेतुस्त्रियो दण्डवत् ॥५९॥

तुष्टाव च सुष्ठु निष्पेष्ठारं दीर्घपृष्ठ[1] कुलपतिकुल प्रोष्ठी[2] नयनागोष्ठी ॥६०॥

जनुर्दन्दशूके गुणोद्गार मूके पुरः कैटभारेः स्त्रियः किं वदामः ।
परंत्वेतदन्तर्निकामं जपामः कुले कद्रुजानांकृती कालियोऽभूत्[3] ॥६१॥
मुनिमौनशाली यतिर्योगमाली न शुद्धेन धर्त्तुं हृदाभूदधीशः ।
शिरोरत्न भूषा महारत्नभूर्षाभवन्भासि भो किं तपः कालियस्य ॥६२

था कि कब किस अङ्गको मोड़ दिया । पुण्यवानों द्वारा स्तुति किए हरिने ताण्डव जैसा क्रम क्षण भरको कर दिया ॥५८॥

अनुवाद—श्रीकृष्ण अनन्त अनम्र मूर्धाको ऊपरसे नीचे झुकाकर नाचते थे । अर्थात् पैर पड़नेसे मूर्धा झुक जाती थी, हृदयकी रक्त धारासे कालियका नाक, आँख, मुँह भर गया था तीनों स्थान रक्त पूर्ण थे । पतिकी प्राण रक्षाके लिये फणपतिकी स्त्रियाँ बिजली जैसी शोभावाली अन्तःपुरसे निकलकर हरिके चरणोंमें दण्डकी तरह गिर गईं ॥५९॥

अनुवाद—सर्प-कुलके स्वामी कालियकी मछलीके समान नेत्रवाली स्त्रियाँ निष्पेषण अर्थात् मस्तकोंको चूर्ण करनेवाले कृष्णकी स्तुति करने लगीं । ६०

अनुवाद—गुणोंसे शून्य दन्द शूक दंशनशील कुलमें हमारा जन्म हुआ है । हम स्त्रियाँ आपके सामने क्या कह सकतीं हैं । परन्तु यह हम अपने हृदयमें खूब जानतीं हैं कि सर्प कुलमें कालिय बड़ा पुण्यवान् हुआ ॥६१॥

अनुवाद—बड़े-बड़े मुनि यति योगी अपने शुद्ध हृदयसे जिसको धारण नहीं कर सके, कालियके सिरका रत्न जो महामणि, उसके ऊपर भूषित होकर, हरि शोभित हो रहे हैं, कालियका कितना बड़ा तप है ॥६२॥

(1) दीर्घपृष्ठ=सर्पः । (2) प्रोष्ठी=शफरी । (3) भुजङ्गप्रयातम् ।

कालियनागेकृपा

न वा दण्डनीयो न वा खण्डनीयः परं कालियोऽसौ पदा मण्डनीयः ।
इतीवाधिरूढः प्रभोगूढ पादं स्वभृत्याण्डजाधीश चण्डावसादम् ॥६३
त्रिकोणा धरित्री कि यानत्र भारः स्वयं शेषभावादि मामुद्बभार ।
कथं ते नु विश्वम्भराकारभारं सहेताहि[1]रेष क्षरत्प्राणशेषः ॥६४
कटी वत्समूर्धत्रिभेदात्तवाऽसौ त्रिलोकीशकाय त्रिभागी त्रिलोकी ।
भवद्भारसोढा न भूभारवोढा कियान्गूढपादाभयं कोऽपिमूढः ॥६५॥
कठोरं कठोरात्फणामण्डलं तत्पदं कोमलादप्यलं कोमलं ते ।
मणिग्रावघाताद्यथारक्त जातं वमद्रक्त शोचिर्दद्यद्वि व्यथेन ॥६६॥
भजेवैनतेयं नते नैव मूद्‌र्ध्ना हृदावासमासादितो येन भोगी ।
हृदं मर्मखेदच्छिदं च प्रपद्येऽमुना यत्र दृष्टो भवानिष्ट दिष्ट्या ॥६७

कालिय-नागपर कृपा

अनुवाद—अब यह कालिय न दण्डके योग्य है और न खण्डनके योग्य है यह हरिके चरणसे भूषित करने योग्य है इसीलिये अपने सेवक गरुडको अपने भार बोझिल करनेवाला यह गूढ चरण आज कालियके सिरपर चढ़ा है ॥६३॥

अनुवाद – यह त्रिकोण अर्थात् गोल पृथ्वी है, इसमें कितना भार है, यही जानकर स्वयं शेष भावको प्राप्त भगवान्‌ने इसको धारण किया, अब इस विश्वको धारण करनेवाले भगवान्‌के भारको यह कैसे धारण कर सकता है इसी से इसके कुछ प्राण शेष हैं ॥६४॥

अनुवाद—आपकी कटिकी त्रिवलीकी तरह मूर्धाके भी तीन भाग जैसे होगये, त्रिलोकीश आपकी कायासे ही त्रिलोकी भी तीन भाग जैसी है, यह आपके भारको और पृथ्वीके भारको नहीं सहन कर सकता । यह कोई मूढ है, आपके पापसे गूढ भारको धारण नहीं कर सकता ॥६५॥

अनुवाद—यह फणामण्डल कठोरसे भी कठोर है, आपका चरण कोमल से भी कोमल हैं, यह चरण मणिरूप पत्थरके टकरानेसे लाल रक्तके छलकनेसे लाल होगया है, फिर भी यह चरण व्यथित नहीं है ॥६६॥

अनुवाद—हम नम्र मूर्धासे गरुड़को प्रणाम करतीं हैं, जिसने इस

---

(1) अहिः=सर्प ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवत्पादपङ्केरुहाङ्केन पूतोमृतः स्यादयं चेद्वयं चानुयामः ।
भविष्यन्त्य नाथास्तदैतेऽद्य जाता भवानेव भावी जगन्नाथ नाथ ।।६८

पक्षीन्द्रः[1] क्षम एव कर्त्तुमचिरा दुर्वीमदर्वीकरां
हन्तव्ये विरमस्वयं न हि नखच्छेद्ये कुठारोद्यमः ।
क्रीडा मात्रमपेक्षितं यदितदा तज्जातमास्तामयं
प्राणैरेव कथं कथं च न फणी क्षेमाय न क्षम्यताम् ।।६९।।

स्तुतिमिति भुजगेन्द्रसुन्दरीणां हरिरवधाय विधाय ताण्डवानि ।
मृदितमिव विषं भृशं तमासीद्विषमय दुर्जयवीर्यमुत्ससर्ज ।।७०।।

विश्वम्भरभराक्रान्तः क्लान्तो वान्तोरुशोणितः ।
कथं कथमपिप्राप्त प्राणस्तं प्राह पन्नगः ।।७१।।

कालियको इस हृदयमें आवास दिलाया और मर्मके दुःख नाशक इस हृदकी शरण लेती हैं जिसने अनुकूल भाग्यके कारण आपका दर्शन कराया ।।६७।।

अनुवाद—आपके चरणकमलके चिह्नसे पवित्र होकर यदि यह मर जाय तो हम इसका अनुगमन करेंगी और अनाथ हो जायेंगी, हे नाथ ! जगन्नाथ !! आपही हमारे शरण है ।।६८।।

अनुवाद—केवल गरुड ही पृथ्वीको शीघ्र ही सर्पहीन करनेमें समर्थ हैं अब मारने योग्य इसको छोड़ दीजिये, नखमे मारने योग्यको कुठार नहीं उठाया जाता, यदि केवल क्रीड़ाकी ही इच्छा है तो वह पूर्ण हो चुकी, अब इसके केवल प्राण शेष रहे हैं, इसे हमारे कल्याणके लिये अब क्षमाकर दीजिये ।।६९।।

अनुवाद—इस प्रकार कालिय नागकी स्त्रियोंकी स्तुति सुनकर और ताण्डव नृत्य करके उसके विषको नष्ट सा जानकर अपने विषम दुर्जय पराक्रमको छोड़ दिया ।।७०।।

अनुवाद—हरिके भारसे दुःखी अति रुधिरको वमन करता हुआ जैसे-तैसे प्राणोंको वह प्राप्तकर कालिय पन्नग भगवान्‌की प्रार्थना करने लगा ।।७१।।

---

(1) गरुडः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालिय स्तुतिः

येन क्वापि सुधा व्याधायि विधिना कुत्रापि हालाहलो
हिंसैका क्वचिदेव देव करुणा कुत्रापि नैसर्गिकी ।
दुःखी कोऽपि सुखी च कोऽपि मृदुलः कोऽपि प्रचण्डः परो
दण्ड्योऽसौ प्रभुरस्महं विहरते तुभ्यं किमीश ब्रुवे ॥७२॥
कर्माधीनमिदं वदन्ति सुधियस्तेभ्यो नमस्कुर्महे
साक्षी तत्र सरोजपत्रनयनः श्रीमान्स्वयं सर्वदा ।
दण्ड्यं कर्म तदस्तु कुण्डलिकुले जातस्य पापस्य मे
दण्डः कोऽयमये मयेति विदितो नाद्यापि निद्रावता ॥७३॥
मया तेनाहूताः पिबत चलमित्थं जलधियः ।
सुदुर्वाराभीराः सह पशुगणैर्ये पपुरपः ।
हुताशस्थं हस्तं दहति न हुताशः क्व नु विभो ।
प्रभूणां चेष्टा हि स्फुरति जगतां मूर्धनि गुरुः ॥७४॥

कालिय कृत स्तुति

अनुवाद—जिस विधाताने कहीं अमृत बनाया और कहीं हलाहल विष बना दिया, कहीं हिंसा तो कहीं स्वाभाविक करुणा उत्पन्नकी, कोई दुःखी तो कोई सुखी है, कोई कोमल तो कोई अत्यन्त कठोर बनाया, वही दण्डनीय है, मैं अपने कार्यमें स्वतन्त्र हूं, विहार करनेवाले आपको हे ईश ! मैं क्या कहूँ ॥७२।

अनुवाद—बुद्धिमान् लोग इस जगत्को कर्माधीन बताते हैं, मैं उनको नमस्कार करता हूँ । कमलनयन श्रीमान् ! आप स्वयं साक्षी हैं। सर्प कुलमें उत्पन्न मुझ पापीके लिये कम दण्डनीय बन जाय । अहो यह दण्ड क्या है मोहमें पड़े हुए मैंने उसको आज तक नहीं जाना ॥७३॥

अनुवाद—मैंने उनको बुलाया कि जल समझकर उस चंचल जलको पियो बड़े वेगसे आकर आभीर समुदायने पशुओंके साथ इस जलको पिया । हे विभो ! अग्निमें पड़े हुए हाथको अग्नि कहाँ नहीं जलाती । इसमें प्रभुकी इच्छा ही बलवान् है आप सब संसारके गुरु हैं ॥७४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वामिन्नाज्ञापयतु विज्ञेतरस्मै कस्मैचिदस्मै विस्मृतनिखिलाय प्राप्तप्रायनिधनाय प्रतिपन्नहालाहलैक धनाय । यत्कुर्वन्भगवदभिमतो भवन्नयमुपलभते परं भव्यम् ॥७५॥

कृष्णस्याभयप्रदानम्

आकर्ण्याहमुरारातिरणाति कुलमर्द्दनः ।
मदङ्घ्रेरङ्कनिःशङ्कः सिन्धुं याहि ह्रदं जहि[1] ॥७६॥

प्रभुवर करुणापाङ्गपीयूष तरङ्गिणी तरङ्गाभिषेक मधुरिमातिरेकानुभवार्द्रीभावतया समीचीनमुरगवरो वरं वव्रे ॥७७॥

ईदृक्कर्म्म न शाम्यतीश यदि मे स्यादत्र जातौ जनु[2]–
र्मा भूयान्मतिरीदृशी मधुरिपो दष्टोऽसि मूढैर्यया ।
श्री भाजां पुनरीदृशीदृगमितः स्यात्ताण्डवाडम्बरम्
मौलौ जन्मनि जन्मनि प्रभुवरैतत्ते पुरः प्रार्थये ॥७८॥

अनुवाद—हे स्वामिन् ! आप विज्ञसे इतर मूर्ख इस जनको, जिसने सब कुछ भुला दिया है, एक प्रकारसे मृत्यु ही प्राप्त हुई है तथा हालाहल रूप धन प्राप्त करने वालेको समझायें जिसको करके आपका प्रिय पात्र होकर कल्याण प्राप्त करे ॥७५॥

अभय दान

अनुवाद—जड़से मस्तक तक अंकुर समूह उत्पन्न होनेके कारण बड़े-बड़े शरीरसे उत्पन्न जैसे ध्यान स्थित मौन धारण किये मुनियोंकी तरह वनमें स्थित नव वृक्ष भी शोभित हैं, पुष्प नहीं निकलनेपर भी बहती हुई बड़े प्रेमकी धाराकी तरह भीगे हुए रुद्राक्षके बने हुए हारकी तरह बहुत मधुमक्खियोंकी पंक्तियाँ शोभित हो रहीं हैं ।।१७९।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मलयविलसज्जन्मा जन्मावधिद्रुममण्डलैः
सह च सहजप्रेमक्षेमक्षमं बहु निर्ममे।
मनसि पवनः स्मारं स्मारं तदेव शनैः शनैः
कुसुमविशिखा देशाद्देशान्तरं प्रतिपद्यते ॥१८०॥

मरुत्वर्णनम्

धीरः पितापि मलयो मलयोपपन्नो
धीरस्तथैव विटपी सुरभिस्वभावः।
स्थाने तदेष मलयाचलगर्भजन्मा
यन्माधवे[1] भवति धीरतरः समीरः ॥१८१॥

कुञ्जे कुञ्जेऽभिगुञ्जद्भ्रमरवति गजभ्रान्तितो दत्तझम्पः
पुन्नागानां प्रकम्पं जनयति विकसत्केसरासङ्गपिङ्गः।
आरोहत्याद्रिशृङ्गं मनसिजरभसं वर्धयन्बम्भ्रमीति
क्षुत्क्षामो लेढि तोयं मलयगिरिदरीकेसरी गन्धवाहः ॥१८२

अनुवाद - जन्मसे लेकर वृक्ष समूहके साथ मलय पवतपर विलासपूर्ण जन्म व्यतीत करनेवाला और साथमें प्रेमके आनन्दको जिसने मनाया वह पवन, यही स्मरणकर करके धीरे-धीरे कुसुमित गलियोंमें एक स्थानसे दूसरे स्थानपर जारहा है ॥१८०॥

मरुत वर्णन

अनुवाद—पिता मलयाचल भी धीर युक्त है, इसी प्रकार वृक्ष भी सुन्दर-सुगन्ध स्वभाव वाला धीर है, यह भी उचित ही है कि बसन्त आनेपर मलयाचलके मध्यमें जन्म लेनेवाला वायु भी अत्यन्त धीर है ॥१८१॥

अनुवाद - गूँजते हुए भ्रमरवाली कुञ्ज-कुञ्जमें हाथीकी भ्रान्तिसे झम्प झटका-सा देता हुआ पवन, खिले हुए केसरके मिल जानेसे पिङ्गल वर्ण जैसा पुन्नागमें कम्प उत्पन्नकर रहा है, पर्वतके शिखरपर चढ़ रहा है, कामदेवके वेगको बढ़ाते हुए घूम रहा है, मलयाचल गुफामें सिंहकी तरह यह पवन क्षुधासे क्षाम होकर जल चाट रहा है ॥१८२॥

---

(1) वसन्ते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अलिश्रेणीवर्णनम्

अलिश्रेणीवेणी स्तवक[1] परिपीनस्तनतटे
विकासे व्यानम्रां मुकुलपुलकव्याकुलतनुः ।
स्पृशन्तं वासन्तो पवनमुपकान्त पिकरुतै-
र्धुनाना मूर्धानं न हि न हि न होति स्थगयति ॥१८३॥

क्रन्दन्मौलिन्दवृन्दं हरति सुमनसां भोगभागं परागं
माध्वीकं मुग्धधीः कः पिबति ++++++++
+++++++++++++++++++++
+++ स्मिन्प्रचलति पवने भावि को वेद कीदृक् ॥१८४॥

विभिन्नदेशनायिकानांवर्णनम्

लाटी वक्षोज शाटी स्पृशति निविशते केरलीकेलिवाटीं
कार्णाटीकर्णनाटी भवति सह नटन्माधवीकुड्मलेन ।
काञ्चीनां पुष्पकाञ्चीं भजति सुमनसा प्रस्खलत्त्यच्छधूलौ
तैलाङ्गी दृग्विभङ्गीमनुभवति मधौ गन्धवाहो मदान्धः ॥१८५

अलि श्रेणी-वर्णन

अनुवाद—वसन्त-ऋतुमें फूलनेवाली वासन्ती लता भ्रमर पंक्तिकी वेणी बनाए स्थूल पुष्प गुच्छ रूप स्तनके विकसित होनेपर नम्र होती हुई कलिका-रूप पुलकसे पूर्ण शरीरवाली, स्पर्श करते हुए उपकान्त पवनको कोयलके शब्दसे फिर धुनती हुई, न न न ऐसा कहकर पवनको स्पर्श करनेसे रोकती है ॥१८३॥

अनुवाद—भ्रमर समूहको क्रन्दन कराते हुए पुष्पोंके सुन्दर परागको हरणकर रहा है, मुग्ध बुद्धिवाला कौन मधुका पानकर रहा है ऐसे वायुके चलने पर कौन जाने क्या होगा ॥१८४॥

नोट—इस श्लोकमें द्वितीयचरणका परार्द्ध भाग व सम्पूर्ण तृतीयचरण तथा चतुर्थचरणका पूर्वार्द्ध भाग प्राप्य नहीं है ॥

विभिन्न देशोंकी नायिकाओंका वर्णन

अनुवाद—यह पवन वसन्तमें अन्धा होकर लाट देश वासिनी स्त्रीके स्तनके ऊपर शाटीका स्पर्शकर रहा है, केरल देश वासिनीकी क्रीड़ा भूमिमें घुस

(1) गुच्छः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पम्पाझम्पाप्तकम्पः शिशिरभरतया सानुकम्पान्तराणा-
मङ्के पङ्केरुहाणां विदधदनुगतिं पीतवान्माघ्य माध्वीम् ।
मत्तो मत्तालिवत्तु स्खलति करुणयोत्थापिताश्चेल्लवङ्ग्या
तामङ्गीकृत्य रङ्गो दलयति पवनः कश्चले स्नेहबन्धः ॥१८६

वृक्षवर्णनम्

दृप्यत्पुन्नागनागः परिगलितजगद्गन्ध[1]वाहोऽग्रवाहः
फुल्लाशोकप्रवाहः प्रतपनदहनारब्धदिक्चक्रदाहः ।
गर्जद्भृङ्गालिनिर्यद्भटभृतभुवनः कोकिलाकाहलानां
ध्वानैरासीद् वसन्तो नृपतिरिव वियद्यापितारापताकः ॥१८७॥

पक्षिवर्णनम्

रसालैराशालंकृतपिक रसालैरुदयते
रसालैराशालंकृतिरपि रसालं कृतिरपि ।

रहा है, माधवी कलिकाके साथ क्रीड़ा करता हुआ कर्णाट वासिनीके कर्णकी क्रीड़ा कर रहा है, काञ्ची देश वासिनीकी पुष्पोंकी बनी काञ्चीका सेवनकर रहा है स्वच्छ धूलिमें फूलोंको लेकर फिसल रहा है ॥१८५॥

अनुवाद—पम्पापर वायुके झोंकेसे कम्पित होकर शीतके कारण दयालु कमलोंकी गोदमें गति करते हुए तथा माध्वीकको पीकर मतवाले भ्रमरकी तरह गिरता है, करुणा करके लवङ्गोके द्वारा उठाया हुआ, उसको स्वीकार करके फिर रङ्गमें फसकर उसे तोड़ देता है, ऐसे चञ्चलमें बताओ कौन स्नेह कर सकता है । १८६॥

वृक्षोंका वर्णन

अनुवाद—इस समय राजाकी तरह बसन्तकी शोभा है, अभिमानी पुन्नाग ही इसका हाथो है संसारकी गन्ध लेकर आगे-आगे चल रहा है, प्रफुल्ल अशोक साथमें हैं, दुःखदायी कामाग्निसे सब दिशाओंको जलाना प्रारम्भकर दिया है गरजते हुए निकलनेवाले भ्रमर रूप योधाओंसे सब लोक भर गया है, कोयलोंके बाजोंकी ध्वनिके साथ आकाशमें फहराती ताराओंकी पताका लेकर बसन्त निकला है ॥१७८॥

पक्षी-वर्णन

अनुवाद—दिशाओंको अलंकृत करनेवाले कोयलके शब्दोंके साथ आम

---

(1) "पृषदश्वोगन्धवाहानिलाशुगाः" वायुः (अ० को० १।१।६२) ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

विशालाभिर्गीत व्यसनसुखशालाभिरिव तै-
रलीनामालोभिः सह सुरभिलीलाः प्रथयताम् ।।१८८।।
घनानिच्छन्नानि भ्रमरनिवहेनोपरिसदा
सदारेणास्वाद्य प्रचुरमधु सम्भूय रसता ।
अदभ्राम्राणीवाविरत रसवर्षीणि सुरभा-
वसीम भ्राजन्ते दिशि दिशि कुलानि क्षितिरुहाम् ।।१८९।।
अशोकानां प्रसूनानि प्रसूनेषोः शरा इव ।
अशोभन्त दलत्पान्थ शोणशोणिताशोणशोचिषः ।।१९०।।
चञ्चूपुटानीव न किं शुकानां पटूनि पुष्पाण्यपि किंशुकानाम् ।
सुरागभागीनि विदारयन्ति मधौ मनोबिम्बफलानि यूनाम् ।।१९१
[1]कोविदार कुसुमेन कोविदाः के विदारितहृदो न साधिताः ।
कम्पितेन पवमानझम्पतश्चम्पकेन भुवि के न कम्पिताः ।।१९२

शोभित है उन आमोंसे दिशाओंमें भी शोभा होगई है, प्रत्येककी कृतियाँ रसपूर्ण जैसी प्रतीत होतीं हैं इस प्रकार विशाल सङ्गीतके कारण सुखमें विभोर होती हुई भ्रमर पंक्तियोंके साथ सुरभि सुन्दर गन्धकी लीला बड़ी अच्छी मालूम होतीं है ।।१८८।।

अनुवाद—स्त्रियोंके साथ ऊपर घूमते हुए भ्रमर समूह मिलकर जिनके प्रचुर मधुका आस्वादन करते हैं ऐसे वने छाये हुए बादलोंकी तरह निरन्तर रस बरसानेवाले वृक्षोंके समूह बसन्त-ऋतुमें दिशाओं-दिशाओंमें असीम शोभा दे रहे हैं ।।१८९।।

अनुवाद—अशोक वृक्षके पुष्प पथिकोंके रुधिरका शोषण करनेवाले लाल कान्तिवाले कामदेवके वाणकी तरह शोभा दे रहे हैं ।।१९०।।

अनुवाद—किंशुकके (ढाकके) सुन्दर फूल क्या तोतेकी चंचु पुटकी तरह नहीं हैं जो सुन्दर रङ्गवाले युवकोंके मनरूपी बिम्ब फलको बसन्त ऋतुमें विदीर्ण करते रहते हैं ।।१९१।।

अनुवाद—कोविदार (कचनार) के फूलने किस बुद्धिमान्के हृदयको विदीर्ण नहीं किया और वायुके झोकेसे काँपते हुए चम्पकने पृथ्वीपर किसको कम्पित नहीं कर दिया ।।१९२।।

---

(1) कचनार इति ख्यातस्तरुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भ्रमाद्भ्रमन्तः स्फुटचम्पकेषु पक्षाहतोद्भूतरजोभरेषु ।
ज्वलच्छिखानां स्मरपावकानां पुष्पन्धया[1] धूमधियंवितेनुः ॥१९३॥

विरमतु नाम श्रीदामन्, किमनुवर्ण्यते कुसुमसायकसामन्तो वसन्तो हेमन्तोऽग्रसर इवानुभूयते सोऽयम् । यत्र खलु दिनपतिदैन्यावलोकनादिव दिवसा अपि शोकवशाः सुपरिजनोचिताचरणीयमापिरे दैन्यम् । किमपरमम्भोजिनी प्रणयिन्यपि प्रियजनपरिभव दर्शनान्निधनमेव परं साधीय इति निधनमेव साधयामास पूर्वम् । अलिकुलमपि कमलवियोगादेव समाकुलीभूय भूमीषु भूमीरुहेषु ककुभि नभस्यपि निःश्वस्य भूरि भ्रामं भ्रामं कलितकमलिनी विच्छेदावसादोच्छेदाय दूयत एव केवलम् । परितो हिमसमयसमीक्षणक्षणादेव क्षणदापि[2] क्षणदायिनी हिमानीमहसो हिमानोमहा अपि क्षणदोऽभूत् क्षणदायाश्च, इति पुनरनयोरेव दोषादोषाकरयोरसीमा भूमा बहुकालम् ॥१९४॥

अनुवाद—पङ्खोंके लगनेसे उड़ती हुई धूल वाले खिले हुए चम्पकके फूलपर घूमते हुए भ्रमर समूह जलती हुई लौ वाले कामदेवकी अग्निके ऊपर धुंएकी बुद्धि उत्पन्न कर देते हैं ॥१९३॥

अनुवाद– अये श्री दामन् ! आप विराम करो, क्या कामदेवके सामन्त वसन्तका वर्णन किया जा रहा है ? ये आगे हेमन्त सा दीख रहा है जहाँ सूर्यकी दीनता देखने से ही मानो दिनों में भी शोकके वश में होकर परिजनके आचरण योग्य दीन भावको प्राप्त कर लिया । अधिक क्या प्रेम करने वाली अम्भोजिनीने भी प्रिय जनका परिभव देखनेसे पहले निधन अच्छा है यह सोचकर पहले ही निधन स्वीकार कर लिया । भ्रमर समूह भी कमलोंके वियोगसे दुःखी होकर पृथिवी पर वृक्षों पर दिशाओं में आकाश में श्वांस लेते हुए इधर उधर बहुत घूम घूम कर कमलिनी के वियोगके दुःखको दूर करनेके लिए केवल दुःखी हो रहा है । चारों ओर शीतकाल देखनेके समयसे ही रात्रि भी सुख देने वाली अति शीतकाल के समय का तेज भी शीतके समय सुखदायी तथा रात्रिको भी सुखदायी होता है, इन्ही दोनों रात्रि व चन्द्रमा का ही हर समय असीम आनन्द है ॥१९४॥

---

(1) भ्रमराः ।
(2) रात्रि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

न भानोरुद्रेकः कमलकुलमुत्खातमभितो
[1]हिमानीभिः स्मेरा सह चरति तारा सहचरी ।
अतो मन्दं दिवि चलति चन्द्रोऽलस इव
प्रमोदाग्द्राघद्राघीयस्यजनि खलु हेमन्तरजनी ॥१९५

महावंशोद्भूतः पदमपि महोच्चैरधिगतः
परद्रोहाच्चण्डं प्रतिफलमखण्डं कलयति ।
पराभूय ग्रीष्मेऽनिशमपि निशानायकमपि
प्रतिप्राप्नोत्येतत्फलमिह दिनेशः सह दिनैः ॥१९६॥

पादे पतन्नपि नयेन निरीक्षितोऽपि
दोषाकरः स बत हन्ति पुरः सरोजम् ।
दीनं दिनं दिनमणिः पुनरित्थमाप
कुण्डोदरे पिपतिषुर्दहनोपकण्ठम्[2] ॥१९७॥

अनुवाद—सूर्य में उग्रता नहीं रही, कमल समूह भी सब ओर नष्ट सा हो गया, उग्र हिमके साथ मुस्कराती हुई तारा सहचरी घूम रही है । इसीलिए ताराके हिमके साथ रहने पर चन्द्रमा अलसाया हुआ दिन में धीरे धीरे चलता है प्रसन्नता से हिमकी रात्रि बड़ी हो गई है ॥१९५ ।

अनुवाद—सूर्य बड़े वंश में उत्पन्न हुआ और इसने ऊँचा ही पद प्राप्त किया । दूसरेसे द्रोह करने पर पूर्ण फल प्राप्त हो जाता है । ग्रीष्म ऋतु में रात, दिन निशानायक चन्द्रमा को तिरस्कृत करके यह सूर्य दिनवृद्धिके साथ अपना पूर्ण प्रतिशोध ले लेगा ॥१९६॥

अनुवाद—पैरों पर गिरते हुए भी तथा नीति से देखा हुआ भी चन्द्रमा ने सामने ही कमलको नष्ट कर दिया यह दुःख है । अग्निके पास कुण्डके मध्य गिरते हुए सूर्य ने फिर उस दुःखी दिनको इस प्रकार प्राप्त कर लिया ॥१९७॥

---

(1) हिमानी हिम सहतिः अ० को० १।३।१८ "महद्हिमं हिमानी"
(2) वसन्त तिलका छन्दः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पद्मिनीविरहखेदकातरः पद्मिनीपतिरनायुरादरः ।
प्रत्यहं दहनमेति मृत्यवे मृत्युतोऽपि विरहोऽतिदुःसहः ।।
कुन्दमन्दिरगतोऽपि विन्दते नैव निर्वृतिलवं मधुव्रतः ।
आदे मधु न सस्वदे पदे शश्वदेव कमलस्य धावति ।।१९९।।
माकन्दवृन्दे विकचेऽपि कुन्दे स यत्र कुत्रापि विधिक्रमेण ।
बभ्राम मैलिन्दयुवा विरामं मनः पुनः केवल पद्मिनोषु ।।२००।।
व्यतनुत सुधासेकानैकां विलासवतीं प्रति
प्रबलतुहिनक्रोडक्रीडत्तरो हिमवासरः ।
यदहनि मुहुः कान्तारान्तर्वसन्तमुपेयुषी
प्रियतममलंचक्रे निशामिव साधु सा ।।२०१।।
नीहारद्युतिदुःसहोऽग्रमिहिकाव्यग्रो हयानां गणो
दीर्घामित्यरविन्ददीर्घनयना तां याचते यामिनीम् ।

अनुवाद—पद्मिनीके विरहके दुखसे दुखी होकर पद्मिनी पति सूर्य आयु में आदर न करके प्रतिदिन मृत्यु प्राप्त करने दहन समुद्रकी अग्नि में जाता है । वियोग मृत्यु से भी अधिक कठिन है ।।१९८।।

विशेष—'वियोग .... है' यह सूक्ति है ।

अनुवाद—कुन्द पुष्पके स्थान पर जाकर भ्रमर थोड़ा भी सन्तोष प्राप्त नहीं कर पाता, वह मधु उसे स्वादु प्रतीत नहीं होता फिर वह सदा ही कमलके स्थान पर दौड़ता रहता है ।।१९९।।

अनुवाद—माकन्दके समूह पर खिले हुए कुन्द पर जहाँ कहीं पर भी भाग्यके क्रम से भ्रमर युवक भ्रमण ही करता है मन तो उसका केवल पद्मिनी में ही निवास करता है ।।२००।।

अनुवाद प्रवल तुषारकी गोद में क्रीड़ा करने वाला हिमवासर एक विलासवती प्रियतमाके सम्मुख अनेक प्रकारके सुधा सेक क्रीड़ा विलास प्रकट करता है । दुर्गममार्ग वाले कान्तार में निवास करते हुए प्रियतमको रात्रिके समान वह प्रियतमा दिन में ही अलंकृत कर देती है । २०१।।

अनुवाद—तुषार की द्युति से कठोर तथा हिमके कारण जिसमें अश्व समूह व्यग्र हो जाय ऐसी दीर्घ रात्रिको कमलके समान दीर्घ नेत्र वाली कामिनी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्योन्यं भुजसन्धिसन्धितवपुर्वक्त्रावसक्तानन्नं
निर्भेदं प्रतिपद्य गच्छति तयोर्व्यापूर्णदीर्घ स्पृहा ॥२०२

मृग्यते मृगदशामृगा (प्रिया) नने सा निशानभिमतैव कोकयोः ।
एकमेव बत वस्तु कुत्रचित्कालकूटकटु कुत्रचित्सुधा ॥२०३॥

इति सरभसमभिलपितुमारभमाणो मुहुरपि मूर्धानमाधुनानो मधुरिपुरुपनीय कामपि स्मृतिमाकस्मिकीमाह श्रीदामानमुत्स्मिताननो नाम । अहो श्रीदामन्महदुपस्थितं महदुपस्थितं कौतूहलपरम्पराणाङ्कारणमसाधारणं किमपि ॥२०४॥

चौर लीला

[1]न किं ते हेमन्ते हृदि भवति हे मन्त्रित गुरोः
कीशोरीणां चोलीहरणमुरु लाभादपि निधेः ।

चाहती है जिसमें दोनों भुजाओं की सन्धि से जुड़े हुए शरीरके दोनोंके मुख परस्पर मिलकर अभिन्न होकर प्रिय तथा प्रियतमा दोनोंकी बढ़ी हुई इच्छाओंको पूर्ण कर सकें ॥२०२॥

अनुवाद—मृगनयनी प्रियाके मुख पर निशाको ढूढ़ रही है जिस निशाको कोक ओर कोकी नहीं चाहते । एक ही वस्तु कहीं कालकूट विष है और कहीं वही वस्तु अमृतके समान है ॥२०३॥

अनुवाद—मधुरिपु कृष्ण सिरको कंपाते हुए बड़े वेग से यही कहना चाहते थे कि अकस्मात् कुछ स्मरण करके मुस्कराते हुए श्रीदामा से कहने लगे—हे श्री दामन् ! बहुत बड़े कौतूहलोंका करने वाला एक असाधारण कारण उपस्थित हो गया, उपस्थित हो गया ॥२०४॥

चोर लीला

अनुवाद—हे गुरु से मन्त्रणा करने वाले ! निधिके लाभ से भी अधिक उत्कृष्ट किशोरी बालाओंका चोली हरण हेमन्त ऋतु में क्या तुम्हारे हृदय में

---

(1) गोपी वस्त्र हरण कथा भा० १० स्कन्ध २२ अध्याय

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्रुमारूढो गूढः क्वचन रसमूढः किसलयै-
रपश्यस्तास्तोये जलमुचि चलद् विद्युत इव ॥२०५॥

गच्छन्तीनां मृदु भुजलताश्रेणिबन्धाभिरामं
प्रातः प्रातर्मिहिरदुहितुः कूलकौतूहलायाः [लीनाम्]
अर्वाचीनव्रज-मृगदृशामङ्घ्रि भूषालिघोषा
वर्षन्तीव श्रुतिमधिसुधावर्षतोऽद्यापि ता मे ॥२०६॥

वीतचोलमपकुन्तलबन्धं श्वान्तमम्भसि विदुर्न तदङ्गम् ।
चैलमोषमपि[1] घोषकुमार्यः[2] केलिमाहुरिह विस्मृतिमूलम् ॥२०७

वीक्ष्य ताः प्रकुपितो विहरन्तीः स्वैरमम्भसि हि मे पवमानः ।
वर्द्धयन्मिहिरजालहरीर्द्राक् व्यातनोद्‌वरतनोस्तनुकम्पम् ॥२०८

नहीं आता ? वृक्ष पर कहीं नव किसलयों में छिपे हुए आनन्दमें विभोर तुम बादलोंमें चञ्चल बिजलीकी तरह कन्याओंको देखो ॥२०५॥

अनुवाद—कोमल भुजलताओं द्वारा पंक्ति बाँधकर प्रातःकाल यमुनाके तटपर पहुँचने का कौतूहल धारण करके जाती हुई व्रजकी मृग सदृश नेत्रवाली कन्याओंके चरण भूषणोंके शब्दघोष आज भी मेरे कानोंमें अमृतवर्षा कर रहे हैं ॥२०६॥

अनुवाद—गोप कुमारियाँ इस प्रकार जल विहार कर रही हैं कि वस्त्र भी उतर गये हैं, केशबन्ध खुल गये हैं, अपने अङ्गों का भी ध्यान नहीं है। वस्त्रों के उतरने पर भी अपने आपको भूलकर जल-क्रीड़ा कर रही हैं ॥२०७॥

अनुवाद—शीतकालमें इच्छापूर्वक जलमें विहार करते हुए उनको देखकर पवन कुपित हो गया, यमुनाकी लहरियों को बढ़ाते हुए उसने कन्याओंके शरीरमें कम्प उत्पन्न कर दिया। २०८॥ [श्रीमद्भागवत् पुराणमें चीरलीला प्रसङ्ग में गोपबालाओंका यमुना स्नान वर्णित है, यह स्नान हेमन्त ऋतुके मार्गशीष मास में हुआ था और इसमें वे शीतसे काँप उठी थीं।—

हेमन्ते प्रथमे मासि नन्दव्रज कुमारिका।
चेरुर्हविष्यं भुञ्जानाकात्यायन्यर्चन व्रतम्॥

---

(1) वस्त्रहरणम्।
(2) गोपबालाः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

एकदैव परिवृत्य पपातोड्डीय वारिनटितप्रतिबिम्बम् ।
अम्बरादिव तदम्बरभूमौ वल्लवीनयनखञ्जनपंक्तिः ।।२०९।।

दिङ्नभः पुलिनतोयतटान्तव्यापिनी व्रजवनीरमणीनाम् ।
स्मर्यते तदनुधावति[1] धावद्दृष्टि पङ्क्तिरपरोत्पलसृष्टिः ।।२१०।

कुमारिकाभिर्वृक्षे वस्त्रदर्शनम्

[2]नीपशाखिनी तदम्बरमस्मान्वीक्ष्य ताः स्मितमधु व्यधुरन्तः ।
दन्त-दष्ट रसनाञ्चलमिष्टं तेन मुष्टमधुनाऽपि मनो मे ।।२११।।

ह्रीरुदेति सविरोधमुदग्रे याचितुं वसनमसनाभिः ।
साऽपि चेदभिजिता मुखपद्मं नैव मुञ्चतिमनाक्स्मितबन्धः ।।२१२

अनुवाद—एक बारमें ही जलमें हिलता हुआ प्रतिबिम्ब उड़कर घूमकर गिरा, गोप कुमारियोंकी खञ्जन सदृश नयन पंक्ति भी आकाश से आकाशकी ही तरह वहीं गिरी ।।२०९।।

अनुवाद—उस प्रतिबिम्बके दौड़ते हुए ब्रज भूमिकी उन रमणियोंकी दौड़ती हुई दृष्टि भी दिशा, आकाश, रेत एवं जल तट पर व्याप्त होने वाली इस प्रकार गिरते हुए प्रतीत हुई जिससे दूसरी कमलोंकी सृष्टिका स्मरण हो जाता था ।।२१०।।

अनुवाद—कदम्बके वृक्षपर उस वस्त्र समूह तथा हमको देखकर दाँतोंसे रसनाके अग्रभागको काटते हुये, ऐसा सुन्दर मधु मुस्कान किया, जिससे अब भी मेरा मन, चुराया हुआ प्रतीत हो रहा है ।।२११।।

अनुवाद—वस्त्रोंकी याचना करनेको आगे विरोध करती हुई लज्जा उदित हो रही है, वह भी अगर जीती जाय तो मुस्कानका बन्धन जरा भी मुख कमलको नहीं छोड़ता ।।२१२।।

---

(1) शत्रन्त सप्तमीयम् ।
(2) कदम्बवृक्षे:

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काचिदेष सखि नन्दकुमारः कः क एवमपरां मुहुराह ।
पश्यति स्म बहुकाऽपि निगूढं मां कदम्बमधिरूढमरूढा ॥२१३॥

अम्बरं वितर वातरंहसा वेपितं[1] वपुरुपैति किं ब्रुवे ।
नीतमम्बरमखेलि कौतुकाज्जातमेतदिदमाहकाचन ॥२१४॥

इति मधुरमुदीरितगोपः किशोरीणामहमवधाय सुधातोऽपि रसायनमसाधारणमभ्यधां किमपि ॥२१५॥

गोपिकानामुक्तिः

धूलि धूसरमकारि समीरैरित्युपाहृतमिहैव नतभ्रु ।
[2]एहि वस्त्रमिदमस्ति गृहाण स्वैरमेव न विरुणद्धि च कोऽपि ॥२१६

पाणिमात्रवसनाऽपि गिरा मे वाक्प्रपंचविरमादुदतिष्ठत् ।
साऽप्ययाचत यदेत्यनिचोलं तत्तु सौरत सुखादपि काम्यम् ॥२१७

अनुवाद—फिर कोई सखी दूसरी से बोली—हे सखि क्या यह नन्द-कुमार है ? और कोई कदम्ब पर छिपे खड़े हुये मुझको स्वयम् पृथिवी पर खड़ी हुई देखती थी ॥२१३॥

अनुवाद—और कोई यह कहती थी, कि वस्त्र दे दो, देहिवासांसि धर्मज्ञ (भा० १०।२) हे धर्मज्ञ ! हमें वस्त्र दे दो] वायुके वेगसे शरीर काँप रहा है । मैं क्या कहूँ, कपड़े ले लिये, खेल भी हो गया, कौतुकसे यह सब हो गया ॥

अनुवाद—इस प्रकार गोप किशोरियोंके मधुर वचन समझकर अमृतसे भी सुन्दर रसायन असाधारण कुछ वचन मैंने कहे ॥२१५॥

गोपियों की उक्ति

अनुवाद—नम्र भृकुटि वाली ! वायु ने इन वस्त्रोंको धूलि धूसरित कर दिया है, इसलिये मैंने ये उठा लिए हैं, ये वस्त्र हैं, इनको ले लो, आओ इच्छापूर्वक ग्रहण करो, कोई रोकता नहीं है ॥२१६॥

अनुवाद—मेरे वचन समाप्त होते ही मेरे कथनसे केवल हाथसे शरीरको ढके हुये, जब वस्त्र शून्य शरीरसे अपने कपड़ोंको माँगा, वह सुख सुरत सुखसे उत्तम था ॥२१७॥

---

(1) कम्पितम् टुवेपृ कम्पने
(2) आगच्छ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

मीलिताक्षमवनामितकुञ्चत्कायमौलिरचिताञ्जलिबन्धम् ।
तन्नमस्करणमस्ति मनःस्थं नित्यनव्यमिव गोपकिशोर्याः ॥२१८॥

संवादः---

अम्बरेण रहिता अपि तास्ताः पश्यति स्मितमुखं पुर एव ।
तत्तनूषु तरसा पुलकौघैर्गाढमक्रियत कञ्चुकबन्धः ॥२१९॥

पार्वती भजनकामितमन्तर्मण्डली मृगदृशामनुकूलम् ।
मद्वितीर्णमवकीर्ण कदम्बं साम्बरं त्वमनुताम्बरमेव ॥२२०॥

ब्रूत वामनयना व्रतकामं पृच्छतीति मयि ता मुहुरेव ।
नावदन्यदधिकोदित लज्जास्तेन नाभिदधिरे बत किम् किम् ॥२२१

व्रत फलमुपलभ्य सुभ्रुवस्ता वसनजुषोऽपि न वेश्म गन्तुमैच्छन् ।
मयि कृतसमये कथं कथञ्चिन्निजभवनं ययुरङ्घ्रिभिर्न चित्तैः ॥

अनुवाद—आँखे बन्द करके झुके हुए और तिरछे शरीर और मस्तक किए, हाथ जोड़कर, मनमें ही स्थित जो उस गोप किशोरीका नमस्कार था वह नित्य नया और सुन्दर है ॥२१८॥

संवाद

अनुवाद—वस्त्रसे रहित उन सबको तथा मुस्कराते हुये मुखको वह सामने देखते थे, उनके शरीर पर रोम समूहने शीघ्र ही घना कंचुक रूप बन्धन कर दिया था ॥२१९॥

अनुवाद—मृगनयनी गोप किशोरियोंकी मण्डलीने पार्वतीके भजनसे जो अनुकूल कामना की थी वह हमारे दिये हुये वस्त्र सहित उस कदम्बको उन्होंने वस्त्र ही माना और वर माना ॥२२०॥

अनुवाद—हे वाम नयना किशोरियो ! अपने व्रतकी कामना बताओ, ऐसा मेरे पूछने पर जो उन्होंने लज्जा होनेके कारण कुछ नहीं कहा, उससे बताओ उन्होंने क्या नहीं कह दिया ॥२२१॥

अनुवाद—व्रतके फलको पाकर भी उन सुन्दर भृकुटि वाली स्त्रियोंने वस्त्र पहनकर भी घर जाना नहीं चाहा, मेरे शपथ करने पर भी अपने घरको पैरों से गई, परन्तु चित्त से नहीं गई ॥२२२॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वामभ्रुवः प्रचलिता अपि ता गृहेषु
भ्रान्त्या वनं विविशुरायुरापगायाम् ।
हित्वा विभूषणमुपेत्य पुनस्तदाहु-
रातेनिरे मयि च दृष्टि सरोज वृष्टिम् ।।२२३।।

यां तु चिन्तयति गोप किशोरी विभ्रती ममवरं वरमन्तः ।
सा शरज्जयति हंस निनादैः पुष्पकेतुमभि[1] जागरयन्ती ।।२२४।।

इति सरसवादमादरादभिधाय सायमवधाय माधवो धेनु धोरणीमादाय मोदाय च निखिलचराचराणामनुवादयन् माधुरीणामधरीकरण मधुरीमधुरीणाधरलीनामुरलीमुरुलीलयानुशीलयामास बल्लवावासम् ।।२२५।।

अथ कदाचिदभिरामाराम भूमिरुह[2] ग्रामच्छायाकुलविश्राम-धामसु यमुनाकूल एव तरुणतटकदम्बतरुमूलेष्वनुकूलेष्वभि नवजलद-तमालकोमलकमनीय नीलिमानं नीलमणि मान मानयन्तधो मधुसूदनम्

अनुवाद—वह गोप किशोरियाँ घर गईं, परन्तु भूलकर विभूषण छोड़कर वनमें घुस गईं, फिर यमुनापर आगईं, आकर विभूषण ग्रहण किए तथा उन्होंने मेरे ऊपर दृष्टिरूपी कमलोंकी वर्षाकी [भागवत पुराणमें इस प्रकारका न तो कृष्णके मुखसे वचन है और न ऐसा भाव ही, वहाँ तो केवल कथा प्रसङ्गमें वस्त्रहरण लीला है और यह काव्य है, अतः कविकी सहज कल्पना है ।।२२३।।

अनुवाद—मेरे उत्तम वरको हृदयमें धारण करतीं हुईं गोप किशोरी जिस शरद ऋतुकी चिन्ता कर रहीं थीं, वही 'शरद' हंसोंके निनादसे कामदेवको जगाती हुई आगई ।।२२४।

अनुवाद—ऐसे सरल वचनोंको बड़े आदरसे कहकर, सायंकाल जानकर माधवने धेनु समूहको लेकर, सब चर-अचरकी प्रसन्नताके लिये मधुरताको अधर करनेवाली मधुरिमाकी अग्रणी, अधरपर रक्खी मुरलीकी सुन्दर लीलासे, गोप निवासको आनन्दितकर दिया ।।२२५।।

अनुवाद- इसके अनन्तर किसी समय सुन्दर बगीचेके वृक्ष समूहकी छायामें आकुलजनोंके विश्राम स्थानपर यमुनाके तटपर बड़े-बड़े अनुकूल कदम्ब

---

(1) कामदेवम् । (2) वृक्षः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तमेकाकिनमावसन्तम् समतीतत्रिभग वया अपि प्रतिभा प्रागल्भ्यस्फुरदधर पुरीतटीब पटीयसी काऽपि शनैः शनैः समुपतस्थे रहःस्थमाभोरी[1] । आगत्य चावलोक्य चाह--अहो नन्दनन्दनोऽसि, भवन्तमनुसन्धायान्धैव कतिकति दुरहवनोऽभिधावन्तीधोरेतरदति श्रान्तास्मि । तदहं क्षणं विश्रान्ति सुखमनुभूय निवेदयिष्यामीति । हरिरन्तश्चिन्तयति । अहो समजनि कोऽपि कुतूहलानामयं पन्था भवतु नाम ॥२२६

अयं तत्सम्बन्धी यदि भवति पन्थाः समुदितो
मदन्तर्यश्चिन्तामनुभवति चिन्तामणिमिव ।
अकस्मादस्माकं सदयमनुकूलेन विधिना
तदा जाने पाणेरुपरि निधिरानीय घटितः ॥२२७॥

अथ वल्लवी निवेदयतिः—"वेणुवादनेन दशावर्णनं"

अधिवेणु तनोषि नन्दसूनो मृदु झं कारमवारमप्रयासः ।
नवगोपचमूरुलोचनानां हृदि दावानल एव जाज्वलीति ॥२२८॥

वृक्षकी जड़में नवीन मेघ व तमालके समान कोमल कमनीय नीलिमा धारण करनेवाले, उसके नीचे अकेले बैठे हुए माधवके पास बीती हुई अवस्थावाली होते हुए भी बुद्धिकी प्रगलभतासे अधर पुट तटके फड़कनेकी तरह चतुर एकान्तमें बैठे हुए माधवके पास धीरे-धीरे कोई आभीरी गोपी उपस्थित हुई, आकर और देखकर बोली—अहो ! तुम नन्दके नन्दन हो, आपको ध्यानकर करके अन्धेकी तरह कितने-कितने बुरे मार्गोंपर उतावली-सी दौड़ती हुई थक गई हूँ, सो मैं थोड़ी देर विश्रामका सुख लेकर निवेदन करूँगी । हरि मनमें सोचने लगे—यह कोई कुतूहलका मार्ग, या विष उत्पन्न होगया, अस्तु जो कुछ हो ॥२२६॥

अनुवाद—मेरे हृदयमें चिन्तामणिकी तरह जिस विषयकी चिन्ता हो रही है, यदि यह मार्ग उससे ही सम्बन्ध रखता है तब तो यह समझना चाहिये कि अकस्मात् ही दया करते हुए अनुकूल विधाताने हमारे हाथपर कोई निधि लाकर रख दी ॥२२७॥ इसका वह गोपी निवेदन करती है—

वेणुवादन दशा वर्णन

अनुवाद हे नन्दसूनो ! जब तुम वंशीमें बिना प्रयासके, न रोकने

---

(1) गोपी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नीतमम्बरमनीतिरीदृशी दहते[1] दहन एव दाहभूः ।
अम्बरं वितर तेन सम्वृताः सन्तु गोपसुदृशोऽपि निर्वृताः ।।२२९।।
नन्द नन्दन ? भवान्निरञ्जनः सन्तु खञ्जनदृशो निरञ्जनाः ।
त्वत्समानबिधिनैव किन्तु तत्ताप सन्तति कथासु विस्मयः ।।२३०
अहो अनुरागातिशयो नाम
वरमम्ब वरं वृणे कुमारं व्रजराजस्य किशोर कं व्रजस्य ।
अभिधातुमिदं पुरस्तु देव्याः पुलकव्याकुलविग्रहा न शेके ।।२३१
सुतनोरास्य महास्यं नयनमलास्यं तनूरनाभरणा ।
प्रति वृन्दावन भवनं विलुठति धूलीषु धूसरीभूय ।।२३२।।

राधादशावर्णनम्

तन्द्रीं चन्द्रमुखी जहौ भयमधाच्चन्द्राच्च चन्द्रावली
राधात्वधि पयोधि मध्यपतिता लीलावती मुह्यति ।

योग्य कोमल झङ्कार, निकालते हो तब मृग जैसे नयनवाली गोपियोंके हृदयमें दावानल जलने लगती हैं ।।२२८।।

अनुवाद—वस्त्र ले लिए यह अन्याय है, जलानेवाली अग्नि जैसो जला रही है, वस्त्र दे दो जिससे गोपियाँ सन्तुष्ट हो जाँय और सब वस्त्र पहन लें ।।२२९।।

अनुवाद—हे नन्द नन्दन ! आप निरञ्जन है, खञ्जनके समान नेत्र-वाली गोपियाँ भी निरञ्जन हो जाँय, आपके ही समान विधिसे वह भी हो जाय । किन्तु ताप उत्पन्न करनेकी बातमें आश्चर्य हो रहा है ।।२३०।।

अहो यह अतिशय अनुराग है

अनुवाद—हे अम्ब ! मैं ब्रजके किशोर तथा व्रजके राजा नन्दके कुमारको वरदानमें माँगती हूँ । यह मैं रोमाञ्चसे शरीर पुलकित होनेके कारण देवीके सामने नहीं कह सकी ।।२३१।।

अनुवाद—सुन्दर शरीरवाले कृष्णका हास्य-शून्य मुख और चंचलता-शून्य शरीर, ऐसी दशामें वह वृन्दावनके प्रत्येक गृहमें धूलिसे धूसरित होकर लोटता रहता है ।।२३२।।

राधाकी दशाका वर्णन

अनुवाद—चन्द्रमुखीने आलस्य छोड़ दिया, चन्द्रावली चन्द्रसे डरने

---

(1) अत्रात्मनेपदं चिन्त्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कालं चैक कलावती शशिकलाग्रस्तैवमास्ताशया
गौरीगायति ते गुणं गुणवती गाथा च शेषायते ॥२३३॥

[1]कलधौतलतेव काप्यकम्पा भुविशम्पेव चिरं परा चकम्पे।
अपरांप्रति चाम्पकीवं माला बत हालाहलमेव वर्षतीव ॥२३४॥

पिदधाति परा सुधाकरे कृतवातायनभेददीधितौ।
बहदस्त्रमजस्त्रमाकुलः प्रणिधानैक धनः सखीजनः ॥२३५॥

मदना मदनानलावलीढा विषयः कामरुषोऽपि कामसेना।
ललिता ललितानि विस्मरन्ती तव रूपैक निरूपणं कुरुते ॥२३६॥

दिवसादिव सा भयं निशातः कलयामास कलेशचन्द्रिकापि।
कमला कमलादपैति कामं बत वामं कमहो वयं वदामः ॥२३७॥

व्यजनैर्विजनैः सखीजनैः सजनैः सद्मभिरङ्गमार्जनैः।
न हि निर्वृतिमाददे क्षणं शरविद्धेव मृगी मृगीक्षणा ॥२३८॥

लगी है, राधा, चिन्तारूपी समुद्रमें पड़ी है, लीलावती, मोहमें पड़ी है शशी इसी प्रकार आशामें ग्रस्त है, गौरी, तुम्हारे गुण गा रही है, गुणवाली गाथा फिर भी शेष है ॥२३३॥

अनुवाद—कोई सुवर्णलताकी तरह कम्पसे शून्य है, दूसरी बिजलीकी तरह पृथ्वीपर काँप रही है, चम्पककी जैसी माला किसीको मानों हलाहला विष जैसा बरसा रही है ॥२३४॥

अनुवाद-कोई झरोखेके छेदसे किरणोंके आनेसे चन्द्रमाको ढक रही है, अपने परम धन कृष्णके ध्यानमें सखियाँ आकुल हैं, सदा आसू बहा रहीं हैं ॥२३५॥

अनुवाब—मदना, कामाग्निसे व्याप्त है, कामपर क्रोध करनेवाला कामदेवकी सेनाका ध्यानकर रहा है, ललिता, अपने ललितभावको भूलकर तुम्हारे रूपका निरूपणकर रही है ॥२३६॥

अनुवाद—कलेश (कलानाथ) चन्द्रमाकी चाँदनी भी दिनकी तरह रात्रिसे डरकर रही है, कमला कमलसे इच्छानुसार हट रहो है। खेद है, कि हम अब किसकी उलटी बात है कहें ? ॥२३८॥

अनुवाद—पंखोंसे, एकान्तसे, सखीजनोंके उपायसे, मनुष्योंसे, घरोंसे, अङ्गोंके मार्जनसे, किसी प्रकार भी बाणसे विद्ध मृगीकी तरह क्षणभरको भी सन्तोष नहीं है ॥२३८॥

---

(1) सुवर्णम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अटवीविटपी[1] विलूनशाखः सरसो निःसरसीरुहा बभूव ।
उपचारविधौ विधौ हि वामे बत वृन्दावनवामलोचनानाम् ॥२३९

सौगन्ध्यैरलिमन्धयञ्शिशिरयन्नभ्यङ्गभासङ्गतः
शम्पायाः स्मरसम्पदः समुदभूत्कम्पाय पम्पानिलः ।
निःश्वासैः सह दुसहः पुनरसौ तस्याः सखीनां क्षणा-
दुत्तापं रचयाञ्चकार जगतां ज्वालेन दावानली ॥२४०॥

बहु वर्षति चन्दनं सखी मनुते भानुमती हुताशनम् ।
तदनङ्गकला कलेवरेऽजनि धूपैः श्वसितेन धूयते ॥२४१

करतलपमिलत्कपोलपाली नयनाम्भोलहरीभवत्कफोणिः[2] ।
अचलत्तनुवल्लिरनिर्निमेषा शशिलेखा लिखितेव लक्ष्यते सा ॥२४२

अक्षि चन्द्रमसि वर्ष्म मारुते कर्णमर्पयति कोकिलारुते ।
किं करोमि विरहेण कातरा वाममाचरति कामकन्दली ॥२४३॥

अनुवाद— वृन्दावनकी गोपियोंकी चिकित्साके लिए विधाता उल्टा होनेपर वनके वृक्षोंकी सब शाखायें तोड़लीं, तालाबोंके सब कमल तोड़ लिए फिर भी शान्ति न मिली ॥२३९॥

अनुवाद— सुगन्धसे भ्रमरोंको अन्धा बनाते हुए शरीरमें लगकर उसको शीतल बनाते हुए कामकी सम्पत्ति बिजली आदिमें कम्प उत्पन्न करनेके लिये पम्पाकी वायु उत्पन्न होरही है । निःश्वासोंके साथ वह वायु असहनीय होगया है । दावानलकी तरह प्रतीत होनेवाले उस वायुने अपनी ज्वालासे संसारको बहुत ताप उत्पन्न कर दिया है ॥२४०॥

अनुवाद—सखी चन्दन बरसाती-सी खूब लगाती है परन्तु भानुमती उसे वियोग दशामें अग्नि मानती है वह कामकी कला शरीरसे उत्पन्न होगई है, धूपके द्वारा श्वाससे और बढ़ती है ॥२४१॥

अनुवाद—हाथकी शय्यापर कपोल रखे हुए नेत्र जलकी लहरी कोहनी तक बहाते हुए शरीरको अचल बनाए शून्य चन्द्रलेखाकी तरह लिखित सी दशामें वह दीख रही है ॥२४२॥

अनुवाद—चन्द्रमामें आँखें लगाये सुन्दर शरीरको वायुमें सुखाती,

---

(1) वृक्षः । (2) स्यात् कफोणिस्तुकूर्परः । अ० को० २।६।८० (कोहनी) कं=सुखं स्फोरयति, केन सुखेन फणति=कफोणिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बहु यच्छति पल्लवं नवं परिदाह्योऽयमिति क्रुधा मुधा ।
भुवि दर्पणबिम्बबिम्बिते सति चन्द्रे चकितैव सुन्दरी ॥२४४॥
गमनेन सहैव नन्दसूनोर्व्यसनापन्नमनोभिरङ्गनाभिः ।
भवतः करतः करे गृहीतो नवनीलस्मरशस्त्रकालसर्पः ॥२४५॥
स्पन्दमावहति चेन्मणिबन्धः प्रत्ययो भवति चेतसि बन्धोः ।
जीवनीयमिति जीवित भूयः किं निवेद्यमनवद्यगुणायाः ॥२४६॥
वेणुगीतमधिगत्य दूरतो द्वारतोऽपि बहिरङ्गणादपि ।
आगता अपि न शेकुरस्त्रुभिर्नेत्रवर्त्मनि गते त्वयीक्षितुम् ॥२४७॥
उपपद्य तदेव दंदहीति ज्वलनः प्रेम च वामलोचनानाम् ।
स तु नीरस एव सारसाक्ष त्वयि तास्ताः सरसाः परं गरीयान् ॥२४८

भूतमेकमपस्नेहं दंदहीति हुताशनः ।
पञ्चभूतानि भूतानां प्रेमायमपरोऽनलः ॥२४९॥

कोयलके शब्दोंमें कान लगा रही है, क्या करूँ, वह विरहसे दुःखी कामदेवकी कलिका उलटा ही आचरणकर रही है ॥२४३॥

अनुवाद—यह गोपी जलाने योग्य है इसलिये बहुतसे नव पल्लव क्रोधसे इसको काम देता है पृथ्वीपर दर्पणमें चन्द्रमाके प्रतिबिम्बत होनेपर यह सुन्दरी चकित हो जाती है ॥२४४॥

अनुवाद—नन्दसूनु कृष्णके जानेके साथही व्यसनसे दुःखी मनवाली गोपियोंने नया नीला कामदेवका कालसर्प रूपी शस्त्र आपके हाथसे अपने हाथमें पकड़ लिया ॥२४५॥

अनुवाद—प्रकोष्ठ (कलाई) कुछ स्पन्द होते ही चित्तमें कृष्णके आनेका विश्वास होता है। हे जीवित, अब जीना चाहिये यह सोचती है इससे अधिक और शुद्ध गुणवालोकी क्या बात कहूँ ॥२४६॥

अनुवाद—वेणुगीतको दूरसे सुनकर दूरसे बाहर आंगनसे भी आई हुई भी नेत्रोंमें आँसुओंके आजानेके कारण तुमको देखनेमें समर्थ नहीं हो सकी ॥२४७

अनुवाद—वही आंसुओंकी आग आकर वाम लोचनाओंके प्रेमको जला रही है, हे सारसाक्ष वह नीरस है तुममें वे गोपियाँ सरस प्रेम करतीं हैं परन्तु अग्नि वह बहुत बड़ी है ॥२४८॥

अनुवाद—पाँचभूतोंमें एक भूत अग्नि स्नेह शून्य है वही बहुत जला

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किमखिलमभिधेयमित्थमाकुलमेव सकलं वृन्दावनगोपकिशोरी-वृन्दम् । परन्तु वृषभानुकुलजलधिजनिरप्रतिरूपरूपरसकन्दली राधा संसारासाधारणमाधुरीधामपरमसुखसाधा बाधावशादावेदयामास मे किमपि गूढम् ॥२५०॥

तरुस्कन्धारूढः क्वचन दलगूढः सरभसं
पयोमानाः पश्यन्वसनरहिताः स्मेरनयनः ।
अकस्मादेवास्मन्नयनपथिकोऽद्यापि हृदि मे
स मेघश्रीमोघीकरणरुचिरेकोऽधिवसति ॥२५१॥

दलयत्यनिलोऽपि देहमिन्दुर्दयनेन्दीवरमेव दंदहीति ।
गिरमुद्गिरतीव कोकिलापि भ्रमरोऽपि भ्रमरोपमातनोति ॥२५२
भवनं च वनं च निर्विशेषं विषमेषुर्विषमेव वन्हिरिन्दुः ।
अलयः प्रलयप्रवर्त्तिनोऽमी फणिफूत्कारगणः समीरणोऽपि ॥२५३॥

रही है, भूतोंमें सबमें प्रेम है, यह अनल भूत दूसरा है इसमें स्नेह नहीं है ॥२४९॥

अनुवाद—अधिक क्या कहें इसी प्रकार वृन्दावनकी सब गोप किशोरियोंका समुदाय बहुत दुःखी है परन्तु वृषभानुके कुलरूपी समुद्रमें उत्पन्न होनेवाली अनुपमेय रूप रसकी कलिका राधा ससारकी असाधारण माधुरीका केन्द्र परमसुख देनेवालीने बाधाके कारण मुझसे कुछ गूढ़ वचन कहे हैं ॥२५०॥

अनुवाद—कहीं पेड़की शाखापर बैठा हुआ वेगसे पत्तोंमें छिपा हुआ प्रेम भरे नयनवाला वस्त्रशून्य गोपियोंको देखता हुआ, मेघकी शोभाको भी व्यर्थ करनेवाली शोभावाला कोई अकस्मात् ही आज भी मेरे नयनोंका पथिक होकर मेरे हृदयमें बस रहा है ॥२५१॥

अनुवाद वायु भी शरीरको सुखाए डालता है, चन्द्रमा नेत्र कमलोंको जलाए डालता है, कोयल भी वाणीको उगल-सी रही है, भ्रमर भी भ्रमका आरोपकर रहा है ॥२५२॥

अनुवाद - घर और वन एक जैसा मालूम होता है, कामदेव विष तथा चन्द्रमा अग्नि होरहा है, भ्रमर प्रलय किए देते हैं, वायु भी सर्पकी फुसकार जैसा मालूम होता है ॥२५३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति वि दतनिखिलान्तस्तत्त्वा तत्तापयापनग्रहिला भवन्तं महौषधमिव मृगयमाणाचिरेण प्रतिपद्यमानाऽस्मि । समुचितमवधीय[1] माधव ? विधीयतामचिरेण । अथ स्मितमधुरमुखेन्दुर्नन्दनन्दनस्तामुवाच मधुमुचा वाचा ॥२५४॥

अवधेहि विधेहि राधिकाया हृदि बाधाप्रशमं मदीयवाचा ।
सुदृशामिह विप्रयोगवन्हौ प्रतिकारः प्रियवत्प्रियप्रियोक्तिः ॥२५५

राधा महिमा

श्रुती राधानामश्रवणसमकालं पुलकिता
मनोऽभून्निर्मग्नं प्रमदजलधौ मे निरवधौ ।
दृशौ दृश्युत्कण्ठे वपुरपि तदासङ्गरसिकं
मदातमा तादात्म्यं भजति भणितैर्दू ति तदलम् ॥२५६॥

अनुवाद—इस प्रकार हृदयके सब तत्वको जानकर इस सन्तापको दूर करनेके विचारसे इसकी महान् औषधि आपको ढूढ़ती हुई शीघ्र ही मैं आपके पास उपस्थित हुई हूं । हे माधव ! इसको अच्छी तरहसे विचार करके शीघ्रही उपाय कीजिये । मुखरूपी चन्द्रमें मन्द मुसकान करते हुए, नन्द नन्दन मधुर्वर्षिणी वाणी द्वारा कहने लगे ॥२५४॥

अनुवाद—ध्यान दीजिये, राधाके हृदयमें मेरी वाणीसे बाधाको शान्त कीजिये; सुनयना स्त्रियोंकी वियोगाग्निका उपाय प्रेमीकी प्रियवाणी ही होती है ॥२५५॥

राधा-महिमा

अनुवाद--कृष्ण कहते हैं हे दूती राधाका नाम सुनते ही मेरे कान पुलकित होगये, प्रेमरूपी असीम समुद्रमें मेरा मन मग्न होगया, आँखें देखनेको उत्कण्ठित होगईं, शरीर भी उसके मिलनेको रसिक हो उठा, मेरी आतमा उसकी आत्मामें तदाकार होगई है, अधिक कहनेसे क्या ? ॥२५६॥

---

(1) श्रुत्वा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विगाढव्यालोढा सुखयति हि पीयूषसरसी
दृशोन्दोरागूढा कलयति कला कामपि मुदम् ।
श्रुतापि ध्यातापि प्रथयति परानन्दलहरी-
परीणाहं राधा परमियमसाधारणनिधिः ॥२५७॥

शीतांशोरपि शीतलं सुमृदुलं सम्यक् शिरीषादपि
द्राक्षातोऽपि बिलक्षणं सुरधुनी क्षीरादपि क्षेमदम् ।
माध्वीकाधिकमाधुरीकमधरीकुर्वत्सुधासौभगं
राधानाम मनोभिराममपरं वस्तु प्रशस्तेः पदम् ॥२५८॥

अभ्युत्थानविधानसाधनपदे पाणी धनुर्योजितौ
विश्वोद्वीक्षणवीक्षणे च हृदयात्मानौ च बाणो धनुः ।
मध्वीकं च सुधा च पुष्पधनुषो बाह्यान्तराप्यायिनी
दिव्ये नव्यमहौषधी विजयते राधेति वर्णद्वयी ॥२५९॥

अयि खलु[1] संचारिणी नामानुक्रमेणानुमीयते रूपमपि तस्याः ।
निरूपणीयेतरदेवस्याखिलस्यापि आभीरी सोल्लासं निवेदयामास ॥

अनुवाद—अमृतकी सरसी (तालाब) स्नानसे या चखनेसे सुख देती है, चन्द्रमाकी कला आँखोंमें पड़कर विचित्र सुख देती है, सुनी हुई तथा ध्यानकी हुई आनन्दकी एक विशाल लहरी राधा यह असाधारण निधि है ॥२५७॥

अनुवाद—चन्द्रमासे भी शीतल शिरीषसे भी अत्यन्त कोमल द्राक्षा (दाख) से भी विलक्षण, गङ्गाजलसे भी अधिक कल्याणप्रद, माध्वीकके रससे भी अधिक मधुर सुधाकी सुन्दरताको नष्ट करता हुआ राधाका नाम मनको अच्छा लगनेवाला प्रशंसाका परम स्थान है ॥२५८॥

अनुवाद—अभ्युत्थान करनेके साधन अथवा धनुषको जोड़नेवाले दोनों हाथ, विश्वको देखनेके दो नेत्र अथवा हृदय और आत्मा अथवा धनुष और बाण अथवा कामदेवके बाहर और भीतर व्याप्त होनेवाले अथवा दिव्य नव्य दो महौषधियाँ ये राधा नामके दो वर्ण हैं, इनकी जय हो ॥२५९॥

अनुवाद—अयि दूती नामके ही अनुक्रमसे उसके रूपका भी अनुमान किया जा सकता है, वह आभीरी निरूपण योग्य सबका बड़ी प्रसन्नतासे वर्णन करने लगी ॥२६०॥

---

(1) "दूतीसंचारिके समेत्यमरे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राधा केश वर्णनं

तद्धम्मिल्लरुचा शुचातिविधुरा चक्रन्द कादम्बिनी
धारास्रैश्चमरी च काननचरी भूता[1] लिरुच्चामरम् ।
गाहन्ते कुसुमान्तराणि मधुपास्तापी कलापी वने
मर्त्तुं द्राक्कवलीकरोति गरलव्यालोलमाशीविषम् ॥२६१॥

राधा वदन वर्णनम्

नन्दनन्दन ! तदाननत्विषा यत्तुषारकिरणो मलीमसः ।
उत्रमस्त्रकमदस्त्रमुत्सृजन् शून्य एव चिरमेव घूर्णते ॥२६२॥
राधिकामुखमुदीक्ष्य लज्जयामज्जदम्भसि मुमूर्षु वारिजम् ।
तत्र वार्यवरुणद्धि यद्धि तं चञ्चरीकविषमित्युपाददे ॥२६३॥
आननेन विजितेन्दुमाधुरी लोचनेन च हृतैण[2] चातुरी ।
एतयोरिति मिथो युतिर्यतः सन्धिरुल्लसति तुल्यतापयोः ॥२६४॥

राधा केश वर्णन

अनुवाद—उसके वालोंकी शोभाको देखकर शोकसे दुःखी होकर मेघ-माला क्रन्दन करने लगी. चमरी वनमें घूमनेवाली ऊपर पूँछ करके आँसू छोड़ने लगी, भौंरे दूसरे फूलोंपर जाने लगे, तापसे दुःखी मोर वन में मरनेको तत्काल विषसे पूर्ण सर्पोंको कवलित करने लगे ॥२६१॥

राधा वदन वर्णन

अनुवाद -हे नन्दनन्दन ! उसके मुखकी कान्तिसे चन्द्रमा मलीन हो गया और किरणोंसे निरन्तर आँसू छोड़ता हुआ शून्यमें घूमता रहता है ॥२६२॥

अनुवाद—राधाके मुखको देखकर लज्जासे मृत्यु चाहता हुआ कमल पानीमें डूबा । वहाँ जब जलने उसे रोका तब उस भ्रमर रूपी विषको उसने ग्रहण कर लिया ॥२६३॥

अनुवाद - मुखसे चन्द्रमाकी मधुरताको जीता, नेत्रसे मृगकी चतुरता छीन ली, इन दोनोंका जब परस्पर सङ्ग होता है तभी तुल्य तापवाले इन दोनोंकी सन्धि बड़ी अच्छी शोभा देती है । यही चन्द्रमें मृगका निवास है ॥२६४।

---

(1) आलिर्वयस्या । (2) मृगी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राधा नयन शोभा

चाञ्चल्यं खलु खञ्जनेषु हरिणीनेत्रेष्वपि द्राघिमा
सौभाग्य सरसीरुहेषु शफरीवृन्देष्वमंस्त श्रियः।
किन्तु श्रीवृषभानुभूनयनयोः कोणेऽपि को नेक्ष्यते
वैदग्धीमहिमा जयन्ति हि चतुः षष्ठिः कलाः सृष्टयः ॥२६५॥

एकार्द्धं स्तनपाणिपादनयनभ्रूकर्णगण्डस्थलं
भिन्नार्द्धस्फुरितस्य तत्तदखिलस्योपम्यमालम्बते।
इत्थं खञ्जनगर्वगञ्जनदृशस्तस्या यदि स्यात्तुला
स्यादङ्गस्य तदा द्वितीयरहितं यत्तद् द्वितीयं हि तत् ॥२६६॥

अवयव वर्णनम्

स्थलाम्भोजे रम्भायुगमितविपर्यासमवनी–
नभः कूपो वल्ली तदुपरि बभौ कोकमिथुनम्।

राधा नयन शोभा

अनुवाद—खञ्जन पक्षीमें चञ्चलता है, मृगके नेत्रोंमें दीर्घता है, कमलोंमें सौभाग्य है शफरी समूहमें शोभा है किन्तु राधाके नेत्रोंके कोणमें भी कौन नहीं देखता, ऐसी वैदग्धी महिमा है, चौंसठ कलाओंकी सृष्टि उसमें है उनकी जय हो ॥२६५॥

अनुवाद—आधे शरीरके प्रथम भागके एक एक स्तन पाणिपाद नयन भ्रू कर्ण और गण्ड स्थल, दूसरे आधे भागके द्वितीय स्तनादिके उपमा रूपमें आ सकते हैं, इस प्रकार खञ्जनके गर्वको नष्ट करनेवाले नेत्रोंवाली उस राधाके अङ्गोंकी उपमा दूसरी नहीं है, यदि है तो उसके द्वितीय अङ्ग ही उपमामें आ सकते हैं ॥२६६॥

अवयव वर्णन

अनुवाद—स्थलमें चरणरूप कमल हो उसके ऊपर विपरीत कदलीके स्तम्भरूप दो पैर तव पृथ्वी रूप सम स्तर फिर आकाश कूपरूपी नाभि फिर लता-रूप शरीर उसपर कोकका जोड़ारूपी दो स्तन फिर ग्रीवामें तीन रेखाके ऊपर मुखरूपी चन्द्रमामें कमलरूप नेत्र उसमें ही इन्दुकी कलारूप मस्तक, तम अन्धकार

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्रिरेखीन्दुश्चेन्दीवरमपि कलेन्दोरथ तमः
श्रुता वा दृष्टा वा न खलु भुवि सा सृष्टिरपरा[1] ।।२६७।।

हरिस्तु सपुलकमनुभूतमुद्भावयामास ।

चलन्ती पादार्धं वलदलसभारा यदवद-
द्वयस्यः किं हास्यः कथमिह विधास्ये गतिविधिम् ।
उदञ्चत्कालिन्दीलहरिरधुनान्दोलयति मा-
मनभ्यासादभ्यागतमिव तदद्यापि हृदि मे ।।२६८।।

दहने हेमपरीक्षा प्रेमपरीक्षा परं विरहे ।
द्वयमपि दहति द्वितयं द्वितयं द्वयमुज्ज्वलीकुरुते ।।२६९।।

अनुसंचर संचारिणि संचारय चारुलोचनामचिरात् ।
घनकुचजघनभरार्त्तां बिभ्रत्तां न चक्षमे गन्तुम् ।।२७०।।

सपुलकमाभीरकुशलकिशोरीसंचारिणी भणति स्म-
सममेव द्वयोः प्रेम समैव विरहव्यथा ।
ावस्था समैवोक्तिः समयोः समुदञ्चति ।।२७१।।

रूप केश हों तव उपमा बन सके पृथ्वीपर ऐसी दूसरी सृष्टि नहीं है । अब कृष्णने रोमाञ्च सहित अनुभव किया हुआ रूप वर्णन किया ।।२६७।।

अनुवाद–आधा पैर चलती हुई आलस्यके भारसे झुकती हुई उसने कहा—हँसी करनेसे क्या लाभ । यह कैसे चल मिलेगा, उठती हुई यमुनाकी लहरी अभ्यागतकी तरह मुझको अभ्यास न होनेसे इस समय हृदयमें हिला रही है।।

अनुवाद—अग्निमें सोनेकी परीक्षा होती है और प्रेमकी परीक्षा विरहमें होती है, दोनों-दोनोंको जलाते हैं और दोनोंको उज्ज्वलकर देते हैं ।।२६९।।

अनुवाद–हे दूती ! तुम जाओ और सुन्दर नेत्रवालीको शीघ्र ले आओ घने स्तन और जंघाओंके भारसे दुःखी उसको धारण करके मैं चलनेमें समर्थ नहीं हूँ ।।२७०।।

अनुवाद- रोमांचित होकर आभीर कुलकी किशोरी कहने लगी—दोनों का समान ही प्रेम है और विरह व्यथा भी समान है, समान दोनोंकी अवस्था भी उक्ति भी समान ही होरही है ।।२७१।।

---

(1) "स्त्रीरत्न सृष्टिरपरा प्रतिभाति सा मे" कालिदास ने भी सृष्टि से भिन्न शकुन्तला का रूप माना । (शाकु०)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रसिकपुरन्दर ! पशुपपुरन्दरानन्दसन्दोह सन्दीपन तव संदेशार्पण सुधाभिषेचनादावर्त्तयामि राधाया[1] विरहबाधातो निर्गच्छतः प्राणान् ॥२७२॥

अथ मधुमथनमधुरतरानुवादमादरादनुस्मरन्ती सविस्मयं मन्दं मन्दं पथि गच्छन्ती मूर्द्धानं मुहुराधूनयन्ती चेतसि चिन्तयामास किमपि मुहुराभीरी ॥२७३॥

दृष्ट्वा विग्रहसौभगं रतिपतिव्रीडावलीढां तरो-
रालीढां तनुमत्यजत्सह धनुर्भ्रू भङ्गभाजो हरेः ।
मर्यादां च कुलव्रतं च विपुलं धैर्यं च हित्वा भव-
त्स्थाने तद्यदिमं प्रति व्रजसरोजाक्षी कुलं व्याकुलम् ॥२७४॥

न कूले कालिन्द्या न च पटुनि मूले विटपिनां
निकुञ्जे नो गुञ्जन्मधुलिहि मनोनिर्वृतिभवः ।
समन्तात्पन्थानं मुहुरपि दिगन्तान्कलयतो
गतायामाभीर्यामुदभवदधैर्यं मुरभिदः ॥२७५॥

अनुवाद—हे रसिक शिरोमणि ! हे गोपोंके अधीश्वर !! आनन्द समूहके बढ़ानेवाले !!! तुम्हारे सन्देश रूप अमृताभिषेकसे राधाके विरह व्यथासे निकलते हुए प्राणोंको वापस ला रही हूँ ॥२७२॥

अनुवाद—इसके अनन्तर मधु मथन कृष्ण ! मधुर वचनोंको आदरपूर्वक स्मरण करती हुई, विस्मयपूर्वक धीरे-धीरे मार्गमें चलती हुई, बार-बार सिर हिलाती हुई, वह आभीरी कुछ सोचने लगी ॥२७३॥

अनुवाद—धनुषरूपी भृकुटीके भङ्गको धारण करनेवाले हरिके शरीर की सुन्दरताको तथा कामदेवको भी लज्जित करनेवाले कदम्ब वृक्षपर बैठे शरीर को देखकर ब्रजकी गोपाङ्गनायें मर्यादा कुलव्रत तथा विपुल धैर्यको छोड़कर आकुल होगईं, यह उचित ही है ॥२७४॥

अनुवाद—उस आभीरी दूतीके चले जानेपर न यमुनाके तटपर, न सुन्दर वृक्षोंकी जड़में, न गूँजते हुए भोंरोंवाली निकुञ्जमें, उनका मन सन्तुष्ट होता था, चारों ओर बार-बार मार्गको दिशाओंको देखते हुए मुरशत्रु कृष्णको बड़ा अधैर्य घबराहट-सी उतालवापन होरहा था ॥२७५॥

---

(1) राधाके साथ क्रीडा भागवतमें नाम्ना नहीं है।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कलङ्ककणकैतवाद्भुवनजैत्रलेखाङ्कितः
शशी कुसुमधन्वनो विजय केतुरभ्राजत ।
तमो जलधि कुम्भभूर्विरहि धूमकेतुर्दिशां
प्रसाधन सुसाधनं स्तवक कर्णभूषा निशः ।।२७६।।

क्वचिद्भ्रमरभाङ्कृतिः क्वचन चन्द्रिकाहंकृतिः
क्वचिद्विकचमल्लिका नवदला क्वचिद्वल्लिका ।
क्वचित्कुमुदिनी वनी सुरभिरेति शीतोऽनिलः
कृतं मुरभिदः शरैः स्मृतिभुवा विलूनं मनः ।।२७७।।

त्रियामायां यामे गतवति विरामे जनगतां
गतानां हृद्वामे शकलयति कामे च विशिखैः[1] ।
जगद्धैर्यध्वंसो सह ललित हंसो गमनया
रिरंसी श्री वंशोमकृत शरणं शीलितवनः ।।२७८।।

वंशीरवः

धैर्यं निर्दलयन्मनो विकलयन्प्रत्यङ्गमुत्तुङ्गयन् ।
लोमाञ्चं परिपञ्चयन्नपि मनोजन्मानमेणीदृशाम् ।

अनुवाद—कलंकके चिह्नके बहाने तीनों लोकोंको जीतनेके चिह्नसे शोभित चन्द्रमा, कामदेवका विजयध्वज शोभित होरहा है, यह समुद्रसे उत्पन्न विरहियोंको दुःख देनेवाला, दिशामें धूमकेतु तथा निशारूपी नायिकाके शृङ्गारको पूर्ण करनेका साधन गुच्छारूप कर्णभूषण है ।।२७६।।

अनुवाद—कहीं भ्रमरोंकी भाँय-भाँय, कहीं चन्द्रिकाकी हुङ्कार, कहीं खिली हुई मल्लिकायें, कहीं नवीन दलवाली लतायें, कहीं कुमुदिनीकी गन्धवाली शीतल वायु आरही है, इस प्रकार मुरशत्रु कृष्णका मन, कामदेवने बाणोंसे छिन्न-भिन्नकर दिया ।।२७७।।

अनुवाद—रात्रिके एक प्रहर व्यतीत होनेपर, विपरीत कामदेवके द्वारा बाणोंसे हृदयको विदीर्ण करनेपर ललित हंसीके समान गमन करनेवाली राधाके साथ रमण करनेकी इच्छावाले, संसारके धैर्यको नष्ट करनेवाले तथा वनको शोभित करनेवाले कृष्णने अपनी सुन्दर वंशीको उठाया ।।२७८।।

वंशी धुन

अनुवाद—धैर्यको नष्ट करते हुए मनको विकल करते हुए प्रत्येक अङ्ग

---

(1) बाणैः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्दं मन्दमुदञ्चति स्म जगतोमस्पन्दयमंदय-
न्वातं श्रीवृषभानुभूगुणगणाशंशी स वंशीरवः ॥२७९॥

धूलोधूसरिता धरासु शयिता व्यस्ताः समस्ताः क्षणा-
दुत्पेतुर्मुरलो मनोज्ञ ललिता धाराभिरारात्स्त्रियः ।
द्राघीयोदिन दुर्धरारुण - कराक्रान्ताः समन्ताद्यथा
सान्द्राभिर्निशि चन्द्रिकाभिरचिराद् बद्धालयः शालयः ॥२८०॥

वर्त्मावर्त्म विदुर्न किन्तु मुरली संगीत भंगीकला-
मङ्गीकृत्य हरेः कुरङ्ग नयनाः सर्वा समं निर्ययुः ।
उल्लङ्घ्यापि निसर्गदुर्गपदवीं दुर्वार धारामुचां
धारा धोरणिधूयमानधृतयो नद्यः समुद्रं यथा ॥२८१॥

गोपीनांवने आह्वानम्

आययुर्मृगदृशो निशि कुञ्जं मञ्जुगुञ्जदलि संचितपुञ्जम् ।
काम कोटिकमनीयतमश्रीः श्रीपतिर्जयति यत्ररिरंसी ॥२८२॥

को विकसित करते हुए, रोमाञ्चको बढ़ाते हुए तथा हरिणकी नयनवाली गोपियों के कामदेवको भी बढ़ाते हुए, पृथ्वीको जड़ बनाते हुए और वायुको मन्द करते हुए, राधाके गुणका वर्णन करनेवाला, मधुर वंशीका निनाद, धीरे-धीरे उठने लगा ॥२७९॥

अनुवाद—तत्काल गोपियाँ, मुरलीकी मनोहर ललित धाराओंसे पृथ्वी पर गिर गईं, धूलि-धूसरित होगईं, सब क्षणभरमें अस्त-व्यस्त होगईं, बड़े दिनोंको नहीं धारण करने योग्य लाल किरणोंसे आक्रान्त शालिकी तरह रात्रिमें चारों ओरसे चिकनी सुन्दर चाँदनीसे पंक्ति बाँधे हुए होगईं ॥२८०॥

अनुवाद—मार्ग और कुमार्गको न जान सकीं, किन्तु हरिके मुरलीके संगीतकी कलाको सुनकर ये कुरङ्ग नयना गोपियाँ सब एक साथ निकल पड़ीं, जैसे नहीं रोकने योग्य धारा छोड़नेवाले बादलोंके स्वाभाविक कठिन मार्गको पार करके जल धाराओंसे धीरजको नष्ट करती हुई भी नदियाँ समुद्रमें पहुँच जातीं हैं ॥२८१॥

गोपियोंका आह्वान

अनुवाद—सुन्दर गुञ्जन करते हुए भ्रमरोंके समूहवाली कुञ्जमें वे

CC-0. Agamnigam Digital Preseyation Foundation, Chandigarh

एकाकिनी भवनतो बहिराजगाम
नाम व्रजप्रणियिनी प्रियपीत चेताः ।
वर्त्मान्तरे पुनरनेकसहस्र संख्या
संख्या बभूव सविधे मधुसूदनस्य ।।२८३।।

पुरुप्रेमभाराः पुरानिर्विचारा वनं भेजिरे सुभ्रुवः कान्तिसाराः ।
प्रभासम्पदारब्ध चाम्पेयकम्पाः पृथुप्रावृडभ्रं यथादभ्रशम्पाः ।।२८४

नभः पूर्व शैलादिवापूर्वशोभाः शुभा सर्गतारा विधु प्रेमलोभाः ।
वचो ह्रीणवीणा नवीना प्रवीणावनं वेश्मतोऽगुर्गणा वल्लवीनाम् ।।२८५

अपश्यन्न यस्मिन्न देहालसेहा महाहेमहाराञ्चितं वीतगेहाः ।
मुकुन्दं सुकुन्दादमन्दाभदन्ता भृशं तापहन्ता रमकान्तकान्तम् ।।२८६

सब गोपियाँ रातमें हीं आगईं, जहाँ करोड़ों कामदेवोंसे सुन्दर शोभावाले तथा रमणकी इच्छावाले श्रीकृष्णजी विराज रहे थे ।।२८२।।

अनुवाद—प्रियके द्वारा जिसका चित्त पिया गया है, ऐसी व्रज प्रणयिनी राधा, अकेली भवनसे बाहर आगईं । हरिके पास आते-आते मार्गमें अनेक सहस्र संख्या होगई ।।२८३।।

अनुवाद—जिस प्रकार बड़े वर्षा-ऋतुके बादलोंमें बिजली शोभा देती है, उसी प्रकार अपनी प्रभासे चम्पाके पुष्पको भी कम्पित करनेवाली, अति प्रेमका भार धारण किये विचार शून्य होकर कान्ति शोभा ही मुख्य सार धारण किये सुन्दर भृकुटिवाली गोपियाँ वनमें उपस्थित होगईं ।।२८४।।

अनुवाद—पूर्व शैलसे जैसे आकाशकी शोभा होती है, चन्द्रमाके प्रेमकी शोभा अपूर्व शोभावाली ताराओंकी तरह अपने वचनसे वीणाको भी लज्जित करनेवाली प्रवीण और नवीन गोपियोंके समुदायके समुदाय घरसे वनको आ गये ।।२८५।।

अनुवाद—शरीरके आलसकी परवाह न करते हुए, घरकी इच्छा छोड़कर, कुन्दसे भी अच्छे उत्तम दाँतवाली गोपियोंने, सुवर्णके सुन्दर हारोंसे शोभित तापको नष्ट करने वाले, एकान्तमें प्रेम करने वाले कृष्णका आकर दर्शन किया ।।२८६।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तासां श्रृङ्गारशोभा

दृष्ट्वा दिष्ट्यैव दृष्ट्या कुवलय सुभगं गञ्जिताम्भोग सृष्ट्या
तुङ्गैरङ्गैस्त्रिभङ्गीं विदधत-मनुजुभ्रू विभङ्गोत्तरङ्गम् ।
मूले नीपस्य कूले दिनमणिदुहितुः[1] कोटिकन्दर्प दर्प–
द्रोहं मोहं दधुस्ताः क्वचनरचना वासना निर्जगाम ॥२८७॥

अथ संचारिणी चारु चातुरी साधुरीतिभिः ।
राधामाधाय सविधेऽभिदधे रस-वारिधेः ॥२८८॥

इयं राधाबाधाशतमपि समाधाय भवना–
द्वनान्तः कान्तारैः कथमपि तवानायि सविधे ।
खलश्रेणी मध्यान्मणिरिव समिद्धाहि शिरसो
रसोपेत्य प्रीत्यै तव ममविधेयं च व्यरमत् ॥२८९॥

अमुष्या किं ब्रूमो गति शिथिलता किं मृदुलता
निशोऽनैषोद्यामं कियति पथियाता श्रमवती ।
जहौ दाम क्वापि क्वचन मणिमञ्जीरमपरं
क्वचित्किंचित् किं तैस्त्रिभुवनविभूषा स्वयमिति ॥२९०॥

अनुवाद—कमल समूहको तिरस्कृत करनेवाली दृष्टिसे कुवलयके समान सुन्दर तथा उन्नत अङ्गोंमें त्रिभङ्गी स्वरूप धारण करते हुए, टेढ़ी भृकुटिकी भंगिमासे शोभित करोड़ों कामदेवके दर्पका दलन करनेवाले, भाग्यसे ही सुन्दर हरिका दर्शन करके वे गोपियाँ मुग्ध होगईं, बोलनेकी इच्छा न जाने कहाँ गईं ॥२८७॥

अनुवाद—इसके बाद वह दूती चतुरताकी सुन्दर रीतिसे रसके समुद्र हरिके पास राधाको लाकर कहने लगीं ॥२८८॥

अनुवाद—सैकड़ों बाधाओंका समाधान करके घरसे कठिन मार्गोंमें होते हुए वनके मध्यमें तुम्हारे पास इस राधाको लाईं हूं । दुष्टोंकी पंक्तिके मध्यसे इस प्रकार लाई, जैसे सर्पके सिरसे मणि लाई जाय, यह प्रेम करनेवाली तुम्हारी प्रीतिके लिए हो, मेरा कार्य अब समाप्त हुआ ॥२८९॥

अनुवाद—इसकी कोमलता व शरीरकी शिथिलताको क्या कहूँ. रात्रिका एक प्रहर बीता था, कुछ ही मार्ग चलनेसे थक गईं कहीं हार छोड़ा. कहीं मणि

---

(1) यमुना ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सावित्रलेखाजनि चित्रलेखाद् भूतामिताभामनुभूय भूयः ।
तिलोत्तमा नैकतिलोत्तमा सा मदालसा वीतमदालसैव ॥२९१॥
मेनामेनाङ्कलक्ष्मीमपि च पथि न ते कुर्वते लोचनानाम् ।
ये त्वासां हेमभासां सुमुखविधिवशाद दृक्पथे निष्पतन्ती ॥
रम्भा रम्भेव यासां भवति गणनया सोर्वशी चोर्वशी सा ।
श्रीसाम्यं भूरिकाम्यं मनसि वितनुते का शची का घृताची ॥२९२॥
सर्वासां भावमासां भृशमभणमिमाः प्रापिताः स्थापितास्ते
वंशीध्वानैः सुधाभिः श्रुतिबिल विलसद् द्वारतोऽन्तर्गताभिः ।
सम्भोदस्निग्धमुग्धध्वनिभिरिव हरे चातकीस्तुल्य कालं
चण्डांशुत्तापितास्ताः स्फुरदधररसैः प्रापिताः पारयन्तु ॥२९३॥
न हि स्नेहो देहे रतिरपि न गेहे स्मृतिरपि
त्वदन्यस्मिन्यस्मान्मतिरपि तदस्यामिति हरे ।

मञ्जीर छोड़े, कहीं कुछ छोड़ा, उन सबसे क्या, यह राधा तो स्वयं त्रिभुवनका भूषण है ॥२९०॥

अनुवाद—अद्भुत और अमित शोभाको देखकर चित्रलेखा सूर्यकी छाया जैसी लेखाकी तरह होगई, अनेक तिलोत्तमा जैसी आभा तिलोत्तमाने देखी, मदालसाका मदका आलस समाप्त हो गया ॥२९१॥

अनुवाद जिन्होंने इसकी स्वर्ण जैसी शोभाको देखा इनके सम्मुख मेनका इनकी शोभाके अंशके बराबर भी नहीं सुन्दर मुख होनेके कारण दृष्टिके सम्मुख आती हुई रम्भा, कदली, स्तम्भके समान जड़ होगई, गिनतीमें उर्वशी रह गई, उनकी शोभा मनमें बड़ी इच्छा उत्पन्न करती थी, शची और घृताची उनके सम्मुख कुछ नहीं थीं ॥२ २॥

अनुवाद—इन सबका भाव मैं आपके सामने बताती हूँ, जो आपके पास प्राप्त कराके स्थापित कराई है । वंशी ध्वनि से तथा कानोंके बिलमार्ग द्वारा अन्दर गई हुई सुधासे, बादलोंकी स्निग्ध और मुग्ध ध्वनिसे, चातकोंकी तरह एक साथ सूर्य किरणोंसे, तपी हुई की तरह स्फुरित ओष्ठ द्वारा प्राप्त हुई, प्रसन्न रहें ॥२९३॥

अनुवाद - शरीरमें तथा घरमें प्रेम नहीं, कुछ स्मृति नहीं, तुम्हारे अतिरिक्त किसीका भी स्मरण नहीं, हे हरे ! इसमें आपके अतिरिक्त कुछ ज्ञान नहीं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अमूषां यास्तोषा गणितगुणदोषा निरविश-
न्नरण्ये स्वैरिण्यः किमपरमनन्यैकशरणाः ॥२९४॥

दूती-संवादः

अलमलमतुलितजल[1]वाहव्यूह सुभग कलेवर ! वाग्जालैरहमासामविरतविरह प्रतीकार परिचर्यापर्याकुलास्मि, चिरपरिजागरसागरावगाह विकलास्मि, क्वचन तरुतलावलम्बिनी [2]यामिनीमपयापयामि निद्राभि नव दरिद्रा । वचो गणविनिस्यूतमनाः श्रीमधुसूदनो दूत्या स्मित मनोहारिभूत्याह परिमोहयन् । तव सविधचरी वृषभानुकिशोरी[3] काननचरी भूयानुभवति सहचरीभावम् । एता अपि तावदाभीरवर नागर्यो धैर्यौदार्य्य सौकुमार्यैकभूमयोऽनुभूयन्ते निकटचर्य्य एव आज्ञापालनकर्य्य एव ॥२९५॥ एतासामपि जननीजननीतिविलक्षणसम्बन्ध विशेषभागिनी भाविनी भवती एताः पृच्छतु कथमेकान्तविजनतया नगरवहिस्तया च तरुणतरु खण्डमण्डितया च मण्डप इव क्वचिदपि निकुञ्जपुञ्जरञ्जित वने समासीनमुदासीनमिव मामनुमादयति ।

गुण दोषको समझनेवाली कहीं वनमें चलीं गईं अब इनका आपके अतिरिक्त कोई शरण नहीं है ॥२९५॥

दूती संवाद

अनुवाद –अतुलित मेघ समूहके समान सुन्दर शरीरवाले आपके अधिक कहनेसे क्या, मैं इनके निरन्तर वियोगके दुःखका उपाय व सेवा करनेके कारण व्याकुल होरही हूँ, बहुत जागनेके कारण दुःखी होगई हूँ, निद्रा नहीं आनेके कारण विकल हूँ कहीं पेड़के नोचे सहारा लेकर रात्रि व्यतीत करूँगी (कृष्ण) उसकी वाणीसे आकृष्ट मन होकर और दूतीके मुस्कानकी शोभासे मुग्ध होकर बोले - तुम्हारे समीप रहनेवाली वृषभानुसुता राधा वन चारिणी होकर सहेली भावको निभा रही है और यह आभीर गोपियाँ धीरता सुकुमारता उदारता परममूर्ति निकट रहनेवाली आज्ञापालन करनेवाली यह सब प्रतीत होरही है इन सबका मातृत्व लोक व्यवहार अन्य सम्बन्धसे विशेष कल्याण करनेवाली आप इनसे पूछें—

---

(1) मेघः ।
(2) रात्रिम् ।
(3) राधा ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वावदूके ! भवति तदहो न लौकिकं न वैदिकं चैतत् । दूती तद्भणित मन्यार्थयन्ती विज्ञापयामास ॥२९६॥

उभे एताः खलु दास्य एव, आसामिनत्वादुपवन्नमेवोदासीनत्वम् । कथमुदासीनमौदासीन्यमेतासु प्रकाशयति ॥२९७॥

उन्मूलयति हृन्मूलं मुरली [1]खुरली तव ।
